www.thearyasamaj.org

संस्कृतस्वाध्यायः

तृतीया दीक्षा - वाङ्मयावतरणी

# श्रीमद्भगवद्गीतासङ्ग्रहः

तृतीयभागः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

www.thearyasamaj.org

## संस्कृतस्वाध्यायः

तृतीया दीक्षा - वाङ्मयावतरणी

# श्रीमद्भगवद्गीतासङ्ग्रहः

## तृतीयभागः

# Śrīmadbhagavadgītāsaṅgrahaḥ

## *Part - III*

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

www.thearyasamaj.org

प्रधानसम्पादकः
राधावल्लभत्रिपाठी

अध्ययनसामग्रीलेखकः
सुदेशकुमारशर्मा

पुनरीक्षकौ
सि.एस्.एस्.एन्. मूर्तिः
ललितकुमारत्रिपाठी

सम्पादकौ
सुकान्तकुमारसेनापतिः
कू. वेङ्कटेशमूर्तिः

संयोजन/सम्पादनसहयोगिनः
धर्मेन्द्रकुमारसिंहदेवः
तङ्गल्लपल्लि महेन्द्रः
प्रफुल्लगडपालः

संयोजकः, दूरस्थशिक्षा
रत्नमोहनझाः

© राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

ISBN - 81-86111-50-6

प्रथमसंस्करणम् - 2009
पुनर्मुद्रणम् - 2010

मूल्यम् - 150/- रूप्यकाणि

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
(मानितविश्वविद्यालयः)
56-57, इन्स्टीट्यूशनल् एरिया,
जनकपुरी, नवदेहली - 110 058
e-mail: rsks@nda.vsnl.net.in
website: www.sanskrit.nic.in

मुद्रकः
अमरप्रिन्टिंगप्रेस्, देहली-09
E-mail:- amarprintingpress@gmail.com

www.thearyasamaj.org



सत्यमेव जयते

मानव संसाधन विकास मंत्री
भारत
नई दिल्ली-११०००१

MINISTER OF
HUMAN RESOURCE DEVELOPMENT
INDIA
NEW DELHI-110001

अर्जुन सिंह
**ARJUN SINGH**

## सन्देश

संस्कृत के व्यापक प्रचार-प्रसार के लिए राष्ट्रिय संस्कृत संस्थान द्वारा संकल्पित संस्कृत स्वाध्याय योजना के अन्तर्गत विभिन्न स्वाध्याय सामग्री प्रकाशित हो रही है। सर्वजन-रुचिर शैली में निर्मित, विभिन्न संस्कृत कृतियों पर आधारित यह अध्ययन सामग्री संस्कृत वाङ्मय के क्रमिक स्वाध्याय के लिए अत्यन्त उपयुक्त रहेगी। पञ्चस्तरीय इस स्वाध्याय-शृंखला में तृतीय स्तर पर जो वाङ्मयावतरणी के नाम से विदित है, प्रस्तुत ग्रन्थ **श्रीमद्भगवद्गीतासङ्ग्रहः ( तृतीयभागः )** सम्प्रति प्रकाशित किया जा रहा है।

विषय-वस्तु के विशद विश्लेषण के साथ वैविध्यपूर्ण अभ्यासों से सम्पुष्ट यह स्वाध्याय सामग्री अधिकाधिक संस्कृत जिज्ञासुओं तक पहुँचे एवं संस्कृत की श्रीवृद्धि में सहायक हो; ऐसी शुभकामनाएँ व्यक्त करता हूँ।

( अर्जुन सिंह )

www.thearyasamaj.org

# पुरोवाक्

संस्कृतभाषा, तदन्तर्गत-ज्ञानं च भारतस्य प्रतिष्ठाहेतुः वर्तते। अत्यन्तप्राचीनकालतः इयं भाषा अनुभूतीनां चिन्तनस्य चाभिव्यक्तये सर्वथा समर्थं साधनम्। यद्यपि आङ्ग्लशासनकाले अनन्तरं च संस्कृतशिक्षा मुख्यधारायाः पार्श्ववर्तितां नीता। तथापि अद्यत्वे भारतीयसमाजस्य हृदये संस्कृतं प्रति कापि निष्ठा वर्तते। प्रबुद्धः भारतीयसमाजः संस्कृतं राष्ट्रस्य ऐकमत्यसम्पोषकत्वेन बहुमनुते। अतः एतस्याः भाषायाः अध्ययनम्-अध्यापनम् प्रचार-प्रसारः च राष्ट्रहितदृष्ट्या अवश्यं भवेत्।

राष्ट्रियसंस्कृतसंस्थानम् शास्त्राणां संस्कृतभाषायाः च विश्वस्तरे प्रचार-प्रसारकार्ये निरतः एकः मानितविश्वविद्यालयः अस्ति। संस्कृतविद्या-सम्बद्धानाम् उच्चस्तरीयग्रन्थानां प्रकाशनं संस्थानस्य बहुमुखकार्येषु अन्यतमम् अस्ति। एतेन सहैव संस्कृताध्ययनासक्तानां जनसामान्यानाम् इच्छां पूरयितुम् अपेक्षितायाः अध्ययनसामग्र्याः निर्माणं तत्प्रकाशनं च संस्थानस्य कर्तव्येषु अन्तर्भवति। संस्कृतजिज्ञासुभिः, संस्कृतेतरक्षेत्रेषु विद्यालय-महाविद्यालयादिनियमित-शिक्षणसंस्थासु संस्कृतम् अध्येतुमशक्तैः समाजस्य विभिन्नक्षेत्रेषु कार्यरतैः विविधवर्गजनैः संस्कृतस्य क्रमिकस्वाध्यायार्थं तादृशसामग्र्याः अपेक्षा क्रियमाणा आसीत्। जिज्ञासूनां तादृशीम् अपेक्षां पूरयितुमेव राष्ट्रियसंस्कृतसंस्थानेन **'संस्कृतस्वाध्याययोजना'** इति एका दूरगामिनी महत्त्वाकाङ्क्षिणी योजना समारब्धा। एतस्याः योजनायाः अन्तर्गततया प्रकाशिताः सामग्र्यः सान्ध्यकक्ष्यासु, अनौपचारिकशिक्षणसन्दर्भे, अन्यसंस्थासु पाठ्यसामग्रीरूपेण सहायकपाठ्यसामग्रीरूपेण अपि उपयोगाय भवितुमर्हन्ति।

एषा स्वाध्याययोजना तावत् पञ्चस्तरीया परिकल्पिता। पञ्चस्तरीय-संस्कृतस्वाध्याय-योजनायां **व्यवहारावतरणी**ति प्रथमा दीक्षा, **व्यवहारावगाहनी**ति द्वितीया दीक्षा, **वाङ्मयावतरणी**ति तृतीया दीक्षा, **वाङ्मयावगाहनी**ति चतुर्थी दीक्षा, **व्युत्पादिनी**ति पञ्चमी दीक्षा च भवेदिति निश्चित्य प्रथमदीक्षायां पञ्चपुस्तकयुक्तगुच्छः, द्वितीयदीक्षायां पुस्तकत्रयगुच्छः च प्रकाशितः। गुच्छद्वयमेतत् संस्कृतानुरागिणां समाजे समादरभाजनं जातम्। मुद्रिताः प्रतयः सद्यः समाप्तिं गताः। प्रथमदीक्षां द्वितीयदीक्षां च अधीतवन्तः, संस्कृतस्य मूलभूतं ज्ञानमवगतवन्तः च तृतीयदीक्षां पठितुं प्रभवन्ति। तृतीयदीक्षायां **संक्षेपरामायणम्, विदुरनीतिशतकम्, श्रीमद्भगवद्गीतासङ्ग्रहः** (त्रिषु भागेषु)

www.thearyasamaj.org

इति एतेषां ग्रन्थानां स्वाध्यायानुकूलशैल्या सामग्री प्रस्तोतव्या इति विनिश्चित्य आदौ संक्षेपरामायणम्, विदुरनीतिशतकम् (विदुरनीतिसङ्ग्रहः) च प्रकाशितम्। ग्रन्थद्वये अपि बोधनस्य पृथक्-पृथक् शैली वर्तते।

सम्प्रति **श्रीमद्भगवद्गीतासङ्ग्रहस्य तृतीयभागः** अध्येतृभ्यः समर्प्यते। श्रीमद्भगवद्गीता हि लोकविश्रुतग्रन्थोऽस्ति। महाभारतयुद्धप्रसङ्गे अर्जुनं निमित्तीकृत्य भगवता कृष्णेन समुपदिष्टा विचाराः अत्र वर्तन्ते। ततः श्लोकानां सङ्ग्रहं कृत्वा भाषाभ्यासानुकूलतादृष्ट्या विषयसम्बोधदृष्ट्या च अभ्यासान् संयोज्य काव्याध्ययनावतरणिकारूपेण एषा अध्ययनसामग्री सज्जीकृता। प्रकृतग्रन्थे गीतायाः द्वादशाध्यायात् अष्टादशाध्यायान्तभागं यावत् विद्यमानविषयाः सङ्गृहीताः सन्ति।

**अध्ययनसामग्र्यां विषयप्रस्तुतिशैली**

**श्लोकः**, श्लोकस्य **पदच्छेदः**, **पदपरिचयः**, **आकाङ्क्षा**, **अन्वयः**, **प्रतिपदार्थः** (भाषात्रये),श्लोकस्य **भावार्थः** (भाषात्रये), **निदर्शनम्** (व्याकरण-सन्धि-समास-कृदन्त-तद्धित-कारक-कोषादिविषयाः), बह्वायामीयाभ्यासाः च अस्मिन् ग्रन्थे यथासम्भवं सरलशैल्या प्रस्तुताः। पदच्छेद-पदपरिचयादिद्वारा श्लोकगतपदानां पृथक्-पृथक् ज्ञापनं क्रियते। आकाङ्क्षायां प्रश्नोत्तरमाध्यमेन खण्डान्वयः रोचकशैल्या उपस्थापनीयः इति प्रयासः कृतः। निदर्शनद्वारा व्याकरणसम्बद्धाः अवश्यं ज्ञातव्याः केचन अंशाः सरलशैल्या निरूपिताः। पर्यायपदानाम् ज्ञानार्थं कोशः अपि निर्दिष्टः। अभ्यासप्रकरणे, शिक्षणीयबिन्दुविशेषस्य सम्यक् अवगाहनपुरस्सरं अध्येतारः प्रयोगसामर्थ्यं प्राप्नुयुः इति उद्देशेन अभ्यासाः रचिताः वर्तन्ते। तृतीयदीक्षास्तरे प्रस्तुता भाषाशिक्षणप्रधाना एषा अध्ययनसामग्री भाषाशिक्षणेन सह ग्रन्थगतविषयावगमनं कारयेत्, काव्यरसास्वादनसामर्थ्यं च वर्धयेदिति सम्भाव्यते।

अध्येतारः विद्वांसश्च एनं ग्रन्थम् अवलोक्य स्वीयम् अभिप्रायं/परामर्शं प्रेषयेयुः येन अस्माभिः ग्रन्थस्यास्य अग्रिमसंस्करणसन्दर्भे तदनुसारम् उचितं परिवर्तनं परिवर्धनं वा कर्तुं शक्येत।

**(राधावल्लभत्रिपाठी)**

२७-३-२००९
चैत्रशुक्लप्रतिपत्

www.thearyasamaj.org

# श्लोकानुक्रमणिका


| अध्याय: | श्लोकसंख्या | श्लोक: | पृष्ठसंख्या |
|---|---|---|---|
| द्वादशोध्याय: | 1. | ये तु सर्वाणि कर्माणि | 1-9 |
| | 2. | तेषामहं समुद्धर्ता | |
| | 3. | मय्येव मन आधत्स्व | 10-14 |
| | 4. | अथ चित्तं समाधातुं | 15-19 |
| | 5. | अभ्यासेऽप्यसमर्थोऽसि | 20-24 |
| | 6. | अथैतदप्यशक्तोऽसि | 25-29 |
| | 7. | श्रेयो हि ज्ञानमभ्यासात् | 30-35 |
| | 8. | अद्वेष्टा सर्वभूतानां | 36-43 |
| | 9. | सन्तुष्टस्सततं योगी | |
| | 10. | यस्मान्नोद्विजते लोको | 44-48 |
| | 11. | अनपेक्ष: शुचिर्दक्ष: | 49-53 |
| | 12. | यो न हृष्यति न द्वेष्टि | 54-58 |
| | 13. | सम: शत्रौ च मित्रे च | 59-65 |
| | 14. | तुल्यनिन्दास्तुतिर्मौनी | |
| | 15. | ये तु धर्म्यामृतमिदं | 66-70 |
| त्रयोदशोध्याय: | 16. | अमानित्वमदम्भित्वम् | 71-78 |
| | 17. | इन्द्रियार्थेषु वैराग्यम् | |
| | 18. | असक्तिरनभिष्वङ्ग: | 79-87 |
| | 19. | मयि चानन्ययोगेन | |
| | 20. | अध्यात्मज्ञाननित्यत्वं | |
| | 21. | समं सर्वेषु भूतेषु | 88-92 |
| | 22. | समं पश्यन् हि सर्वत्र | 93-97 |
| | 23. | प्रकृत्यैव च कर्माणि | 98-102 |
| | 24. | यदा भूतपृथग्भावम् | 103-106 |
| | 25. | अनादित्वान्निर्गुणत्वात् | 107-111 |

www.thearyasamaj.org




| | | | |
|---|---|---|---|
| | 26. | यथा सर्वगतं सौक्ष्म्यात् | 112-116 |
| | 27. | यथा प्रकाशयत्येक: | 117-120 |
| | 28. | क्षेत्रक्षेत्रज्ञयोरेवम् | 121-125 |
| **चतुर्दशोध्याय:** | 29. | सत्त्वं रजस्तम इति | 126-131 |
| | 30. | तत्र सत्त्वं | 132-136 |
| | 31. | रजो रागात्मकं विद्धि | 137-141 |
| | 32. | तमस्त्वज्ञानजं विद्धि | 142-146 |
| | 33. | सत्त्वं सुखे सञ्जयति | 147-151 |
| | 34. | प्रकाशं च प्रवृत्तिं च | 152-155 |
| | 35. | उदासीनवदासीनो गुणैर्यो | 156-160 |
| | 36. | समदु:खसुख: स्वस्थ: | 161-168 |
| | 37. | मानापमानयोस्तुल्यस्तुल्यो | |
| | 38. | मां च योऽव्यभिचारेण | 169-172 |
| | 39. | ब्रह्मणो हि | 173-177 |
| **पञ्चदशोध्याय:** | 40. | ऊर्ध्वमूलमध:शाखम् | 178-182 |
| | 41. | अधश्चोर्ध्वं प्रसृता: | 183-187 |
| | 42. | न रूपमस्येह तथोपलभ्यते | 188-196 |
| | 43. | तत: पदं तत्परिमार्गितव्यं | |
| | 44. | निर्मानमोहा जितसङ्गदोषा | 197-201 |
| | 45. | न तद्भासयते सूर्यो | 202-205 |
| | 46. | अहं वैश्वानरो भूत्वा | 206-210 |
| | 47. | सर्वस्य चाहं हृदि | 211-215 |
| | 48. | द्वाविमौ पुरुषौ लोके | 216-220 |
| | 49. | उत्तम: पुरुषस्त्वन्य: | 221-225 |
| **षोडशोध्याय:** | 50. | अभयं सत्त्वसंशुद्धि: | 226-235 |
| | 51. | अहिंसा सत्यमक्रोध: | |
| | 52. | तेज: क्षमा धृति: शौचम् | |
| | 53. | दम्भो दर्पोऽभिमानश्च | 236-240 |

www.thearyasamaj.org




| | | | |
|---|---|---|---|
| | 54. | द्वौ भूतसर्गौ लोकेऽस्मिन् | 241-245 |
| | 55. | आशापाशशतैर्बद्धाः | 246-250 |
| | 56. | इदमद्य मया लब्धम् | 251-255 |
| | 57. | असौ मया हतश्शत्रुर्हनिष्ये | 256-260 |
| | 58. | आढ्योऽभिजनवानस्मि | 261-266 |
| | 59. | त्रिविधं नरकस्येदं द्वारं | 267-271 |
| | 60. | यः शास्त्रविधिमुत्सृज्य | 272-276 |
| | 61. | तस्माच्छास्त्रं प्रमाणं | 277-281 |
| सप्तदशोध्यायः | 62. | अशास्त्रविहितं घोरं | 282-288 |
| | 63. | कर्शयन्तः शरीरस्थं | |
| | 64. | आहारस्त्वपि सर्वस्य | 289-292 |
| | 65. | आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः | 293-297 |
| | 66. | कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः | 298-301 |
| | 67. | यातयामं गतरसं | 302-306 |
| | 68. | देवद्विजगुरुप्राज्ञपूजनं | 307-311 |
| | 69. | अनुद्वेगकरं वाक्यं | 312-316 |
| | 70. | मनःप्रसादः सौम्यत्वं | 317-321 |
| | 71. | दातव्यमिति यद्दानं | 322-326 |
| अष्टादशोध्यायः | 72. | सुखं त्विदानीं त्रिविधं | 327-331 |
| | 73. | यत्तदग्रे विषमिव | 332-336 |
| | 74. | विषयेन्द्रियसंयोगाद्यत् | 337-341 |
| | 75. | यदग्रे चानुबन्धे च | 342-346 |
| | 76. | ईश्वरः सर्वभूतानां | 347-350 |
| | 77. | तमेव शरणं गच्छ | 351-354 |
| | 78. | मन्मना भव मद्भक्तो | 355-360 |
| | 79. | सर्वधर्मान्परित्यज्य मामेकं | 361-364 |
| | 80. | नष्टो मोहः स्मृतिर्लब्धा | 365-370 |
| | 81. | यत्र योगेश्वरः कृष्णो | 371-376 |
| | | परिशिष्टम् (श्लोकावलिः) | 377-379 |

www.thearyasamaj.org

# सङ्केतसूची

## वचनम्

| | | |
|---|---|---|
| एक. | – | एकवचनम् |
| द्वि. | – | द्विवचनम् |
| बहु. | – | बहुवचनम् |

## विभक्तिः

| | | |
|---|---|---|
| प्र. | – | प्रथमा |
| द्विती. | – | द्वितीया |
| तृ. | – | तृतीया |
| चतु. | – | चतुर्थी |
| पं. | – | पञ्चमी |
| षष्ठी | – | षष्ठी |
| सप्त. | – | सप्तमी |
| सम्बो. प्र. | – | सम्बोधनप्रथमा |

## पुरुषः

| | | |
|---|---|---|
| प्रपु. | – | प्रथमपुरुषः |
| मपु. | – | मध्यमपुरुषः |
| उपु. | – | उत्तमपुरुषः |

## लिङ्गम्

| | | |
|---|---|---|
| पुं. | – | पुंलिङ्गः |
| स्त्री. | – | स्त्रीलिङ्गः |
| नपुं. | – | नपुंसकलिङ्गः |
| त्रि. | – | त्रिलिङ्गः |

## अन्त्यवर्णनिर्देशः

| | | |
|---|---|---|
| अ. | – | अकारान्तः |
| द. | – | दकारान्तः |

एवमेव अन्येषामपि अजन्तानां हलन्तानां च।

## अन्यः सङ्केतः

| | | |
|---|---|---|
| सर्व. | – | सर्वनामशब्दः |
| विधि. | – | विधिलिङ्लकारः |

www.thearyasamaj.org

# श्रीमद्भगवद्गीतासङ्ग्रहः

## ( तृतीयभागः )

## द्वादशोऽध्यायः

**श्लोकः**

**श्री भगवानुवाच–**

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते ॥1॥** (भ.गी. 12.6)

**तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।**
**भवामि न चिरात्पार्थ मय्यावेशितचेतसाम् ॥2॥** (भ.गी. 12.7)

**पदच्छेदः**

श्री भगवान् उवाच–

ये तु सर्वाणि कर्माणि मयि सम्-न्यस्य मत्-पराः।
अनन्येन एव योगेन माम् ध्यायन्तः उपासते।।

तेषाम् अहम् समुद्धर्ता मृत्युसंसारसागरात्।
भवामि न चिरात् पार्थ मयि आवेशितचेतसाम्।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ये | यद्-द. (सर्व.) पुं. प्र. बहु. | उपासते | उप + आस्-कर्तरि |
| तु | अव्ययम् | | आत्मनेपदे लट् प्रपु. बहु. |
| सर्वाणि | अ. (सर्व.) नपुं. द्विती. बहु. | तेषाम् | तद्-द.(सर्व.)पुं. षष्ठी बहु. |
| कर्माणि | कर्मन्-न. नपुं. द्विती. बहु. | अहम् | अस्मद्-द.(सर्व.)प्र. एक. |
| मयि | अस्मद्-द. (सर्व.) सप्त. एक. | समुद्धर्ता | समुद्धर्तृ-ऋ. पुं. प्र. एक. |
| संन्यस्य | ल्यबन्तम् अव्ययम् | मृत्युसंसारसागरात् | अ. पुं. पं. एक. समस्तम् |
| मत्पराः | अ. पुं. प्र. बहु. समस्तम् | भवामि | भू-कर्तरि लट् उपु. एक. |
| अनन्येन | अ. पुं. तृ. एक. समस्तम् | न | अव्ययम् |

www.thearyasamaj.org 

| | | | |
|---|---|---|---|
| एव | अव्ययम् | चिरात् | अव्ययम् |
| योगेन | अ. पुं. तृ. एक. | पार्थ! | अ. पुं. सम्बो. एक. त्रि. |
| माम् | अस्मद्-द. सर्व.त्रि.द्विती. एक. | मयि | अस्मद्-द.(सर्व.)सप्त.एक. |
| ध्यायन्तः | ध्यायत्-त. पुं. प्र. बहु. | आवेशितचेतसाम् | आवेशितचेतस्-स. पुं. षष्ठी बहु. समस्तम् |

## आकाङ्क्षा

**उपासते।**

| | |
|---|---|
| कम् उपासते? | माम् (ईश्वरम्) उपासते। |
| किं कुर्वन्तः उपासते? | ध्यायन्तः उपासते। |
| केन मां ध्यायन्तः उपासते? | योगेन मां ध्यायन्तः उपासते। |
| कीदृशेन योगेन? | अनन्येन एव योगेन। |
| पुनश्च कीदृशाः माम् उपासते? | मत्पराः माम् उपासते। |
| किं कृत्वा मत्पराः उपासते? | संन्यस्य मत्पराः उपासते। |
| कानि संन्यस्य? | कर्माणि संन्यस्य। |
| कानि कर्माणि संन्यस्य? | सर्वाणि कर्माणि संन्यस्य। |
| सर्वाणि कर्माणि कस्मिन् संन्यस्य उपासते? | मयि संन्यस्य उपासते। |
| के उपासते? | ये (भक्ताः) उपासते। |

**अहं (कृष्णः) भवामि।**

| | |
|---|---|
| पार्थ! अहं कः भवामि? | पार्थ! अहं समुद्धर्ता भवामि। |
| केषां समुद्धर्ता भवामि? | तेषां (ये तु सर्वाणि.........उपासते तेषां) समुद्धर्ता भवामि। |
| कीदृशानां तेषाम् उपासकानाम्? | आवेशितचेतसां तेषाम् उपासकानाम्। |
| कस्मिन् आवेशितचेतसां समुद्धर्ता? | मयि (कृष्णे) आवेशितचेतसां समुद्धर्ता। |
| कस्मात् समुद्धर्ता? | मृत्युसंसारसागरात् समुद्धर्ता। |
| कदा समुद्धर्ता भवामि? | अचिरात् समुद्धर्ता भवामि। |
| श्लोके सम्बोधनं किम्? | पार्थ |

## अन्वयः

हे पार्थ! ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः (सन्तः) अनन्येन एव योगेन माम् ध्यायन्तः उपासते तेषाम् मयि आवेशितचेतसाम् अहम् मृत्युसंसारसागरात् न चिरात् (अचिरात्) समुद्धर्ता भवामि।

www.thearyasamaj.org


## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| पार्थ! | अर्जुन! | हे अर्जुन! | *0 Arjuna!* |
| ये | ये (भक्ताः) | जो (भक्त) | those who |
| सर्वाणि कर्माणि | सकलानि कर्माणि | सभी कर्मों को | all the actions |
| मयि | भगवति | मुझ (भगवान्) में | in me |
| संन्यस्य | समारोप्य | सौंपकर | having renounced/ dedicated |
| मत्पराः (सन्तः) | मत्परायणाः (सन्तः) | मेरे परायण होकर | regarding me as the supreme goal |
| अनन्येन एव योगेन | एकनिष्ठेन योगेन | अनन्य चित्त से | with single minded |
| माम् | ईश्वरम् | मुझे/मेरा | me alone |
| ध्यायन्तः | ध्यानं कुर्वन्तः | ध्यान करते हुए | meditating |
| उपासते | भजन्ते | उपासना करते हैं | worship |
| तेषाम् | भक्तानाम् | भक्तों का | For them |
| मयि | कृष्णे | मुझ(कृष्ण)में | in me |
| आवेशित-चेतसाम् | समर्पितमनसाम् | समर्पित चित्त वालों का | of those whose minds are set |
| अहं | भगवान् | मैं (कृष्ण) | *I (kṛṣṇa)* |
| मृत्युसंसार-सागरात् | मरणसहितात् भवसागरात् | मृत्युरूपी भव-सागर से | out of the mortal ocean |
| न चिरात् | शीघ्रमेव | जल्दी ही | very soon |
| समुद्धर्ता | तारकः | तारण करने वाले | saviour |
| भवामि | सम्भवामि | हो जाता हूँ | (I) become |

## भावार्थः

**संस्कृतम्** – ये भक्ताः मनसा, वचसा शरीरेण च जायमानानि सकलानि कर्माणि ईश्वरे समारोप्य ईश्वरपरायणाः सन्तः एकनिष्ठेन योगेन ईश्वरम् एव ध्यायन्तः तं कीर्तयन्ति तान् भगवान् मरणयुक्तभवसागरात् शीघ्रमेव तारयति इति भगवान् कृष्णः उक्तवान्।

www.thearyasamaj.org


**हिन्दी** – जो भक्त मन, वाणी और शरीर से होने वाले समस्त कर्मों को मुझमें ही अर्पित कर, मुझमें आसक्त होकर एकनिष्ठ योग से मेरा ध्यान करते हुए उपासना करते हैं। भगवान् उनका उद्धार करता है। हे अर्जुन! मुझमें अपने चित्त को समाविष्ट करने वाले उन सभी भक्तों का मैं मृत्युयुक्त भवसागर से शीघ्र ही तारण करने वाला हो जाता हूँ।

**आंग्लम्** – Those who worship me (the God), renouncing all actions in me, think me as the Supreme goal, Meditating on me with single minded *Yoga*. I (the God) will protect them from all difficulties. For them whose thought is set on me, I become very soon the deliverer from the ocean of the mortal *Samsāra*.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| अनन्येनैव | – | अनन्येन + एव (वृद्धिसन्धिः) |
| ध्यायन्त उपासते | – | ध्यायन्तः + उपासते (विसर्गसन्धिः) |
| समुद्धर्ता | – | समुत् + हर्ता (हल्-सन्धिः) |
| मय्यावेशितचेतसाम् | – | मयि + आवेशितचेतसाम् (यण्-सन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| मत्पराः | – | मम परः मत्परः (षष्ठीतत्पुरुषः) ते |
| अनन्येन | – | न अन्यः अनन्यः (नञ् तत्पुरुषः) तेन |
| मृत्युसंसारसागरात् | – | मृत्युयुक्तः संसारः–मृत्युसंसारः, मृत्युसंसारस्य सागरः, मृत्युसंसारसागरः (षष्ठीतत्पुरुषः) तस्मात् मृत्युसंसारसागरात् (पञ्चमीतत्पुरुषः) |
| आवेशितचेतसाम् | – | आवेशितं चेतः येषां ते आवेशितचेतसः (बहुव्रीहिः) तेषाम् |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| कर्माणि | – | कृ + मनिन् – कर्मन् |
| संन्यस्य | – | सम् + नि + अस् + ल्यप् |
| योगेन | – | युज् + घञ् – योग |
| ध्यायन्तः | – | ध्यै + शतृ – ध्यायत् |

www.thearyasamaj.org


| | | |
|---|---|---|
| समुद्धर्ता | - | सम् + उत् + हृ + तृच्-समुद्धर्तृ |
| मृत्यु | - | मृ + त्युक् |
| संसार | - | सम् + सृ + घञ् |
| आवेशित | - | आ + विश् + णिच् + क्त |
| चेतस् | - | चित् + असुन् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| सागरः | - | सगरेण निर्वृत्तः (सगर + अण्) |
| पार्थ | - | पृथा + अण् |

**अवधेयम्**

**उप + आस्-धातोः लट्रूपाणि-**

| | | | |
|---|---|---|---|
| उपास्ते | उपासाते | उपासते | प्रपु. |
| उपास्से | उपासाथे | उपाध्वे | मपु. |
| उपासे | उपास्वहे | उपास्महे | उपु. |

## अभ्यासः - 1

### श्लोकः - 1

1. **श्लोकानुसारम् उचितैः पदैः रिक्तस्थानानि पूरयत-**

[श्लोक के अनुसार उचित पद से रिक्त स्थानों की पूर्ति करें। Fill in the blanks with appropriate words as appear in the verse.]

ये तु ------------- ------------ मयि ------------- मत्पराः।
------------------ योगेन ----- --------------------उपासते।।

तेषामहं समुद्धर्ता ----------------------------------------------।
भवामि ----- ----------- पार्थ --------------------------।।

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत-**

[निर्देश के अनुसार श्लोक से पदों को चुनकर लिखें। Write the words from the verse as per the instructions.]

(क) प्रथमान्तपदानि - ------------- ------------- -------------
------------- -------------

www.thearyasamaj.org


(ख) द्वितीयान्तपदानि - ------------- ------------- -------------

(ग) तृतीयान्तं पदद्वयम् - ---------------- ----------------

(घ) क्रियापदानि - ------------- ------------- -------------

(ङ) सर्वनामशब्दाः - ------------- ------------- -------------

(च) सम्बोधनपदम् - -----------

3. **प्रश्नम् उत्तरेण यथोचितं योजयत–**

[प्रश्न को सही उत्तर से जोड़ें। Match the question with appropriate answer.]

| | |
|---|---|
| (i) कः समुद्धर्ता अस्ति? | (क) उपासकानाम् |
| (ii) कृष्णं केषां समुद्धर्ता अस्ति? | (ख) अर्जुनः |
| (iii) 'पार्थ' इत्यत्र कः सम्बोधितः? | (ग) भगवान् |
| (iv) 'मयि संन्यस्य' इत्यत्र कस्मिन् संन्यासः उक्तः? | (घ) अनन्येन |
| (v) कानि संन्यस्य नराः मत्पराः भवेयुः? | (ङ) परमात्मनि |
| (vi) कीदृशेन योगेन ध्यानं करणीयम्? | (च) कर्माणि |

4. **सन्धिं कुरुत–**

[सन्धि करें। Make the euphonic combination.]

**यथा–** (i) अनन्येन + एव = **अनन्येनैव**

(ii) मम + एकम् = ----------------

(iii) एक + एकशः = ----------------

(iv) तव + एतद् = ----------------

(v) उप + एति = ----------------

5. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद करें। Disjoin the followings.]

**यथा–** (i) ध्यायन्त उपासते = **ध्यायन्तः + उपासते**

(ii) तत ऊर्ध्वम् = ------------------------------------

(iii) अत एव = ------------------------------------

(iv) भवत आदेशः = ------------------------------------

(v) मय्यावेशितचेतसाम् = **मयि + आवेशितचेतसाम्**

(vi) त्वय्यावेशितचेतसाम् = ------------------------------------

www.thearyasamaj.org


(vii) राजन्यावेशितचेतसाम् = ----------------------------------

(viii) भगवत्यावेशितचेतसाम् = ----------------------------------

(ix) बलवत्यावेशितचेतसाम् = ----------------------------------

6. **श्लोकयोः अन्वयं पूरयत–**

[श्लोकों का अन्वय पूर्ण करें। Complete the constructions of the verses.]

----- ------- ये तु ------- ------------ ------- -------- मत्पराः (सन्तः)
------- ------ ------------ माम् ------------- --------------- -------
मयि ----------------- अहम् ------------------ न चिरात् (अचिरात्) ------
भवामि।

7. **उचितं विशेषणं विशेष्यपदं वा लिखत–**

[उचित विशेषण या विशेष्य पद लिखें। Write appropriate qualifier or the qualified.]

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| (क) ----------- | कर्माणि |
| (ख) अनन्येन | ----------------- |
| (ग) मत्पराः<br>ध्यायन्तः } | ----------------- |
| (घ) तेषाम् | ----------------- |

8. **यथोचितं योजयत–**

[सही मेल बनाएँ। Match appropriately.]

| | |
|---|---|
| यथा– (i) **मयि** | (क) शीघ्रम् |
| (ii) समुद्धर्ता | (ख) अर्जुन |
| (iii) न चिरात् | (ग) **परमात्मनि** |
| (iv) पार्थ | (घ) तारकः |

9. **अधोनिर्दिष्टपदानां प्रकृति–प्रत्यय–विभागं कुरुत–**

[अधोलिखित पदों का प्रकृति–प्रत्यय-विभाग करें। Separate the base and the suffix of the following words.]

यथा– (i) समुद्धर्ता – **सम् + उत् + हृ + तृच्**

(ii) कर्ता – --------------------------------

(iii) धर्ता – --------------------------------

www.thearyasamaj.org


(iv) भर्ता – ----------------------------------

(v) चेता – ----------------------------------

(vi) नेता – ----------------------------------

(vii) भेता – ----------------------------------

(viii) श्रोता – ----------------------------------

(ix) दाता – ----------------------------------

(x) गन्ता – ----------------------------------

10. **अधोनिर्दिष्ट–पदानां प्रातिपदिकं धातुं वा लिखत–**

[अधोलिखित पदों का प्रातिपदिक या मूलधातु लिखें। Write the nominal stem or the basic root of the following words.]

**यथा–** (i) तेषाम् – **तद्**

(ii) समुद्धर्ता – --------------------

(iii) भवामि – --------------------

(iv) पार्थ – --------------------

(v) मयि – --------------------

(vi) कर्माणि – **कर्मन्**

(vii) मयि – --------------------

(viii) मत्पराः – --------------------

(ix) ध्यायन्तः – --------------------

11. **अधः प्रदत्तपदेषु उचितं पदमुपयुज्य रिक्तं स्थानं पूरयत–**

[उचित पदों से रिक्त स्थान भरें। Fill in the blanks appropriately.]

| **उपास्ते** | **उपासाते** | **उपासते** |
|---|---|---|

**यथा–** (क) अर्जुनः कृष्णम् **उपास्ते**

(ख) भीमार्जुनौ कृष्णम् ----------

(ग) सीता रामम् ----------

(घ) भक्ताः ईश्वरम् ----------

(ङ) पार्वती शङ्करम् ----------

www.thearyasamaj.org



12. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिए गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) मयि (ख) माम् (ग) सर्वाणि (घ) उपासते (ङ) भवामि (च) संसार (छ) चिर (ज) पार्थ

www.thearyasamaj.org


## श्लोकः

**मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।**
**निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ॥3॥** (भ.गी. 12.8)

## पदच्छेदः

मयि एव मनः आ-धत्स्व मयि बुद्धिम् नि-वेशय।
नि-वसिष्यसि मयि एव अतः ऊर्ध्वम् न संशयः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| मयि | अस्मद्–द. (सर्व.) सप्त. एक. | निवेशय | नि + विश् + णिच्–कर्तृवाच्ये लोट् मपु. एक. |
| एव | अव्ययम् | निवसिष्यसि | नि + वस्–कर्तृवाच्ये लृट् मपु. एक. |
| मनः | मनस्–स. नपुं. द्विती. एक. | अतः | तद्धितान्तम् अव्ययम् |
| आधत्स्व | आ + धा–कर्तृवाच्ये आत्मनेपदे लोट् मपु. एक. | ऊर्ध्वम् | अव्ययम् |
| | | न | अव्ययम् |
| | | संशयः | अ. पुं. प्र. एक. |
| बुद्धिम् | इ. स्त्री. द्विती. एक. | | |

## आकाङ्क्षा

**आधत्स्व।**

किम् आधत्स्व? — मनः आधत्स्व।

कुत्र मनः आधत्स्व? — मयि मनः आधत्स्व।

**निवेशय।**

किं निवेशय? — बुद्धिं निवेशय।

कुत्र बुद्धिं निवेशय? — मयि बुद्धिं निवेशय।

**निवसिष्यसि।**

कुत्र निवसिष्यसि? — मयि निवसिष्यसि।

कदा निवसिष्यसि? — अतः ऊर्ध्वं मयि निवसिष्यसि।

अत्र कः न करणीयः? — संशयः न करणीयः।

www.thearyasamaj.org



**अन्वयः**

(हे अर्जुन!) मयि एव मनः आधत्स्व, मयि बुद्धिं निवेशय। अतः ऊर्ध्वं मयि एव निवसिष्यसि, (अत्र) संशयः न।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| मयि एव | परमात्मनि एव | मुझमें ही | in me |
| मनः | चेतः | मन को | the mind |
| आधत्स्व | स्थिरीकुरु | स्थिर करो | fix/set |
| मयि | परमात्मनि | मुझमें | in me |
| बुद्धिं | मतिम् | अपनी बुद्धि को | intellect |
| निवेशय | नियोजय | लगाओ | place |
| अतः ऊर्ध्वम् | तदनन्तरम् | तत्पश्चात् | here after |
| मयि एव | परमात्मनि एव | मुझमें ही | in me |
| निवसिष्यसि | वासं करिष्यसि | निवास करोगे | shall live |
| न संशयः | सन्देहो नास्ति | इसमें सन्देह नहीं है | without the doubt |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! त्वं स्वीयं चेतः परमात्मनि एव स्थिरीकुरु, स्वीयां बुद्धिं च तस्मिन् एव नियोजय। तेन त्वं सर्वदा परमात्मनि एव वासं करिष्यसि – इत्यत्र सन्देहो नास्ति।

**हिन्दी** – हे अर्जुन! तुम अपने चित्त को परमात्मा में ही स्थिर करो और अपनी बुद्धि को भी परमात्मा में ही लगा दो। तब तुम सर्वदा परमात्मा में ही रमे रहोगे और वहीं निवास करोगे–इसमें सन्देह नहीं है।

**आंग्लम्** – Fix your mind on me alone, let your thoughts do well in me, you will here after live in me alone is no doubt regarding this.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

मय्येव = मयि + एव (यण्-सन्धिः)

अत ऊर्ध्वम् = अतः + ऊर्ध्वम् (विसर्गसन्धिः)

www.thearyasamaj.org


(ख) **कृदन्तः**

| | | |
|---|---|---|
| मनः | = | मन् + असुन् - मनस् |
| बुद्धिम् | = | बुध् + क्तिन् |
| संशयः | = | सम् + शी + अच् |

(ग) **तद्धितान्तः**

| | | |
|---|---|---|
| अतः | = | इदम् + तसिल् |

(घ) **व्युत्पत्तिः**

| | | |
|---|---|---|
| मनः | = | मन्यते अनेन इति |

(ii) **पर्यायः**

मनः – चेतः, मानसम्, चित्तम्, अन्तःकरणम्, अन्तरम्

बुद्धिः – मतिः, धीः, प्रज्ञा, पण्डा, मेधा

**अवधेयम्**

**लोट्लकारविषये**

**धाञ्-धातोः लोट्-रूपाणि-**

| | | | |
|---|---|---|---|
| धत्ताम् | दधाताम् | दधताम् | प्रपु. |
| धत्स्व | दधाथाम् | दध्ध्वम् | मपु. |
| दधै | दधावहै | दधामहै | उपु. |

## अभ्यासः - 3

## श्लोकः - 3

1. **श्लोकं दृष्ट्वा उचित-पदैः रिक्तं स्थानं पूरयत–**

[श्लोक को देखकर उचित पद से रिक्त स्थानों की पूर्ति करें। See the verse and fill in the blanks with appropriate words.]

मय्येव --------- -------- मयि बुद्धिं -------------।

------------- मय्येव ------ --------- ----संशयः॥

www.thearyasamaj.org


2. **श्लोकस्थान् शब्दान् यथानिर्देशं रिक्तस्थानेषु स्थापयत–**

[यथा निर्देश श्लोक के शब्दों को रिक्त स्थानों में भरें। Fill in the blanks with the words of the verse.]

(क) प्रथमान्तं पदम् – (i) ------------

(ख) द्वितीयान्तं पद्वयम् – (i) ------------ (ii) ----------

(ग) क्रियापदानि – (i) ------------ (ii) ----------- (iii) -----------

3. **अन्वयं पूरयत–**

[अन्वय को पूरा करें। Complete the construction.]

मयि एव ---- ------- मयि बुद्धिं निवेशय। ------ ------ ------एव निवसिष्यसि, (अत्र) संशयः ----------।

4. **उचितं मेलनं कुरुत–**

[उचित मेल करें। Match appropriately.]

| | | | |
|---|---|---|---|
| यथा– (i) | **मयि** | (क) | अव्ययम् |
| (ii) | मनः | (ख) | इ. स्त्री. द्विती. एक. |
| (iii) | बुद्धिम् | (ग) | अ. पुं. प्र. एक. |
| (iv) | अतः | (घ) | **द. त्रि. (सर्व.) सप्त. एक.** |
| (v) | संशयः | (ङ) | स. नपुं. द्विती. एक. |

5. **रिक्तस्थानेषु अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–**

[अधोलिखित प्रश्नों के उत्तर रिक्त स्थानों में लिखें। Answer the following questions in the blanks space given.]

(i) श्लोके कः सम्बोधयति? = **कृष्णः**

(ii) कृष्णः कं सम्बोधयति? = ------------------------

(iii) कृष्णः कां निवेशयितुं वदति? = ------------------------

(iv) परमात्मनि किम् आधत्स्व? = ------------------------

(v) 'मय्येव निवसिष्यसि' इत्यत्र किं न अस्ति? = ------------------------

6. **रिक्तं स्थानं पूरयत–**

[रिक्त स्थानों की पूर्ति करें। Fill in the blanks.]

(i) हे अर्जुन! त्वं मयि -------------- आधत्स्व।

www.thearyasamaj.org


(ii) हे अर्जुन! त्वं -------------- बुद्धिं निवेशय।

(iii) बुद्धिनिवेशेन त्वं मयि ------------------।

(iv) कृष्णः ---------------- सम्बोधयति।

7. **यथोचितं लोट्रूपेण रिक्तस्थानं पूरयत–**

[यथोचित रिक्त स्थानों की पूर्ति करें। Fill in the blanks appropriately.]

| | | | |
|---|---|---|---|
| (i) | त्वं बुद्धिं | **निवेशय।** | (नि + विश् + णिच्) |
| (ii) | त्वं पुस्तकं | --------------- | (पठ्) |
| (iii) | त्वं गृहं | --------------- | (गम्) |
| (iv) | त्वं जलं | --------------- | (पा) |
| (v) | त्वं मम गृहे | --------------- | (नि + वस्) |
| (vi) | त्वं कृष्णं | --------------- | (प्र + नम) |
| (vii) | त्वं मनः | **आधत्स्व।** | (आ + धा–आत्मनेपदे) |
| (viii) | त्वं मां | --------------- | (क्षम्) |
| (ix) | त्वं गुरुं | --------------- | (सेव्) |
| (x) | त्वं कष्टं | --------------- | (सह्) |

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिए गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(i) निवेशय (ii) अतः (iii) आधत्स्व

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**अथ चित्तं समाधातुं न शक्नोषि मयि स्थिरम् ।**
**अभ्यासयोगेन ततो मामिच्छाप्तुं धनञ्जय ॥4॥** (भ.गी. 12.9)

**पदच्छेदः**

अथ चित्तम् समाधातुम् न शक्नोषि मयि स्थिरम्।
अभ्यास-योगेन ततः माम् इच्छ आप्तुम् धनञ्जय॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अथ | अव्ययम् | अभ्यासयोगेन | अ. पुं. तृ. एक. समस्तम् |
| चित्तम् | अ. नपुं. द्विती. एक. | ततः | तद्धितान्तम् अव्ययम् |
| समाधातुम् | तुमुनन्तम् अव्ययम् | माम् | अस्मद्–द. (सर्व.) द्विती. एक. |
| न | अव्ययम् | | |
| शक्नोषि | शक्–कर्तृवाच्ये लट् मपु. एक. | इच्छ | इष्–कर्तृवाच्ये लोट् मपु. एक. |
| मयि | अस्मद्–द. (सर्व.) सप्त. एक. | आप्तुम् | तुमुनन्तम् अव्ययम् |
| | | धनञ्जय | अ. पुं. सम्बो. एक. समस्तम् |
| स्थिरम् | अ. नपुं. द्विती. एक. | | |

**आकाङ्क्षा**

**अथ न शक्नोषि।**

अथ किं कर्तुं न शक्नोषि? — समाधातुं न शक्नोषि।

किं समाधातुं न शक्नोषि? — चित्तं समाधातुं न शक्नोषि।

चित्तं कीदृशं समाधातुम्? — चित्तं स्थिरं समाधातुम्।

कुत्र समाधातुम्? — मयि (परमात्मनि) समाधातुम्।

**धनञ्जय! इच्छ।**

धनञ्जय! किं कर्तुम् इच्छ? — धनञ्जय! आप्तुम् इच्छ।

कम् आप्तुम्? — माम् (ईश्वरम्) आप्तुम्।

कथं माम् आप्तुम् इच्छ? — अभ्यासयोगेन माम् आप्तुम् इच्छ।

www.thearyasamaj.org



**अन्वयः**

धनञ्जय! अथ चित्तं स्थिरं मयि समाधातुं न शक्नोषि, ततः अभ्यासयोगेन माम् आप्तुम् इच्छ।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| धनञ्जय! | हे अर्जुन! | हे अर्जुन! | Dear *Arjuna*! |
| अथ | यदि | यदि | if |
| चित्तम् | मनः | मन को | the mind |
| स्थिरम् | अविचलम् | स्थिर भाव से | steadily |
| मयि | ईश्वरे | मुझमें | in me |
| समाधातुम् | स्थिरं कर्तुम् | स्थिर करने में | to fix |
| न शक्नोषि | नैव अर्हसि | सक्षम नहीं हो | not able |
| ततः | तर्हि | तो | then |
| अभ्यासयोगेन | भक्त्याः अभ्यासेन | भक्ति के अभ्यास द्वारा | by the practicing of *Yoga* |
| माम् | ईश्वरम् | मुझे | me |
| आप्तुम् | प्राप्तुम् | प्राप्त करने हेतु | to reach |
| इच्छ | कामय | इच्छा करो | wish |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! यदि त्वं स्वीयं चित्तं परमेश्वरे स्थिरतया सन्निवेशयितुं सक्षमो न असि; तर्हि त्वं ईश्वरं प्राप्तुं अभ्यासयोगस्य अर्थात् भक्तियोगस्य पालनं कुरु।

**हिन्दी** – हे अर्जुन! यदि तुम अपने चित्त को परमेश्वर में दृढता से सन्निविष्ट करने में सक्षम नहीं हो, तो तुम ईश्वर को प्राप्त करने के लिये भक्तियोग का पालन करो।

**आंग्लम्** – Dear *Dhanañjaya*! if you are unable to fix your mind steadily on me, then wish to reach me by *Abhyāsa Yoga*.

## निदर्शनम्

(i) **व्याकरणम्**

( क ) **सन्धिः**

ततो माम् – ततः + माम् (विसर्गसन्धिः)

इच्छाप्तुम् – इच्छ + आप्तुम् (दीर्घसन्धिः)

www.thearyasamaj.org


**( ख ) समासः**

अभ्यासयोगेन - अभ्यासपूर्वको योगः अभ्यासयोगः (मध्यमपदलोपसमासः) तेन

धनञ्जय - धनं जयति = धनञ्जयः (उपपदसमासः)

**( ग ) कृदन्तः**

समाधातुम् - सम् + आ + धा + तुमुन्

आप्तुम् - आप् + तुमुन्

चित्तम् - चित् + क्त

अभ्यासः - अभि + आ + अस् + घञ्

योगेन - युज् + घञ्

**अवधेयम्**

**तुमुन् प्रत्ययविषये**

---

## अभ्यासः - 4

## श्लोकः - 4

1. **श्लोकं दृष्ट्वा उचित-पदैः रिक्तं स्थानं पूरयत–**

[श्लोक को देखकर उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words from the verse.]

अथ चित्तं --------- न ------- मयि---------।
अभ्यासयोगेन --------- -------------धनञ्जय।।

2. **श्लोकस्थान् शब्दान् यथानिर्देशं रिक्तस्थानेषु स्थापयत–**

[यथानिर्देश श्लोक के शब्दों को रिक्त स्थानों में रखें। Fill in the blanks with the words of the verse.]

(क) अव्ययानि - (i) ------------ (ii) ----------- (iii) ----------

(ख) क्रियापदम् - (i) ------------ (ii) ----------------

(ग) समस्तपदम् - (i) ------------ (ii) ----------------

www.thearyasamaj.org


3. **रिक्तस्थानेषु अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–**

[अधोलिखित प्रश्नों के उत्तर रिक्त स्थानों में लिखें। Answer the questions in the blanks space given.]

**यथा–** (i) श्लोके सम्बोधनं किम्? - **धनञ्जय**

(ii) धनञ्जयः कः अस्ति? - ------------------------

(iii) धनञ्जयं कः सम्बोधयति? - ------------------------

(iv) भगवान् कस्य योगस्य चर्चां करोति? - ------------------------

(v) धनञ्जयः किं समाधातुं न शक्नोति? - ------------------------

4. **यथोचितं योजयत–**

[सही मेल बनायें। Match appropriately.]

| | |
|---|---|
| **यथा–** (i) **चित्तम्** | (क) तुमुनन्तम् अव्ययम् |
| (ii) न | (ख) द. (सर्व.) द्विती. एक. |
| (iii) मयि | (ग) **अ. नपुं. द्विती. एक.** |
| (iv) ततः | (घ) अव्ययम् |
| (v) आप्तुम् | (ङ) द. (सर्व.) सप्त. एक. |
| (vi) माम् | (च) तद्धितान्तम् अव्ययम् |

5. **अधोनिर्दिष्टेषु पदेषु प्रकृति–प्रत्ययविभागं कुरुत–**

[नीचे लिखे पदों में प्रकृति–प्रत्यय का विभाग करें। Separate the base and the suffix of the following words.]

(i) आप्तुम् = **आप् + तुमुन्**

(ii) दातुम् = -----------------

(iii) समाधातुम् = -----------------

(iv) गन्तुम् = -----------------

(v) नन्तुम् = -----------------

(vi) नेतुम् = -----------------

(vii) चेतुम् = -----------------

(viii) श्रोतुम् = -----------------

www.thearyasamaj.org



6. **मञ्जूषायां प्रदत्तैः पदैः रिक्तं स्थानं पूरयत–**

[मञ्जूषा में दिये गये पदों से रिक्त स्थान को पूरा करें। Fill in the blanks with appropriate words given in the box.]

| कामय, स्थिरं कर्तुम्, अविचलम्, यदि, तर्हि, ईश्वरम् |
|---|

धनञ्जय! -------- चित्तं ----------- मयि -------------- न शक्नोषि, -------- अभ्यासयोगेन ------------- आप्तुम् -------।

7. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद करें। Disjoin the euphonic combination.]

**यथा–** (i) इच्छाप्तुम् = **इच्छ + आप्तुम्**

(ii) ममावास: = ----------------

(iii) क्रमाधारित: = ----------------

(iv) पत्रालय: = ----------------

(v) कृष्णाश्रय: = ----------------

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिए गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) शक्नोषि (ख) इच्छ (ग) आप्तुम् (घ) तत: (ङ) अथ

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**अभ्यासेऽप्यसमर्थोऽसि मत्कर्मपरमो भव ।**
**मदर्थमपि कर्माणि कुर्वन्सिद्धिमवाप्स्यसि ॥5॥** (भ.गी. 12.10)

## पदच्छेदः

अभ्यासे अपि असमर्थः असि मत्-कर्म-परमः भव।
मदर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि।।

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अभ्यासे | अ. पुं. सप्त. एक. | मदर्थम् | अ. नपुं. द्विती. |
| अपि | अव्ययम् | | एक. समस्तम् |
| असमर्थः | अ. पुं. प्र. एक. | अपि | अव्ययम् |
| असि | अस्–कर्तृवाच्ये लट् मपु. एक. | कर्माणि | कर्मन्–न. नपुं द्विती. बहु. |
| मत्कर्मपरमः | अ. पुं. प्र. एक. समस्तम् | कुर्वन् | कुर्वत्–त. पुं. प्र. एक. |
| | | सिद्धिम् | इ. स्त्री. द्विती. एक. |
| भव | भू–कर्तृवाच्ये लोट् मपु. एक. | अवाप्स्यसि | अव + आप्–कर्तृवाच्ये लृट् मपु. एक. |

## आकाङ्क्षा

**असि।**

कीदृशः असि? — असमर्थः असि।

कस्मिन् अपि असमर्थः असि? — अभ्यासे अपि असमर्थः असि।

**(तर्हि) भव।**

(तर्हि) कीदृशः भव? — मत्कर्मपरमो भव।

**अवाप्स्यसि।**

किम् अवाप्स्यसि? — सिद्धिम् अवाप्स्यसि।

किं कुर्वन् अवाप्स्यसि? — कर्माणि कुर्वन् अवाप्स्यसि।

किमर्थं कर्माणि कुर्वन्? — मदर्थं कर्माणि कुर्वन्।

www.thearyasamaj.org


**अन्वयः**

(हे अर्जुन! त्वम् यदि) अभ्यासे अपि असमर्थः असि, मत्कर्मपरमः भव, मदर्थम् अपि कर्माणि कुर्वन् सिद्धिम् अवाप्स्यसि।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अभ्यासे | अभ्यासयोगे | भक्तियोग के अभ्यास में | In practice |
| अपि | अपि | भी | also |
| असमर्थः | न सक्षमः | अक्षम | not capable |
| असि | वर्तसे | हो | (you) become |
| मत्कर्मपरमः | ईश्वरकर्मपरायणः | मेरे (ईश्वर) कर्म के प्रति परायण | doing actions for my sake |
| भव | असि | बनो | be |
| मदर्थम् | भगवदर्थम् | मेरे लिए | for my sake |
| अपि | अपि | भी | also |
| कर्माणि | कर्तव्यानि | कर्मों को | actions |
| कुर्वन् | अनुतिष्ठन् | करते हुए | by doing |
| सिद्धिम् | पूर्णताम् | सिद्धि को | perfection |
| अवाप्स्यसि | लप्स्यसे | प्राप्त करोगे | shall attain |

**भावार्थः**

**संस्कृतम्**–हे अर्जुन! यदि त्वं निर्दिष्टरीत्या अभ्यासयोगम् अपि कर्तुं न अर्हसि; तथापि मम कृते अर्थात् ईश्वरस्य कृते स्वीयानि कर्तव्यानि विधाय पूर्णसिद्धिं लब्धुं शक्ष्यसि।

**हिन्दी**–हे अर्जुन! यदि तुम निर्दिष्ट रीति से अभ्यास योग करने में भी असमर्थ हो, तब भी मेरे लिये अपने सभी कर्मों को करते हुए पूर्णसिद्धि को प्राप्त करोगे।

**आंग्लम्**–If you are unable even to practise *Abhyāsa-yoga* be you intent on doing actions for my sake, even by performing actions for my sake you will attain perfection.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

अभ्यासेऽप्यसमर्थोऽसि - अभ्यासे + अपि + असमर्थः + असि

(पूर्वरूपसन्धिः) (यण्-सन्धिः) (विसर्ग/पूर्वरूपसन्धिः)

मत्कर्मपरमो भव - मत्कर्मपरमः + भव (विसर्गसन्धिः)

मदर्थम् - मत् + अर्थम् (जश्त्वसन्धिः)

**(ख) समासः**

असमर्थः - न समर्थः असमर्थः (नञ्-तत्पुरुषः)

मत्कर्मपरमः - मदर्थं कर्म, मत्कर्म (उपपदसमासः) मत्कर्मणि परमः मत्कर्मपरमः (सप्तमी-तत्पुरुषः)

मदर्थम् - मह्यम् इदं मदर्थम् (चतुर्थी-तत्पुरुषः)

**(ग) कृदन्तः**

अभ्यासे - अभि + आ + अस् + घञ्

कुर्वन् - कृ + शतृ - कुर्वत्

सिद्धिम् - सिध् + क्तिन् - सिद्धि

कर्माणि - कृ + मनिन् - कर्म

---

## अभ्यासः - 5

### श्लोकः - 5

1. **रिक्तं स्थानं यथोचितं पूरयत-**

[श्लोक के आधार पर उचित पदों से रिक्त स्थान भरें। Fill in the blanks with the appropriate words from the verse.]

अभ्यासे ------------------- मत्कर्मपरमो ---------।
----------- कर्माणि -------------- सिद्धिमवाप्स्यसि।।

www.thearyasamaj.org


2. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stems of the following words.]

**यथा–** (i) अभ्यासे = **अभ्यास**

(ii) असमर्थः = ------------

(iii) परमः = ------------

(iv) कर्माणि = ------------

(v) कुर्वन् = ------------

3. **प्रस्तुतश्लोकस्य अन्वयं पूरयत–**

[प्रस्तुत श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

अभ्यासे अपि -------------- ----- मत्कर्मपरमः -------- मदर्थम् अपि ---------- ------------- सिद्धिम् ----------------।

4. **सन्धिं विच्छिद्य नाम लिखत–**

[सन्धि विच्छेद कर नाम लिखें। Disjoin the euphonic combination and name it.]

**यथा–** (i) अभ्यासेऽपि = **अभ्यासे + अपि** **पूर्वरूपसन्धिः**

(ii) दर्पणेऽपि = ---------------- ----------------

(iii) हरेऽव = ---------------- ----------------

(iv) कृष्णेऽथ = ---------------- ----------------

(v) असमर्थोऽसि = **असमर्थः + असि** **विसर्गसन्धिः**

(vi) रामोऽपि = ---------------- ----------------

(vii) देवोऽधुना = ---------------- ----------------

(viii) बालोऽगच्छत = ---------------- ----------------

(ix) ततोऽत्र = ---------------- ----------------

5. **श्लोकानुसारं मेलनं कुरुत–**

[श्लोक के अनुसार मेल करें। Match with the according to the verse.]

| | | |
|---|---|---|
| **यथा–** | (क) मत्कर्मपरमः | (i) **कुर्वन्** |
| | (ख) सिद्धिम् | (ii) असि |
| | (ग) असमर्थः | (iii) अवाप्स्यसि |
| | (घ) **कर्माणि** | (iv) भव |

www.thearyasamaj.org


6. **यथोचितं योजयत–**

[सही मेल बनाएँ। Match with the appropriate word-analysis.]

| | | |
|---|---|---|
| **यथा–** (i) | **कुर्वन्** | (क) अ. पुं. प्र. एक. |
| (ii) | असमर्थः | (ख) न. नपुं. द्विती. बहु. |
| (iii) | सिद्धिम् | (ग) **त. पुं. प्र. एक.** |
| (iv) | कर्माणि | (घ) अ. पुं. स. एक. |
| (v) | अभ्यासे | (ङ) इ. स्त्री. द्विती. एक. |

7. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों से कुछ वाक्य बनाएँ। Make some sentences using the words given below.]

(क) असि (ख) भव (ग) अपि (घ) कुर्वन् (ङ) सिद्धिम्

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

-----------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**अथैतदप्यशक्तोऽसि कर्तुं मद्योगमाश्रितः ।**
**सर्वकर्मफलत्यागं ततः कुरु यतात्मवान् ॥6॥** (भ.गी. 12.11)

**पदच्छेदः**

अथ एतद् अपि अशक्तः असि कर्तुम् मद्योगम् आश्रितः।
सर्व-कर्म-फल-त्यागम् ततः कुरु यतात्मवान्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अथ | अव्ययम् (यदि अर्थे) | मद्योगम् | अ. पुं. द्विती. एक. समस्तम् |
| एतत् | एतद्–द. (सर्व.) नपुं. द्विती. एक. | आश्रितः | अ. पुं. प्र. एक. |
| अपि | अव्ययम् | सर्वकर्मफलत्यागम् | अ. पुं. द्विती. एक. समस्तम् |
| अशक्तः | अ. पुं. प्र. एक. समस्तम् | ततः | तद्धितान्तम् अव्ययम् |
| असि | अस्–कर्तृवाच्ये लट् मपु. एक. | कुरु | कृ–कर्तृवाच्ये लोट् मपु. एक. |
| कर्तुम् | तुमुनन्तम् अव्ययम् | यतात्मवान् | यतात्मवत्–त. पुं. प्र. एक. |

**आकाङ्क्षा**

**अथ असि।**

अथ कीदृशः असि? — अथ अशक्तः असि।

किमर्थम् अशक्तः असि? — कर्तुम् अशक्तः असि।

किं कर्तुम्? — एतद् (मदर्थं कर्म) अपि कर्तुम्।

**कुरु।**

किं कुरु? — सर्वकर्मफलत्यागं कुरु।

कीदृशः सन् सर्वकर्मफलत्यागं कुरु? — आश्रितः सन् सर्वकर्मफलत्यागं कुरु।

कम् आश्रितः? — मद्योगमाश्रितः।

ततः कीदृशः सन् कुरु? — ततः यतात्मवान् (सन्) कुरु।

www.thearyasamaj.org


**अन्वयः**

अथ (त्वम्) एतद् अपि कर्तुम् अशक्तः असि, मद्योगमाश्रितः सर्वकर्मफलत्यागं ततः यतात्मवान् कुरु।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अथ | यदि | यदि | If |
| एतदपि | इदम् (अभ्यासयोगम्) अपि | इसे भी | this also |
| कर्तुम् | अनुष्ठातुम् | करने में | to do |
| अशक्तः | असमर्थः | असमर्थ | unable |
| असि | भवसि | हो | be (you) |
| मद्योगम् | मां प्रति भक्तिम् | मेरे प्रति भक्ति के | my *Yoga* |
| आश्रितः | अवलम्बितः | आश्रित होकर | refuged |
| सर्वकर्मफल-त्यागम् | समस्तपुरुषार्थानां फलस्य उत्सर्गम् | सभी पुरुषार्थों के फल का त्याग | the renunciation of the fruit of all actions |
| ततः | तदनन्तरम् | उस कारण से | then |
| यतात्मवान् | संयतचित्तस्सन् | आत्म स्थित होते हुए | self controlled |
| कुरु | विधेहि | करो | do |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! यदि त्वं मम कृते अपि स्वीयानि कर्तव्यानि कर्तुम् असमर्थः असि तर्हि माम् आश्रितः सन् नियमचित्तो भूत्वा सर्वेषां कर्मणां फलं त्यज।

**हिन्दी** – हे अर्जुन! यदि तुम मेरे लिए भी कर्म करने में असमर्थ हो तो मेरे प्रति आश्रित होकर सभी पुरुषार्थों के फल का त्याग कर दो। तत्पश्चात् आत्म-स्थित होने का प्रयास करो।

**आंग्लम्** – If you are unable to do even this then taking refuge in me abandon the fruits of all action with the self subdued.

www.thearyasamaj.org


## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| अथैतद् | – | अथ + एतद् (वृद्धिसन्धिः) |
| अप्यशक्तोऽसि | – | अपि + अशक्तः + असि<br>(यण्-सन्धिः) (विसर्गसन्धिः) |
| मद्योगम् | – | मत् + योगम् (जश्त्वसन्धिः) |
| यतात्मवान् | – | यत + आत्मवान् (दीर्घसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| अशक्तः | – | न शक्तः अशक्तः (नञ्-तत्पुरुषः) |
| मद्योगम् | – | मम योगः मद्योगः (षष्ठीतत्पुरुषः) तम् |
| सर्वकर्मफलत्यागम् | – | सर्वं च तत् कर्म सर्वकर्म (कर्मधारयः) तानि सर्वकर्माणि, सर्वकर्मणां फलम् सर्वकर्मफलम् (षष्ठीतत्पुरुषः) सर्वकर्मफलस्य त्यागः सर्वकर्मफलत्यागः (षष्ठीतत्पुरुषः) तम् |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| शक्तः | – | शक् + क्त |
| कर्तुम् | – | कृ + तुमुन् |
| आश्रितः | – | आ + श्रि + क्त |
| त्यागम् | – | त्यज् + घञ् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| ततः | – | तद् + तसिल् |
| आत्मवान् | – | आत्मन् + मतुप्-आत्मवत् |

**अवधेयम्**

**कृञ् धातोः लोट्रूपाणि (परस्मैपदे) –**

| | | | |
|---|---|---|---|
| करोतु/कुरुतात् | कुरुताम् | कुर्वन्तु | प्रपु. |
| कुरु/कुरुतात् | कुरुतम् | कुरुत | मपु. |
| करवाणि | करवाव | करवाम | उपु. |

www.thearyasamaj.org


## अभ्यासः - 6

### श्लोकः - 6

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks with appropriate words of the verse.]

अथैतदप्य ------------ कर्तुं ------------ माश्रितः।
सर्वकर्म ------------- ततः कुरु ---------------॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[यथा निर्देश श्लोक से पदों को चुनकर लिखें। Write the words from the verse as per the instructions.]

(क) एकवचनान्तम् - (i) ----------------- (ii) -----------------
(ख) अव्ययम् - (i) ----------------- (ii) -----------------
(ग) क्रियापदम् - (i) ----------------- (ii) -----------------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

**यथा–** (i) आश्रितः **आश्रित**
(ii) अशक्तः ---------------
(iii) योगः ---------------
(iv) आत्मवान् ---------------

4. **सन्धिं कुरुत–**

[सन्धि करें। Make the euphonic combination.]

**यथा–** (i) अथ + एतद् = **अथैतद्**
(ii) मम + एतद् = ---------------
(iii) तव + एव = ---------------
(iv) एक + एकम् = ---------------
(v) कृष्ण + एकत्वम् = ---------------

www.thearyasamaj.org


5. **यथोचितं विग्रहवाक्यं समस्तपदं वा लिखत–**

[उचित विग्रह वाक्य या समस्तपद लिखें। [Write the compound word or analytical sentence.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) | **आत्मवान्** | = | **आत्मा** | **अस्य** | **अस्ति** |
| | (ii) | धनवान् | = | -------- | -------- | -------- |
| | (iii) | ज्ञानवान् | = | -------- | -------- | -------- |
| | (iv) | --------- | = | बलम् | अस्य | अस्ति |
| | (v) | --------- | = | विद्या | अस्य | अस्ति |
| | (vi) | रूपवान् | = | -------- | -------- | -------- |
| | (vii) | क्रियावान् | = | -------- | -------- | -------- |
| | (viii) | --------- | = | गुण: | अस्य | अस्ति |

6. **पदपरिचय: दीयताम्–**

[पद परिचय बताएँ। Identify the words.]

| | | | | |
|---|---|---|---|---|
| **यथा–** | (i) | कुरु | = | **कृ–कर्तरि प्रयोगे (कर्तृवाच्ये) लोट् मपु. एक.** |
| | (ii) | श्रृणु | = | ------------------------------------- |
| | (iii) | पठ | = | ------------------------------------- |
| | (iv) | लिख | = | ------------------------------------- |
| | (v) | पश्य | = | ------------------------------------- |

7. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

अथ एतद् ------ कर्तुम् ------- --------- मद्योगम् आश्रित: ----------------
तत: ------------------- कुरु।

8. **उचितपदं योजयत–**

[सही पद का मेल करें। Match with the appropriate word.]

| | | | | |
|---|---|---|---|---|
| **यथा–** | (i) | **अथ** | (क) | प्रयत्नं कुरु |
| | (ii) | कर्तुम् | (ख) | विधेहि |
| | (iii) | अशक्त: | (ग) | आत्मस्थित: |
| | (iv) | असि | (घ) | विधातुम् |
| | (v) | कुरु | (ङ) | भवसि |
| | (vi) | आत्मवान् | (च) | असमर्थ: |
| | (vii) | यत | (छ) | **यदि** |

www.thearyasamaj.org


श्लोकः

**श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।**
**ध्यानात्कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ॥7॥** (भ.गी. 12.12)

पदच्छेदः

श्रेयः हि ज्ञानम् अभ्यासात् ज्ञानात् ध्यानम् वि-शिष्यते।
ध्यानात् कर्म-फल-त्यागः त्यागात् शान्तिः अनन्तरम्॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| श्रेयः | श्रेयस्–स. नपुं. प्र. एक. | विशिष्यते | वि + शिष्–कर्मवाच्ये |
| हि | अव्ययम् | | लट् प्रपु. एक |
| ज्ञानम् | अ. नपुं. प्र. एक. | ध्यानात् | अ. नपुं. पं. एक. |
| अभ्यासात् | अ. पुं. पं. एक. | कर्मफलत्यागः | अ. पुं. प्र. एक. समस्तम् |
| ज्ञानात् | अ. नपुं. पं. एक. | त्यागात् | अ. पुं. पं. एक. |
| ध्यानम् | अ. नपुं. प्र. एक. | शान्तिः | इ. स्त्री. प्र. एक. |
| | | अनन्तरम् | अव्ययम् (कालवाची) |

आकाङ्क्षा

**अस्ति।**

किम् अस्ति? ज्ञानम् अस्ति।
ज्ञानं किम् अस्ति? ज्ञानं श्रेयः अस्ति।
कस्मात् श्रेयः? अभ्यासात् श्रेयः।

**विशिष्यते।**

किं विशिष्यते? ध्यानं विशिष्यते।
ध्यानं कस्मात् विशिष्यते? ध्यानं ज्ञानात् विशिष्यते।

**भवति।**

कः भवति? कर्मफलत्यागः भवति।
कर्मफलत्यागः कस्मात्? कर्मफलत्यागः ध्यानात्।
पुनश्च का भवति? शान्तिः भवति।
शान्तिः कस्मात् भवति? शान्तिः त्यागात् भवति।

www.thearyasamaj.org



**अन्वय:**

अभ्यासात् ज्ञानं हि श्रेय:, ज्ञानात् ध्यानं विशिष्यते। ध्यानात् कर्मफलत्याग:, त्यागात् अनन्तरं शान्ति: (भवति)।

**पदार्थ:**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अभ्यासात् | योगाभ्यासात् | भक्ति योग के अभ्यास से | Than practice |
| ज्ञानम् हि | विद्या हि | ज्ञान | knowledge |
| श्रेय: | श्रेष्ठम् | श्रेष्ठ | better/superior |
| ज्ञानात् | विद्याया: | ज्ञान से | than knowledge |
| ध्यानम् | ध्यानावस्था | ध्यान | meditation |
| विशिष्यते | उत्कृष्टा वर्तते | उत्कृष्ट है | exceis |
| ध्यानात् | ध्यानावस्थाया: | ध्यान से | than meditation |
| कर्मफलत्याग: | कृतस्य कर्मण: फलस्य उत्सर्ग: | कर्म के फल का त्याग | the renunciation of the fruits of the actions |
| त्यागात् | उत्सर्गात् | त्याग से | from renunication |
| अनन्तरम् | पश्चात् | बाद में | immediately |
| शान्ति:(भवति) | प्रशम: लभ्यते | शान्ति प्राप्त होती है | peace is obtained |

**भावार्थ:**

**संस्कृतम्** – हे अर्जुन! भक्तियोगस्य अभ्यासात् ज्ञानं श्रेष्ठम् अस्ति। ज्ञानात् ध्यानस्य श्रेष्ठता वर्तते। ध्यानात् कर्मण: फलस्य उत्सर्ग: श्रेष्ठ:। यदा कर्मफलस्य त्याग: क्रियते, तत्पश्चात् मानव: शान्तिं लभते।

**हिन्दी** – हे अर्जुन! भक्तियोग के अभ्यास से ज्ञान श्रेष्ठ है। ज्ञान से ध्यान श्रेष्ठ है। ध्यान से कर्मों के फल का त्याग श्रेष्ठ है। कर्मफल का त्याग करने के बाद मनुष्य शान्ति को प्राप्त करता है।

**आंग्लम्** – Better indeed is knowledge than *Abhyāsa*, better than knowledge is meditation, better than meditation is the renunciation of the fruit of action, peace immediately follows renunciation.

www.thearyasamaj.org



## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

| | | |
|---|---|---|
| श्रेयो हि | - | श्रेयः + हि (विसर्गसन्धिः) |
| अभ्यासाज्ज्ञानाद्ध्यानम् | - | अभ्यासात् + ज्ञानात् + ध्यानम् (श्चुत्वसन्धिः) (जश्त्वसन्धिः) |
| कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् | - | कर्मफलत्यागः + त्यागात् + शान्तिः + अनन्तरम् (विसर्गसन्धिः) (श्चुत्वसन्धिः) (विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| कर्मफलत्यागः | - | कर्मणः फलम् कर्मफलम् (षष्ठीतत्पुरुषः) कर्मफलस्य त्यागः (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| ज्ञानम् | - | ज्ञा + ल्युट् |
| ध्यानम् | - | ध्यै + ल्युट् |
| शान्तिः | - | शम् + क्तिन् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| श्रेयः | - | प्रशस्य (श्र) + ईयसुन्-श्रेयस् |

**(ङ) कारकः**

अत्र पञ्चमी विभक्तिः भवति-

**अभ्यासात्** ज्ञानं श्रेयः अस्ति।

**ज्ञानात्** ध्यानं विशिष्यते।

**ध्यानात्** कर्मफलत्यागः।

**त्यागात्** शान्तिः प्रभवति।

**अवधेयम्**

**पञ्चमी विभक्तिविषये**

www.thearyasamaj.org


## अभ्यासः - 7

### श्लोकः - 7

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks with appropriate word according to the verse]

श्रेयो हि ------------------------- विशिष्यते।
-------------------- त्यागाच्छान्ति ---------॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से निर्देशानुसार पद लिखें। [Write the words according to the verse as directed.]

(क) प्रथमान्तम् - (i) ---------- (ii) ----------
(ख) पञ्चम्यन्तम् - (i) ---------- (ii) ---------- (iii) --------
(ग) विशेषणपदम् - (i) ---------- (ii) ----------

3. **निम्नलिखितानां पदानां प्रातिपदिकं लिखत–**

[नीचे लिखे पदों के प्रातिपदिक लिखें। Write the nominal stems of the words.]

यथा– (i) ज्ञानात् **ज्ञान**
(ii) अभ्यासात् --------------------
(iii) त्यागात् --------------------
(iv) ध्यानात् --------------------
(v) शान्तिः --------------------

4. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोकानुसार रिक्त स्थानों को भरें। Fill in the blanks according to the verse.]

यथा– (i) **ज्ञानात् ध्यानं श्रेष्ठम् अस्ति।**
(ii) ------------- अभ्यासात् श्रेष्ठम् अस्ति।
(iii) ------------- ध्यानात् श्रेष्ठः अस्ति।
(iv) त्यागात् अनन्तरं ----------- भवति।

www.thearyasamaj.org



5. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

अभ्यासात् ------ ------ -------- ज्ञानात् ------- --------। ध्यानात् ---------- ------------- अनन्तरं -------- --------।

6. **उचितपदेन योजयत–**

[उचित पद से मेल करें। Match with the appropriate word.]

| | | |
|---|---|---|
| यथा– | (i) **ज्ञानम्** | (क) कर्मफलत्यागः |
| | (ii) श्रेयः | (ख) तत्पश्चात् |
| | (iii) त्यागः | (ग) मनः शमनम् |
| | (iv) अनन्तरम् | (घ) **विद्या** |
| | (v) शान्तिः | (ङ) श्रेष्ठम् |

7. **अधोलिखितानां प्रश्नानाम् उत्तरं लिखत–**

[अधोलिखित प्रश्नों के उत्तर लिखें। Answer the following questions.]

(क) अभ्यासात् किं श्रेयः अस्ति? ----------------------------------------

(ख) ध्यानं कस्मात् विशिष्यते? ----------------------------------------

(ग) ध्यानात् किं विशिष्यते? ----------------------------------------

(घ) शान्तिः कदा प्राप्यते? ----------------------------------------

8. **यथोदाहरणं पञ्चमीविभक्त्या रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार पञ्चमी विभक्ति से रिक्त स्थान की पूर्ति करें। Fill in the blanks with *Pañcamī Vibhakti* forms.]

| | | | | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|---|---|---|
| यथा– | (i) अभ्यास | = | | **अभ्यासात्** | **अभ्यासाभ्याम्** | **अभ्यासेभ्यः** |
| | (ii) ज्ञान | = | | ज्ञानात् | ---------- | ---------- |
| | (iii) ध्यान | = | | ---------- | ध्यानाभ्याम् | ---------- |
| | (iv) त्याग | = | | ---------- | ---------- | त्यागेभ्यः |
| | (v) सेवा | = | | **सेवायाः** | **सेवाभ्याम्** | **सेवाभ्यः** |
| | (vi) रमा | = | | ---------- | ---------- | रमाभ्यः |
| | (vii) लता | = | | ---------- | लताभ्याम् | ---------- |
| | (viii) निष्ठा | = | | ---------- | ---------- | निष्ठाभ्यः |

www.thearyasamaj.org


9. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

| | | | | | |
|---|---|---|---|---|---|
| यथा– | (i) | **फलस्य** | **त्यागः** | = | **फलत्यागः** |
| | (ii) | कर्मणः | त्यागः | = | ------------- |
| | (iii) | ----------- | ------- | = | मोहत्यागः |
| | (iv) | ----------- | ------- | = | घृणात्यागः |
| | (v) | कामस्य | त्यागः | = | ------------- |

www.thearyasamaj.org


## श्लोकः

**अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च ।**
**निर्ममो निरहङ्कारस्समदुःखसुखः क्षमी ॥8॥** (भ.गी. 12.13)

**सन्तुष्टस्सततं योगी यतात्मा दृढनिश्चयः ।**
**मय्यर्पितमनोबुद्धिर्यो मद्भक्तस्स मे प्रियः ॥9॥** (भ.गी. 12.14)

## पदच्छेदः

अद्वेष्टा सर्व–भूतानाम् मैत्रः करुणः एव च।
निर्ममः निरहङ्कारः सम–दुःख–सुखः क्षमी।
सन्तुष्टः सततम् योगी यतात्मा दृढ–निश्चयः।
मयि अर्पित–मनोबुद्धिः यः मत्–भक्तः सः मे प्रियः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अद्वेष्टा | अद्वेष्टृ–ऋ.पु.प्र.एक. समस्तम् | सततम् | अव्ययम् |
| सर्वभूतानाम् | अ. नपुं. षष्ठी बहु. समस्तम् | योगी | योगिन्–न. पुं. प्र. एक. |
| मैत्रः | अ. पुं. प्र. एक. | यतात्मा | यतात्मन्–न.पु.प्र.एक. समस्तम् |
| करुणः | अ. पुं. प्र. एक. | दृढनिश्चयः | अ. पुं. प्र. एक. समस्तम् |
| एव | अव्ययम् | मयि | अस्मद्–द.(सर्व.)त्रि.सप्त.एक. |
| च | अव्ययम् | अर्पितमनोबुद्धिः | इ. पुं. प्र. एक. समस्तम् |
| निर्ममः | अ. पुं. प्र. एक. समस्तम् | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| | | मद्भक्तः | अ. पुं. प्र. एक. समस्तम् |
| निरहङ्कारः | अ. पुं. प्र. एक. समस्तम् | सः | तद्–द. (सर्व.) पुं. प्र. एक. |
| समदुःखसुखः | अ. पुं. प्र. एक. समस्तम् | मे | अस्मद्–द.(सर्व.)त्रि.षष्ठी एक. (वैकल्पिकं रूपम्) |
| क्षमी | क्षमिन्–न. पुं. प्र. एक. | | |
| सन्तुष्टः | अ. पुं. प्र. एक. | प्रियः | अ. पुं. प्र. एक. |

## आकाङ्क्षा

**प्रियः (अस्ति)।**

क: प्रियः अस्ति? — सः प्रियः अस्ति।

सः कस्य प्रियः अस्ति? — सः मे प्रियः अस्ति।

www.thearyasamaj.org


| | |
|---|---|
| कीदृशः सः मे प्रियः? | यः मद्भक्तः सः मे प्रियः। |
| कीदृशः मद्भक्तः मे प्रियः? | अद्वेष्टा मद्भक्तः मे प्रियः। |
| पुनश्च कीदृशः मद्भक्तः? | मैत्रः मद्भक्तः। |
| पुनश्च कीदृशः? | करुणः। |
| केषां मैत्रः करुणः च? | सर्वभूतानां मैत्रः करुणः च। |
| पुनश्च कीदृशः? | निर्ममः। |
| पुनश्च कीदृशः? | निरहङ्कारः। |
| पुनश्च कीदृशः? | समदुःखसुखः। |
| पुनश्च कीदृशः? | क्षमी। |
| पुनश्च कीदृशः? | सन्तुष्टः। |
| कथं सन्तुष्टः? | सततं सन्तुष्टः। |
| पुनश्च कीदृशः? | योगी। |
| पुनश्च कीदृशः? | यतात्मा। |
| पुनश्च कीदृशः? | दृढनिश्चयः। |
| पुनश्च कीदृशः? | अर्पितमनोबुद्धिः। |
| कस्मिन् अर्पितमनोबुद्धिः मद्भक्तः मे प्रियः? | मयि (कृष्णे) अर्पितमनोबुद्धिः मद्भक्तः मे प्रियः। |

**अन्वयः**

यः मद्भक्तः अद्वेष्टा, सर्वभूतानां मैत्रः करुणः एव च, निर्ममः, निरहङ्कारः, समदुःखसुखः, क्षमी, सततं सन्तुष्टः, योगी, यतात्मा, दृढनिश्चयः, मयि अर्पितमनोबुद्धिः, स मे प्रियः (अस्ति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः मद्भक्तः | यः मदीयः भक्तः | जो मेरा भक्त | He who is my devotee |
| अद्वेष्टा | अद्वेष्टा | द्वेष रहित | who is not hateful |
| सर्वभूतानाम् | समस्तप्राणिनाम् | समस्त प्राणियों के प्रति | all creatures |
| मैत्रः | मित्रभावयुतः | मैत्रीयुक्त | friendly |
| करुणः | दयालुः | दयालु | compassionate |
| निर्ममः | स्वभावनारहितः | स्वामित्व भावना रहित | without mineness |
| निरहङ्कारः | अहं रहितः | अहंकार से रहित | without egoism |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| समदुःखसुखः | दुःखे सुखे च समभावयुतः | सुख-दुःख में समान भाव वाला | balanced in pleasure and pain |
| क्षमी | क्षमावान् | क्षमाशील | forgiving |
| सततं | निरन्तरं | सर्वदा | ever steady |
| सन्तुष्टः | सन्तृप्तः | सन्तुष्ट | contented |
| यतात्मा | आत्मसंयमी | आत्मसंयमी | self controlled |
| दृढनिश्चयः | सङ्कल्पयुतः | पक्के निश्चय-वाला | possessed of firm conviction |
| मयि अर्पित-मनोबुद्धिः | मनः बुद्धिं च मयि यः स्थिरीकृतवान् | मन और बुद्धि को जिसने मुझे समर्पित किया | mind and intellect decided to me |
| सः | तादृशः | वह | that person |
| मे प्रियः | मम इष्टः | मेरा प्रिय है | dear to me |

## भावार्थः

**संस्कृतम्** – हे अर्जुन! यः कस्यामपि परिस्थितौ विचलितो न भवति। यः ईर्ष्यारहितः, समस्तप्राणिनां कृते मित्रभावयुतः दयालुः च भवति। यः स्वबोधरहितः अहङ्काररहीनः, सुख-दुःखे समभावयुतः, क्षमाशीलः, निरन्तरं सन्तुष्टः, भगवद्भक्तौ रतः आत्मसंयमी, दृढसङ्कल्पवान् च भवति। यः सर्वदा स्वमनः बुद्धिं च मयि सन्निवेश्य तिष्ठति। एतादृशः मम भक्तः मम अतीव प्रियः वर्तते।

**हिन्दी** – हे अर्जुन! यह किसी भी परिस्थिति में विचलित नहीं होता है। यह ईर्ष्यालु नहीं होता है। सभी प्राणियों के प्रति उसमें मैत्री व करुणा होती है। यह स्वामित्व रहित अहंकार रहित, सुख और दुःख में समभाव वाला क्षमाशील, सर्वदा सन्तुष्ट व भगवान् की भक्ति में रत, आत्मसंयमी, दृढ़संकल्प वाला होता है। यह सर्वदा अपने मन व बुद्धि को मुझमें अर्पित किये रहता है। ऐसा मेरा भक्त मुझे अतीव प्रिय है।

**आंग्लम्** – He who hates no being, who is friendly and compassionate to all, who is free from the feeling of 'I and mine' even minded in pain and pleasure and for bearing, Even content steady in meditation, self controlled and possessed of firm conviction with mind and intellect fixed on me, he my devotee is dear to me.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

करुण एव – करुणः + एव (विसर्गसन्धिः)

www.thearyasamaj.org


निर्ममो निरहङ्कारः - निर्ममः + निरहङ्कारः (विसर्गसन्धिः)

यतात्मा - यत + आत्मा (दीर्घसन्धिः)

मय्यर्पितमनो-बुद्धिर्यो मद्भक्तः - मयि + अर्पितमनः + बुद्धिः + यः + मत् + भक्तः

(यण्सन्धिः) (विसर्गसन्धिः) (जश्त्वसन्धिः)

स मे - सः + मे (विसर्गसन्धिः)

**(ख) समासः**

| | | |
|---|---|---|
| अद्वेष्टा | - | न द्वेष्टा अद्वेष्टा (नञ् तत्पुरुषः) |
| सर्वभूतानाम् | - | सर्वाणि च तानि भूतानि सर्वभूतानि (कर्मधारयः) तेषाम् |
| निर्ममः | - | निर्गतः मम यस्य सः निर्ममः (बहुव्रीहिः) |
| निरहङ्कारः | - | निर्गतः अहङ्कारः यस्मात् सः निरहङ्कारः (बहुव्रीहिः) |
| समदुःखसुखः | - | दुःखं च सुखं च दुःखसुखे (द्वन्द्वः) समे दुःखसुखे यस्य सः समदुःखसुखः (बहुव्रीहिः) |
| यतात्मा | - | यतः आत्मा यस्य सः यतात्मा (बहुव्रीहिः) |
| दृढनिश्चयः | - | दृढः निश्चयः यस्य सः दृढनिश्चयः (बहुव्रीहिः) |
| अर्पितमनोबुद्धिः | - | मनश्च बुद्धिश्च मनोबुध्दी (द्वन्द्वः) अर्पिते मनोबुद्धी येन सः अर्पितमनोबुद्धिः (बहुव्रीहिः) |
| मद्भक्तः | - | मम भक्तः मद्भक्तः (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| द्वेष्टा | - | द्विष् + तृच्-द्वेष्टृ |
| सन्तुष्टः | - | सम् + तुष् + क्त |
| निश्चयः | - | निस् + चि + अच् |
| अर्पित | - | अर्प् + क्त |
| बुद्धिः | - | बुध् + क्तिन् |
| भक्तः | - | भज् + क्त |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| मैत्रः | - | मित्र + अण् |
| क्षमी | - | क्षमा अस्य अस्ति; क्षमा + इनि - क्षमिन् |
| योगी | - | योगः अस्य अस्ति; योग + इनि - योगिन् |

www.thearyasamaj.org


अवधेयम्

(i) **विशेषणविशेष्यविषये**

(ii) **बहुव्रीहिसमासविषये**

## अभ्यासः – 8

## श्लोकः - 8, 9

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित शब्द से रिक्त स्थान भरें। Fill in the blanks with appropriate word according to the verse.]

------ --------------- मैत्रः ----------- ----- च।
निर्ममो ------------------ ----------------- क्षमी।।
सन्तुष्टः सततं --------- ----------------- दृढनिश्चयः।
----------- मनोबुद्धिर्यो ----------- --- मे ---------।।

2. **यथानिर्देशं श्लोकाभ्यां पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोकों से पदों को चुनकर लिखें। Write the words from the verses as directed]

(क) विशेषणपदम् – (i) ---------- (ii) ----------
(ख) प्रथमान्तपदम् – (i) ---------- (ii) ----------
(ग) अव्ययपदम् – (i) ---------- (ii) ---------- (iii) --------

3. **सन्धिं कुरुत–**

[सन्धि करें। Join the *Sandhi*.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) | मयि | + | अर्पितमनः | = | **मय्यर्पितमनः** |
| | (ii) | यदि | + | अपि | = | --------- |
| | (iii) | इति | + | अत्र | = | --------- |
| | (iv) | इति | + | आदि | = | --------- |
| | (v) | सति | + | अपि | = | --------- |

www.thearyasamaj.org


4. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये शब्दों के प्रातिपदिक लिखें। Write the nominal stem of the words.]

**यथा–** (i) अद्वेष्टा = **अद्वेष्टृ**

(ii) कर्ता = ------------

(iii) निर्माता = ------------

(iv) दाता = ------------

(v) स्रष्टा = ------------

5. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद करके लिखें। Disjoin the *Sandhi*.]

**यथा–** (i) यतात्मा = **यत + आत्मा**

(ii) धर्मात्मा = --------------------

(iii) हिमालयः = --------------------

(iv) देवालयः = --------------------

(v) पूर्णाहुतिः = --------------------

6. **यथोचितं योजयत–**

[सही मेल करें। Match with the appropriate one.]

**यथा–** (i) **सर्वभूतानाम्** — (क) स. नपुं. प्र. एक.

(ii) करुणः — (ख) द. (सर्व.) सप्त. एक

(iii) क्षमी — (ग) अ. पुं. प्र. एक

(iv) मनः — (घ) द. (सर्व.) पुं. प्र. एक.

(v) सः — (ङ) **अ. नपुं. षष्ठी बहु.**

(vi) मयि — (च) न. पुं. प्र. एक

7. **उचितं पदं मेलयत–**

[उचित पद को मिलायें। Match with the appropriate one.]

**यथा–** (i) **अद्वेष्टा** — (क) समस्तप्राणिनाम्

(ii) करुणः — (ख) स्नेही

(iii) सर्वभूतानाम् — (ग) ईश्वरे रतः

(iv) प्रियः — (घ) **द्वेषरहितः**

(v) योगी — (ङ) दयालुः

www.thearyasamaj.org


8. **यथोचितं समस्तं पदं विग्रहवाक्यं वा लिखत–**

[समस्त पद या विग्रह वाक्य लिखें। Write the compound word or the analytical sentence in the blank spaces.]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **यथा–** | (i) | **दृढनिश्चयः** | = | **दृढः** | **निश्चयः** | **यस्य** | **सः** |
| | (ii) | यतात्मा | = | ---------- | ---------- | ------- | ------ |
| | (iii) | दृढव्रतः | = | ---------- | ---------- | ------- | ------ |
| | (iv) | ---------- | = | दृढः | संकल्पः | यस्य | सः |
| | (v) | प्रियदर्शनः | = | ---------- | ---------- | ------- | ------ |
| | (vi) | पीताम्बरः | = | ---------- | ---------- | ------- | ------ |

9. **विग्रहवाक्यम् उचितेन समस्त-पदेन योजयत–**

[विग्रह वाक्य को उचित समस्तपद से जोड़ें। Match the analytical sentence with appropriate compound word.]

| | | | |
|---|---|---|---|
| **यथा–** (i) | **कृतः निश्चयः येन सः** | (क) | लब्धधनः |
| (ii) | अर्पिता बुद्धिः येन सः | (ख) | जितक्रोधः |
| (iii) | जितानि इन्द्रियाणि येन सः | (ग) | समदुःखसुखः |
| (iv) | जातः रोषः यस्य सः | (घ) | अर्पितबुद्धिः |
| (v) | लब्धं धनं येन सः | (ङ) | **कृतनिश्चयः** |
| (vi) | समं दुःखसुखं यस्य सः | (च) | अर्पितमनाः |
| (vii) | अर्पितं मनः येन सः | (छ) | महायशः |
| (viii) | महद् यशः यस्य सः | (ज) | दत्तचित्तः |
| (ix) | दत्तं चित्तं येन सः | (झ) | जातरोषः |
| (x) | जितः क्रोधः येन सः | (ञ) | जितेन्द्रियः |

10. **श्लोके आगतेषु भक्तस्य विशेषणेषु एकम् एकं विशेषणं रिक्ते स्थाने योजयत–**

[श्लोक में आये भक्त के विशेषणों में एक-एक विशेषण रिक्त स्थान में भरें। Fill in the blanks with the qualifiers of *Bhakta* appearing in the verse.]

**यथा–** (i) **अद्वेष्टा** मद्भक्तः मे प्रियः।

(ii) ------------------- मद्भक्तः मे प्रियः।

(iii) ------------------- मद्भक्तः मे प्रियः।

(iv) ------------------- मद्भक्तः मे प्रियः।

(v) ------------------- मद्भक्तः मे प्रियः।

www.thearyasamaj.org


11. **अधोलिखितान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गए शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the words given below.]

(क) अद्वेष्टा (ख) करुणः (ग) क्षमी (घ) मे (ङ) सततम्

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

---------------------------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः ।**
**हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः ॥10॥** (भ.गी.12.15)

## पदच्छेदः

यस्मात् न उत्-विजते लोकः लोकात् न उत्-विजते च यः।
हर्षामर्ष-भयोद्वेगैः मुक्तः यः सः च मे प्रियः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यस्मात् | यद्–द. (सर्व.) पुं. पं. एक | हर्षामर्षभयोद्वेगैः | अ. पुं. तृ. बहु. समस्तम् |
| न | अव्ययम् | मुक्तः | अ. पुं. प्र. एक. |
| उद्विजते | उत् + विज्–कर्तरि आत्मनेपदे लट् प्रपु. एक. | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| लोकः | अ. पुं. प्र. एक. | सः | तद्–द. (सर्व.) पुं. प्र. एक. |
| लोकात् | अ. पुं. पं. एक. | | |
| न | अव्ययम् | च | अव्ययम् |
| उद्विजते | उत् + विज्–कर्तरि आत्मनेपदे लट् प्रपु. एक. | मे | अस्मद्–द. (सर्व.) त्रि. षष्ठी एक. (वैकल्पिकं रूपम्) |
| च | अव्ययम् | | |
| यः | यद्–द. (सर्व.) पुं. प्र. एक. | प्रियः | अ. पुं. प्र. एक. |

## आकाङ्क्षा

**प्रियः (अस्ति।)**

| | |
|---|---|
| कः प्रियः अस्ति? | सः प्रियः अस्ति। |
| सः कस्य प्रियः अस्ति? | सः मे प्रियः अस्ति। |
| कीदृशः सः मे प्रियः अस्ति? | यः मुक्तः सः मे प्रियः (अस्ति)। |
| यः कैः मुक्तः मे प्रियः? | यः हर्षामर्षभयोद्वेगैः मुक्तः सः मे प्रियः। |
| अपि च कः मे प्रियः? | यः न उद्विजते। |
| यः कस्मात् न उद्विजते? | यः लोकात् न उद्विजते। |
| अपि च कः मे प्रियः? | यस्मात् लोकः (च) न उद्विजते। |

www.thearyasamaj.org


## अन्वयः

यस्मात् लोकः न उद्विजते, यः लोकात् न उद्विजते च, यः च हर्षामर्षभयोद्वेगैः मुक्तः सः मे प्रियः (अस्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यस्मात् | यस्मात् जनात् | जिस मनुष्य से | From whom |
| लोकः | जीवलोकः | प्राणी को | the world |
| न उद्विजते | उद्विग्नः न भवति | उद्वेग नहीं होता | not agitated |
| यः | मनुष्यः | जो मनुष्य | who |
| लोकात् | प्राणिनः | किसी प्राणी से | by the world |
| न उद्विजते च | उद्वेगो न भवति | उद्वेग नहीं होता | not afflict |
| यः च हर्षा-मर्षभयोद्वेगैः | यः मनुष्यः प्रसाद-ईर्ष्या-भीतिः इत्येतैः विकारैः | जो प्रसन्नता, ईर्ष्या, भय और चिन्ता से | from joy, envy, fear and anxiety |
| मुक्तः | रहितः | रहित है | freed |
| सः | तादृशः मनुष्यः | वह मनुष्य | he |
| मे प्रियः | मम अभीष्टः | मेरा प्रिय है। | dear to me |

## भावार्थः

**संस्कृतम्**—यस्मात् मनुष्यात् कोऽपि प्राणी उद्विग्नः न भवति, यश्च मनुष्यः स्वयमपि अन्यस्मात् प्राणिनः उद्विग्नः न भवति। यश्च हर्षेण, ईर्ष्यया, भीत्या चिन्तया च रहितः भवति, सः भक्तः ममः प्रियो भवति।

**हिन्दी**—जिस मनुष्य से कोई भी प्राणी उद्विग्न नहीं होता और जो मुनष्य स्वयं किसी अन्य प्राणी से भी उद्विग्न नहीं होता। साथ ही जो हर्ष, ईर्ष्या, भय और चिन्ता से मुक्त हो चुका है, वह भक्त मेरा प्रिय है।

**आंग्लम्**—He by whom the world is not afflicted and whom the world can not afflict, he who free from joy, anger, fear and anxiety he is dear to me.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

यस्मान्नोद्विजते – यस्मात् + न + उद्विजते
(अनुनासिकसन्धिः) (गुणसन्धिः)

लोकान्नोद्विजते – लोकात् + न + उद्विजते
(अनुनासिकसन्धिः) (गुणसन्धिः)

हर्षामर्षभयोद्वेगैर्मुक्तः – हर्ष + अमर्ष-भय + उद्वेगैः + मुक्तः
(दीर्घसन्धिः) (गुणसन्धिः) (विसर्गसन्धिः)

स च – सः + च (विसर्गसन्धिः)

**(ख) समासः**

हर्षामर्षभयोद्वेगैः – हर्षश्च, अमर्षश्च भयं च उद्वेगश्च हर्षामर्षभयोद्वेगाः (द्वन्द्वसमासः) तैः

अमर्षः – न मर्षः अमर्षः (नञ् तत्पुरुषः)

**(ग) कृदन्तः**

लोकः – लोक् + घञ्

हर्ष – हृष् + घञ्

अमर्ष – अ–मृष् + घञ्

भय – भी + अच्

उद्वेगैः – उत् + विज् + घञ्

मुक्तः – मुच् + क्त

**अवधेयम्**

**गुणसन्धिविषये**

www.thearyasamaj.org



# अभ्यासः – 9

## श्लोकः - 10

1. **उत्तरं लिखत–**

[उत्तर लिखें। Answer the questions.]

(i) **कीदृशः भक्तः कृष्णस्य प्रियः?**

------------------------------------------------------------------------

------------------------------------------------------------------------

(ii) **कः जनान् विचलितान् न करोति?**

------------------------------------------------------------------------

------------------------------------------------------------------------

(iii) **कृष्णस्य अत्यन्तं प्रियः कः अस्ति?**

------------------------------------------------------------------------

------------------------------------------------------------------------

2. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

---------- लोकः ---- ------- यः ------------- ---- उद्विजते च। ---
---- ---------------- ------ सः मे प्रियः (अस्ति)।

3. **प्रदत्तानां पदानां परिचयं लिखत–**

[दिये हुए पदों का परिचय लिखें। Write the nominal stem of the given words.]

**यथा–** (i) यस्मात् = **यद्–द. (सर्व.) पं. एक.**

(ii) लोकः = ------------------------------

(iii) लोकात् = ------------------------------

(iv) यः = ------------------------------

(v) मे = ------------------------------

(vi) सः = ------------------------------

(vii) प्रियः = ------------------------------

www.thearyasamaj.org



4. **श्लोकात् अव्ययानि चित्वा लिखत–**

[श्लोक में से अव्ययों को चुनकर लिखें। Write the *Avyaya* words from the verse.]

(i) -------- (ii) ------- (iii) --------

5. **उचितपदेन योजयत–**

[उचित पद से मेल करें। Match with the appropriate words.]

**यथा–**

| | | | |
|---|---|---|---|
| (i) | **लोकः** | (क) | मदीयः |
| (ii) | अमर्षः | (ख) | रहितः |
| (iii) | मुक्तः | (ग) | उद्विग्नः भवति |
| (iv) | मे | (घ) | ईर्ष्या |
| (v) | उद्विजते | (ङ) | **जनः** |

6. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद कर लिखें। Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| (i) | नोद्विजते | = | **न** | + | **उद्विजते** |
| (ii) | भयोद्वेगः | = | ---------- | + | --------- |
| (iii) | हितोपदेशः | = | ---------- | + | --------- |
| (iv) | जलोर्मिः | = | ---------- | + | --------- |
| (v) | शुद्धोदकम् | = | ---------- | + | --------- |
| (vi) | क्षीरोदधिः | = | ---------- | + | --------- |

7. **उदाहरणानुसारं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

**यथा–** (i) **हर्षेण** मुक्तः जनः ईश्वरस्य प्रियः भवति।

(ii) ---------- मुक्तः जनः ईश्वरस्य प्रियः भवति।

(iii) ---------- मुक्तः जनः ईश्वरस्य प्रियः भवति।

(iv) ---------- मुक्तः जनः ईश्वरस्य प्रियः भवति।

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि पृथक् पत्रे लिखत–**

[दिये गए शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences by using the words given here.]

(क) यद् (पुं.) (ख) उद्वेगः (ग) मे (घ) उद्विजते (ङ) लोकः

www.thearyasamaj.org


## श्लोकः

**अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।**
**सर्वारम्भपरित्यागी यो मद्भक्तस्स मे प्रियः ॥11॥** (भ.गी. 12.16)

## पदच्छेदः

अनपेक्षः शुचिः दक्षः उदासीनः गत–व्यथः।
सर्व–आरम्भ–परित्यागी यः मत्–भक्तः सः मे प्रियः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अनपेक्षः | अ. पुं. प्र. एक. समस्तम् | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| शुचिः | इ. पुं. प्र. एक. विशेषणम् | मद्भक्तः | अ. पुं. प्र. एक. विशेषणम् |
| दक्षः | अ. पुं. प्र. एक. विशेषणम् | सः | तद्–द. (सर्व.) पुं. प्र. एक. |
| उदासीनः | अ. पुं. प्र. एक. विशेषणम् | मे | अस्मद्–द. (सर्व.) पुं. षष्ठी एक. वैकल्पिकं रूपम् |
| गतव्यथः | अ. पुं. प्र. एक. समस्तम् | | |
| सर्वारम्भपरित्यागी | सर्वारम्भपरित्यागिन्–न. पुं. प्र. एक. समस्तम् | प्रियः | अ. पुं. प्र. एक. |

## आकाङ्क्षा

**प्रियः (अस्ति)।**

| | |
|---|---|
| कः प्रियः (अस्ति)? | सः प्रियः (अस्ति)। |
| सः कस्य प्रियः (अस्ति)? | सः मे प्रियः (अस्ति)। |
| कीदृशः यः मद्भक्तः सः मे प्रियः (अस्ति)? | यः मद्भक्तः सः मे प्रियः (अस्ति)। |
| कीदृशः सः मे प्रियः अस्ति? | यः अनपेक्षः सः मे प्रियः (अस्ति)। |
| कीदृशः मद्भक्तः मे प्रियः? | यः शुचिः मद्भक्तः सः मे प्रियः। |
| पुनश्च कीदृशः मद्भक्तः मे प्रियः? | यः दक्षः मद्भक्तः सः मे प्रियः। |
| पुनश्च कीदृशः मद्भक्तः मे प्रियः? | यः उदासीनः मद्भक्तः सः मे प्रियः। |
| पुनश्च कीदृशः मद्भक्तः मे प्रियः? | यः गतव्यथः मद्भक्तः सः मे प्रियः। |
| पुनश्च कीदृशः मद्भक्तः मे प्रियः? | यः सर्वारम्भपरित्यागी मद्भक्तः सः मे प्रियः। |

www.thearyasamaj.org


## अन्वयः

अनपेक्षः, शुचिः, दक्षः, उदासीनः, गतव्यथः, सर्वारम्भपरित्यागी यः मद्भक्तः सः मे प्रियः (अस्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अनपेक्षः | इच्छारहितः | इच्छा रहित | Free from wants |
| शुचिः | पवित्रः | पवित्र | pure |
| दक्षः | चतुरः | चतुर | expert |
| उदासीनः | तटस्थः | उदासीन | unconcerned |
| गतव्यथः | व्यथारहितः | व्यथा से रहित | untroubled |
| सर्वारम्भपरित्यागी | समस्तनूतनकर्मणाम् आरम्भस्य परित्यागी | सभी नए कर्मों के आरम्भ का त्यागी | renouncing all undertakings |
| यः | मनुष्यः | जो मनुष्य | he who |
| मद्भक्तः | मदीयः भक्तः | मेरा भक्त | my devotee |
| सः | तादृशः मनुष्यः | वह मनुष्य | he |
| मे प्रियः | मम अभीष्टः | मेरा प्रिय है | dear to me |

## भावार्थः

**संस्कृतम्** – इच्छाविहीनः, बाह्याभ्यन्तरः पावनः, चतुरः, तटस्थः, व्यथाविहीनः, सर्वेषां नूतनकर्माणां प्रारम्भस्य त्यागी, यः मनुष्यः मदीयः भक्तः अस्ति, सः मम अतीव प्रियः अस्ति।

**हिन्दी** – जो मनुष्य इच्छारहित है; बाहर–भीतर से पवित्र, चतुर, तटस्थ, समस्त व्यथाओं से हीन, सभी नए कर्मों के प्रारम्भ का त्यागी तथा मेरी भक्ति करता है, वह मुझे प्रिय है।

**आंग्लम्** – He who has no wants, who is pure and prompt, unconcerned, untroubled and who is selfless in all his undertakings, he who thus devoted to me is dear to me.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

शुचिर्दक्ष उदासीनो गतव्यथः – शुचिः + दक्षः + उदासीनः + गतव्यथः

(विसर्गसन्धिः)

www.thearyasamaj.org



| | | |
|---|---|---|
| यो मद्भक्तः | – | यः + मद्भक्तः (विसर्गसन्धिः) |
| स मे | – | सः + मे (विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| अनपेक्षः | – | अविद्यमाना अपेक्षः यस्य सः अनपेक्षः (बहुव्रीहिः) |
| गतव्यथः | – | गता व्यथा यस्य सः गतव्यथः (बहुव्रीहिः) |
| मद्भक्तः | – | मम भक्तः (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| अपेक्षा | – | अप + ईक्ष् + अ + टाप् |
| शुचिः | – | शुच + कित् |
| दक्षः | – | दक्ष् + अच् |
| उदासीनः | – | उद् + आस् + शानच् |
| गत | – | गम् + क्त |
| व्यथ | – | व्यथ् + अङ् + टाप् |
| आरम्भ | – | आ + रभ् + घञ् (मुम् आगमः) |
| परित्यागी | – | परि + त्यज् + घिनुण् |
| भक्तः | – | भज् + क्त |
| प्रियः | – | प्री + क |
| सर्वारम्भपरित्यागी | – | सर्वान् आरम्भान् परित्यक्तुं शीलम् अस्य = सर्वारम्भपरित्यज् + घिनुण् |

**अवधेयम्**

**विसर्गसन्धिविषये**

## अभ्यासः - 10

## श्लोकः - 11

1. **श्लोकानुसारम् उचितपदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार सही पद से रिक्त स्थान भरें। Fill in the blanks with appropriate word according to the verse.]

अनपेक्षः ------------ उदासीनो ----------।
------------ यो --------------- मे प्रियः॥

www.thearyasamaj.org


2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोक से पदों को चुनकर लिखें। Write the words from the verse as directed.]

(क) विशेषणपदम् - (i) ---------- (ii) ---------- (iii) ----------

(ख) अकारान्तपदम् - (i) ---------- (ii) ----------

(ग) समस्तपदम् - (i) ---------- (ii) ----------

3. **सन्धिं कृत्वा नाम लिखत–**

[सन्धि करके नाम लिखें। Make the euphonic combination and name it.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** (i) | शुचिः | + | दक्षः | = | **शुचिर्दक्षः** | **विसर्गसन्धिः** |
| (ii) | हरिः | + | देवः | = | ---------------- | ---------- |
| (iii) | मुनिः | + | वदति | = | ---------------- | ---------- |
| (iv) | यतिः | + | गच्छति | = | ---------------- | ---------- |
| (v) | उदासीनः | + | गतव्यथः | = | **उदासीनो गतव्यथः** | **विसर्गसन्धिः** |
| (vi) | बालः | + | गतः | = | ---------------- | ---------- |
| (vii) | मयूरः | + | नृत्यति | = | ---------------- | ---------- |
| (viii) | यः | + | मद्भक्तः | = | ---------------- | ---------- |
| (ix) | सन्तुष्टः | + | येन | = | ---------------- | ---------- |
| (x) | मत्कर्मपरमः | + | भव | = | ---------------- | ---------- |

4. **उत्तरं प्रदत्त–**

[उत्तर दें। Answer the questions.]

(i) मे प्रियः इति कः वदति? ------------------------------------

(ii) कः 'मे प्रियः'? ------------------------------------

(iii) गतव्यथः कस्य भक्तः? ------------------------------------

5. **पदपरिचयं प्रदत्त–**

[पद परिचय दें। Identify the words.]

| | | |
|---|---|---|
| **यथा–** (i) | अथ | **अव्ययम्** |
| (ii) | अनपेक्षः | -------------- |
| (iii) | शुचिः | -------------- |
| (iv) | गतव्यथः | -------------- |
| (v) | मद्भक्तः | -------------- |

www.thearyasamaj.org


6. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

------- शुचिः ---------- ---------- गतव्यथः -------------------- -----
मद्भक्तः ---- मे --------------------।

7. **श्लोकानुसारम् उचितविशेषणपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार उचित विशेषण से रिक्त स्थान को भरें। Fill in the blanks with qualifier from the verse.]

यथा– (i) **अनपेक्षः** मद्भक्तः मे प्रियः अस्ति।
(ii) ------------- मद्भक्तः मे प्रियः अस्ति।
(iii) ------------- मद्भक्तः मे प्रियः अस्ति।
(iv) ------------- मद्भक्तः मे प्रियः अस्ति।
(v) ------------- मद्भक्तः मे प्रियः अस्ति।

8. **समस्तपदस्य विग्रहं लिखत–**

[समस्तपद का विग्रह लिखें। Write the analytical sentence of the compound words.]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| यथा– | (i) | अनपेक्षः = | **अविद्यमाना** | **अपेक्षा** | **यस्य** | **सः** |
| | (ii) | अपुत्रः = | -------- | ------ | ------ | ------ |
| | (iii) | अबलः = | -------- | ------ | ------ | ------ |
| | (iv) | अधनः = | -------- | ------ | ------ | ------ |

9. **उचितपदेन योजयत–**

[उचित पद से मिलाएँ। Match with the appropriate word.]

| | | |
|---|---|---|
| यथा– (i) | **अनपेक्षः** | (क) चतुरः |
| (ii) | शुचिः | (ख) पीडारहितः |
| (iii) | उदासीनः | (ग) **इच्छारहितः** |
| (iv) | दक्षः | (घ) पवित्रः |
| (v) | गतव्यथः | (ङ) तटस्थः |

www.thearyasamaj.org


## श्लोकः

**यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।**
**शुभाशुभपरित्यागी भक्तिमान् यस्स मे प्रियः ॥12॥** (भ.गी. 12.17)

## पदच्छेदः

यः न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभ–अशुभ–परित्यागी भक्तिमान् यः सः मे प्रियः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यः | यद्–द (सर्व.)एक. समस्तम् | भक्तिमान् | भक्तिमत्–त. पुं. प्र. एक. |
| न | अव्ययम् | यः | यद्–द. (सर्व.) |
| हृष्यति | हृष्–कर्तरि लट् प्रपु. एक. | | पुं. प्र. एक. |
| द्वेष्टि | द्विष्–कर्तरि लट् प्रपु. एक. | सः | तद्–द. (सर्व.) |
| शोचति | शुच्–कर्तरि लट् प्रपु. एक. | | पुं. प्र. एक. |
| काङ्क्षति | काङ्क्ष्–कर्तरि लट् प्रपु. एक. | मे | अस्मद्–द. (सर्व.) पुं. प्र. एक. |
| शुभाशुभपरित्यागी | शुभाशुभपरित्यागिन्– न. पुं. प्र. एक. | | (वैकल्पिकं रूपम्) |
| | | प्रियः | अ. पुं. प्र. एक. |

## आकाङ्क्षा

**प्रियः (अस्ति)।**

| | |
|---|---|
| कः प्रियः अस्ति? | सः प्रियः अस्ति। |
| सः कस्य प्रियः अस्ति? | सः मे प्रियः अस्ति। |
| कीदृशः सः मे प्रियः? | यः न हृष्यति सः मे प्रियः। |
| पुनश्च कीदृशः मे प्रियः? | यः न द्वेष्टि सः मे प्रियः। |
| पुनश्च कीदृशः मे प्रियः? | यः नः शोचति सः मे प्रियः। |
| पुनश्च कीदृशः मे प्रियः? | यः न काङ्क्षतिः सः मे प्रियः। |
| पुनश्च कीदृशः मे प्रियः? | यः शुभाशुभपरित्यागी सः मे प्रियः। |
| पुनश्च कीदृशः मे प्रियः? | यः भक्तिमान् सः मे प्रियः। |

www.thearyasamaj.org


## अन्वयः

यः न हृष्यति, न द्वेष्टि, न शोचति, न काङ्क्षति यः शुभाशुभपरित्यागी, भक्तिमान्, सः मे प्रियः (अस्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | यः जनः | जो व्यक्ति | Who |
| न हृष्यति | न प्रसीदति | हर्षित नहीं होता | not rejoices |
| न द्वेष्टि | द्वेषं न करोति | द्वेष नहीं करता | not hates |
| न शोचति | शोकं न करोति | शोक नहीं करता | not grieves |
| न काङ्क्षति | न कामयते | किसी प्रकार की कामना नहीं करता | not desires |
| शुभाशुभ-परित्यागी | शुभाशुभकर्मसु रागद्वेषादिकं परित्यजति | शुभाशुभ कर्मों में राग-द्वेष को छोड़ देता है | renouncing good and evil |
| भक्तिमान् | उपासकः | मेरी उपासना में रत | full of devotion |
| सः | सः जनः | वह व्यक्ति | he |
| मे प्रियः | मम अभीष्टः | मेरा प्रिय है | dear to me |

## भावार्थः

**संस्कृतम्** – यः जनः हर्षद्वेषाभ्यां रहितः भवति, शोकं न करोति, न वा कामनां करोति। यश्च जनः शुभाशुभकर्मसु रागद्वेषादिकं परित्यजति, मयि भक्तिं करोति, सः जनः मम प्रियः (अस्ति)।

**हिन्दी** – जो व्यक्ति कभी भी हर्ष नहीं करता, द्वेष नहीं करता, शोक नहीं करता व न कोई कामना ही करता है। जो व्यक्ति शुभाशुभ कर्मों में राग-द्वेष आदि को छोड़ देता है तथा मुझमें भक्ति करता है, वही व्यक्ति मेरा प्रिय है।

**आंग्लम्** – He who neither rejoices nor hates, nor grieves nor desires, renouncing good and evil, full of devotion, he is dear to me.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

यो न – यः + न (विसर्गसन्धिः)

www.thearyasamaj.org


| | | |
|---|---|---|
| स मे | - | सः + मे (विसर्गसन्धिः) |
| शुभाशुभपरित्यागी | - | शुभ + अशुभपरित्यागी (दीर्घसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| शुभाशुभपरित्यागी | - | शुभं च अशुभं च शुभाशुभे (द्वन्द्वः) |
| | | शुभाशुभयोः परित्यागी (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| शुभ | - | शुभ् + क |
| भक्ति | - | भज् + क्तिन् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| भक्तिमान् | - | भक्तिः अस्य अस्ति इति, भक्ति + मतुप्-भक्तिमत् |

## अभ्यासः - 11

### श्लोकः - 12

1. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान भरें। Fill in the blanks as per the verse.]

----- ---- हृष्यति --- ------ न ------- न ----------।
शुभाशुभपरित्यागी -------------- -------- मे --------- ॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोक से पदों को चुनकर लिखें। Write the words from the verse as directed.]

(क) क्रियापदम् - (i) -------- (ii) --------(iii) ------- (iv) -------

(ख) प्रथमान्तपदम् - (i) ---------- (ii) ----------

3. **पदपरिचयं प्रदत्त–**

[पदों का परिचय दें। Identify the words.]

यथा– (i) हृष्यति = **हृष्–कर्तरि प्रयोगे लट् प्रपु. एक.**

(ii) द्वेष्टि = ----------------------------

(iii) शोचति = ----------------------------

(iv) काङ्क्षति = ----------------------------

www.thearyasamaj.org



4. **प्रस्तुतश्लोकस्य अन्वयं पूरयत–**

[प्रस्तुत श्लोक का अन्वय पूरा करें। Complete the construction of the given verse.]

----- न ----- -- द्वेष्टि ---- ----- ---- -------, यः शुभाशुभ ------- भक्तिमान् --- -------- प्रियः--------।

5. **उदाहरणानुसारं रिक्तं स्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान को पूरा करें। Fill in the blanks as per example.]

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| यथा– | (i) | भक्तिमान् | = | **भक्तिः** | **अस्य** | **अस्ति** | **इति** |
| | (ii) | शक्तिमान् | = | ------ | ------ | ------ | ------ |
| | (iii) | ------ | = | बुद्धिः | अस्य | अस्ति | इति |
| | (iv) | ------ | = | श्रीः | अस्य | अस्ति | इति |
| | (v) | धीमान् | = | ------ | ------ | ------ | ------ |
| | (vi) | द्युतिमान् | = | ------ | ------ | ------ | ------ |
| | (vii) | ------ | = | गतिः | अस्य | अस्ति | इति |
| | (viii) | धृतिमान् | = | ------ | अस्य | अस्ति | इति |

6. **उचितपदेन योजयत–**

[सही पद से मेल करें। Match with appropriate words.]

| | | | |
|---|---|---|---|
| यथा– | (i) **शोचति** | (क) काङ्क्षा |
| | (ii) उद्विजते | (ख) हर्षः |
| | (iii) काङ्क्षति | (ग) उद्वेगः |
| | (iv) द्वेष्टि | (घ) **शोकः** |
| | (v) हृष्यति | (ङ) द्वेषः |

7. **श्लोकानुसारं ईश्वरप्रियस्य लक्षणानि लिखत–**

[श्लोक के अनुसार 'ईश्वर प्रिय' के लक्षण लिखें। Write the features of '*Īśwara Priya*' according to the verse.]

| | | | |
|---|---|---|---|
| यथा– | (क) ईश्वरस्य प्रियः | **हर्षं** | न करोति। |
| | (ख) ईश्वरस्य प्रियः | -------------- | न करोति। |
| | (ग) ईश्वरस्य प्रियः | -------------- | न करोति। |
| | (घ) ईश्वरस्य प्रियः | -------------- | न करोति। |
| | (ङ) ईश्वरस्य प्रियः शुभाशुभस्य | -------------- | करोति। |
| | (च) ईश्वरस्य प्रियः ईश्वरे | -------------- | करोति। |

www.thearyasamaj.org


8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों से कुछ वाक्य लिखें। Write some sentences using the following words.]

(क) हृष् (कर्तरि लट्)   (ख) शुच् (कर्तरि लट्)   (ग) भक्तिमत्   (घ) तद् (पुं.)

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**समः शत्रौ च मित्रे च तथा मानापमानयोः ।**
**शीतोष्णसुखदुःखेषु समस्सङ्गविवर्जितः ॥13॥**
**तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित् ।**
**अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥14॥** (भ.गी. 12.18, 19)

**पदच्छेदः**

समः शत्रौ च मित्रे च तथा मान–अपमानयोः।
शीत–उष्ण–सुख–दुःखेषु समः सङ्ग–विवर्जितः॥
तुल्य–निन्दा–स्तुतिः मौनी सन्तुष्टः येन केनचित्।
अ–निकेतः स्थिर–मतिः भक्तिमान् मे प्रियः नरः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| समः | अ. पुं. प्र. एक. | तुल्यनिन्दास्तुतिः | इ. पुं. प्र. एक. समस्तम् |
| शत्रौ | उ. पुं. सप्त. एक. | मौनी | मौनिन्–न. पुं. प्र. एक. |
| च | अव्ययम् | सन्तुष्टः | अ. पुं. प्र. एक. |
| मित्रे | अ. नपुं. सप्त. एक. | येन केनचित् | अव्ययम्, क्रियाविशेषणम् |
| च | अव्ययम् | अनिकेतः | अ. पुं. प्र. एक. समस्तम् |
| तथा | तद्धितान्तम् अव्ययम् | स्थिरमतिः | इ. पुं. प्र. एक. समस्तम् |
| मानापमानयोः | अ. नपुं. सप्त. द्वि. समस्तम् | भक्तिमान् | भक्तिमत्–त. पुं. प्र. एक. |
| शीतोष्णसुख–दुःखेषु | अ. नपुं. सप्त. बहु. समस्तम् | मे | अस्मद्–द.(सर्व.)पुं. षष्ठी. एक. (वैकल्पिकं रूपम्) |
| समः | अ. पुं. प्र. एक. | प्रियः | अ. पुं. प्र. एक. |
| सङ्गविवर्जितः | अ. पुं. प्र. एक. समस्तम् | नरः | अ. पुं. प्र. एक. |

**आकाङ्क्षा**

**प्रियः (अस्ति)।**

| | |
|---|---|
| कस्य प्रियः? | मे प्रियः। |
| कः मे प्रियः? | नरः मे प्रियः। |
| कीदृशः नरः मे प्रियः? | भक्तिमान् नरः मे प्रियः। |

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च कीदृशः नरः मे प्रियः? | समः नरः मे प्रियः। |
| कुत्र समः नरः मे प्रियः? | शत्रौ च मित्रे च समः नरः मे प्रियः। |
| पुनश्च कुत्र समः नरः मे प्रियः? | तथा मानापमानयोः समः नरः मे प्रियः। |
| पुनश्च कुत्र समः नरः मे प्रियः? | शीतोष्णसुखदुःखेषु समः नरः मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | सङ्गविवर्जितः नरः मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | तुल्यनिन्दास्तुतिः नरः मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | मौनी मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | येन केनचित् सन्तुष्टः मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | अनिकेतः मे प्रियः। |
| पुनश्च कीदृशः नरः मे प्रियः? | स्थिरमतिः मे प्रियः। |

## अन्वयः

शत्रौ च मित्रे च तथा मानापमानयोः समः शीतोष्णसुख–दुःखेषु समः, सङ्गविवर्जितः, तुल्यनिन्दास्तुतिः, मौनी, येन केनचित् सन्तुष्टः, अनिकेतः, स्थिरमतिः, भक्तिमान् नरः मे प्रियः (अस्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| शत्रौ | रिपौ | शत्रु में | To enemy |
| मित्रे | सुहृदि | मित्र में | to friend |
| तथा | अपि च | और | also |
| मानापमानयोः | आदरानादरयोः | सम्मान–असम्मान में | in honour and dishonour |
| समः | तुल्यः | एक समान रहने वाला | the same |
| शीतोष्णसुख–दुःखेषु | शीतग्रीष्म–अनुकूल–प्रतिकूलेषु | सर्दी–गर्मी व सुख–दुःख में | in cold and heat in pleasure and pain |
| समः | तुल्यः | समभाव रखने वाला | the same |
| सङ्गविवर्जितः | आसक्तिरहितः | आसक्ति रहित | free from attachment |
| तुल्यनिन्दास्तुतिः | निन्दायां स्तुतौ च समभावः | निन्दा और स्तुति को एक जैसा ग्रहण करने वाला | to whom censure is praise are equal |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| मौनी | मननशीलः | मननशील | silent |
| येन केनचित् | येन केनापि प्रकारेण | जिस किसी भी प्रकार से | with anything |
| सन्तुष्टः | शरीरनिर्वहने सन्तृप्तः | शरीरनिर्वाह में सन्तुष्ट | contented |
| अनिकेतः | गृहादिषु आसक्तिरहितः | गृह आदि में आसक्ति रहित | homeless |
| स्थिरमतिः | अविचलबुद्धिः | स्थिर बुद्धि वाला | steady minded |
| भक्तिमान् | निष्ठावान् | निष्ठा रखने वाला | full of devotion |
| नरः | मनुष्यः | मनुष्य | man |
| मे प्रियः | मदीयः अभीष्टः | मेरा प्रिय है | dear to me |

## भावार्थः

**संस्कृतम्** – यः नरः रिपौ सुहृदे च माने अपमाने च, शीते उष्णे च, सुखे दुःखे च सर्वदा समानः तिष्ठति। यः आसक्तिरहितः, निन्दायां स्तुतौ च तुल्यद्रष्टा, मननशीलः अस्ति। यः येन केनापि प्रकारेण शरीरनिर्वाहे सन्तुष्टः सन् गृहादिषु आसक्तिं न करोति। यश्च मयि अविचलबुद्धिमान् निष्ठावान् च अस्ति सः नरः मम प्रियः भवति।

**हिन्दी** – जो व्यक्ति शत्रु और मित्र में, मान और अपमान में, सर्दी और गर्मी में तथा सुख और दुःख में एक जैसा रहता है। जो आसक्ति रहित है, निन्दा स्तुति में सर्वदा समभाव रखता है। जो मननशील है और जिस किसी भी प्रकार शरीर निर्वाह में सन्तुष्ट रहने वाला है। जो गृह आदि में आसक्ति नहीं रखता। जो स्थिर बुद्धि वाला तथा निष्ठावान् है, वह व्यक्ति मेरा प्रिय है।

**आंग्लम्** – He who is the to foe and friend and also in honour and dishonour, who is the same in cold and heat, in pleasure and pain, who is free from attachment. To whom censure and praise are equal who is silent, content with anything, homeless steady minded and full of devotion that man is dear to me.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

| | | |
|---|---|---|
| मानापमानयोः | – | मान + अपमानयोः (दीर्घसन्धिः) |
| शीतोष्णसुखदुःखेषु | – | शीत + उष्णसुखदुःखेषु (विसर्गसन्धिः) |
| तुल्यनिन्दास्तुतिर्मौनी | – | तुल्यनिन्दास्तुतिः + मौनी (विसर्गसन्धिः) |
| सन्तुष्टो येन | – | सन्तुष्टः + येन (विसर्गसन्धिः) |
| स्थिरमतिर्भक्तिमान् | – | स्थिरमतिः + भक्तिमान् (विसर्गसन्धिः) |

www.thearyasamaj.org


(ख) **समासः**

| | | |
|---|---|---|
| मानापमानयोः | – | मानं च अपमानं च मानापमाने (द्वन्द्वः) तयोः |
| शीतोष्णसुखदुःखेषु | – | शीतं च उष्णं च सुखं च दुःखं च शीतोष्णसुखदुःखानि (द्वन्द्वः) तेषु |
| सङ्गविवर्जितः | – | सङ्गेन विवर्जितः (तृतीयातत्पुरुषः) |
| तुल्यनिन्दास्तुतिः | – | निन्दा च स्तुतिः च निन्दास्तुती (द्वन्द्वः) तुल्ये निन्दास्तुती यस्य सः (बहुव्रीहिः) |
| अनिकेतः | – | अविद्यमानः निकेतः यस्य सः (बहुव्रीहिः) |
| स्थिरमतिः | – | स्थिरा मतिः यस्य सः (बहुव्रीहिः) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| समः | – | सम् + घ |
| शत्रौ | – | शद् + त्रुन्-शत्रु |
| मान | – | मन् + घञ् |
| शीत | – | श्यै + क्त |
| उष्ण | – | उष् + नक् |
| सङ्ग | – | सञ्ज् + घञ् |
| विवर्जितः | – | वि + वृज् + क्त |
| स्तुतिः | – | स्तु + क्तिन् |
| निन्दा | – | निन्द + अ + टाप् |
| सन्तुष्टः | – | सम् + तुष् + क्त |
| स्थिर | – | स्था + किरच् |
| मतिः | – | मन् + क्तिन् |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| तथा | – | तद् + थाल् (प्रकारार्थे) |
| मौनी | – | मौन + इनि |
| भक्तिमान् | – | भक्ति + मतुप्- भक्तिमत् |

(ङ) **व्युत्पत्तिः**

| | | |
|---|---|---|
| तुल्य | – | तुलया सम्मितम् = तुल्यम् |
| निकेतः | – | निकेतति निवसति अस्मिन् |

www.thearyasamaj.org


(ii) **पर्यायः**

| | | |
|---|---|---|
| शत्रुः | – | रिपुः, वैरी, अरिः द्विट्, |
| मित्रम् | – | सुहृदः, सुहृद्, सखा |
| निकेतः | – | गृहं, सद्म, निकेतनम्, आलयः |

## अभ्यासः - 12

### श्लोकौ - 13, 14

1. **श्लोकानुसारं उचितपदैः रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks according to the verse.]

समः ------ ---- ------ --- तथा ---------------।
--------------- सुखदुःखेषु --------- सङ्गविवर्जितः॥
-------------------- मौनी सन्तुष्टो ----- ----------- ।
अनिकेतः ------------------------ ------------ नरः॥

2. **यथानिर्देशं श्लोकात् पदं चित्वा लिखत–**

[यथा निर्देश श्लोक से पद चुनकर लिखें। Write the words according to the verse as directed.]

(क) तृतीयान्तं पदम् - (i) --------- (ii) -------
(ख) सप्तम्यन्तं पदम् - (i) --------- (ii) -------- (iii) ------- (iv) -------
(ग) विशेषणपदम् - (i) --------- (ii) -------- (iii) --------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के मूल शब्द लिखें। Write the nominal stems of the given words]

यथा– (i) शत्रौ – **शत्रु**
(ii) मित्रे – -------------
(iii) सन्तुष्टः – -------------
(iv) मे – -------------
(v) भक्तिमान् – -------------
(vi) येन – -------------
(vii) मानापमानयोः – -------------

www.thearyasamaj.org


4. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction of the given verse.]

शत्रौ च मित्रे ---- तथा ------------ ------ ---------------------- समः ------- --------- तुल्य निन्दास्तुतिः, मौनी ----- केनचित् ------- -------- -------------- भक्तिमान् ----- --- -------- ------।

5. **यथोचितं विग्रहवाक्यं वा लिखत–**

[उचित विग्रह वाक्य लिखें। Write the analytical sentences.]

| | | | | | |
|---|---|---|---|---|---|
| (i) | भक्तिमान् | = | **भक्तिः** | **अस्य** | **अस्ति** |
| (ii) | कान्तिमान् | = | ------ | ------ | ------ |
| (iii) | प्रीतिमान् | = | ------ | ------ | ------ |
| (iv) | भ्रान्तिमान् | = | ------ | ------ | ------ |
| (v) | मतिमान् | = | ------ | ------ | ------ |

6. **उचितपदेन योजयत–**

[सही पद से मेल करें। Match with appropriate word.]

| | | | |
|---|---|---|---|
| **यथा–** (i) | **शत्रौ** | (क) | समः |
| (ii) | निन्दास्तुतिः | (ख) | शान्तः |
| (iii) | सन्तुष्टः | (ग) | **अरौ** |
| (iv) | तुल्यः | (घ) | मानापमानम् |
| (v) | मौनी | (ङ) | तृप्तः |

7. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद कर लिखें। Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| (i) | मानापमानयोः | = | **मान** | + | **अपमानयोः** |
| (ii) | तुल्यातुल्ययोः | = | ---------- | + | ---------- |
| (iii) | स्नातानुलिप्तः | = | ---------- | + | ---------- |
| (iv) | कृताकृतम् | = | ---------- | + | ---------- |
| (v) | शीतोष्णम् | = | **शीत** | + | **उष्णम्** |
| (vi) | समोष्णम् | = | ---------- | + | ---------- |
| (vii) | परोपकारः | = | ---------- | + | ---------- |
| (vii) | पदोन्नतिः | = | ---------- | + | ---------- |

www.thearyasamaj.org



8. **यथोचितं रिक्तस्थानं पूरयत–**

[उचित शब्द से रिक्त स्थान भरें। Fill in the blanks with appropriate word.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) | **स्तुतिर्मौनी** | = | **स्तुतिः** | + | **मौनी** |
| | (ii) | मतिर्भक्ति | = | ----- | + | भक्तिः |
| | (iii) | गुरुर्ब्रह्मा | = | गुरुः | + | ----- |
| | (iv) | ------------ | = | देवर्षि | + | नारदः |
| | (v) | ------------ | = | पुनः | + | जन्म |

9. **यथोचितं योजयत–**

[सही मेल बनायें। Match appropriately]

| | | | |
|---|---|---|---|
| **यथा–** | (i) | **समः** | (क) द. (सर्व.) पुं. तृ. एक. |
| | (ii) | शत्रौ | (ख) अ. पुं. सप्त. द्वि. |
| | (iii) | मित्रे | (ग) उ. पुं. सप्त. एक. |
| | (iv) | मानापमानयोः | (घ) **अ. पुं. प्र. एक.** |
| | (v) | येन | (ङ) अ. नपुं. सप्त. एक. |

www.thearyasamaj.org



**श्लोकः**

**ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते ।**
**श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ॥15॥** (भ.गी. 12.20)

**पदच्छेदः**

ये तु धर्म्य-अमृतम् इदम् यथा उक्तम् परि-उपासते।
श्रद्दधानाः मत्-परमाः भक्ताः ते अतीव मे प्रियाः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ये | यद्–द. (सर्व.) पुं.प्र. बहु. | श्रद्दधानाः | श्रद्दधान–अ.पुं. प्र. बहु. |
| तु | अव्ययम् | मत्परमाः | अ. पुं. प्र. बहु. समस्तम् |
| धर्म्यामृतम् | अ. नपुं. द्विती. एक. समस्तम् | भक्ताः | अ. पुं. प्र. बहु. |
| इदम् | इदम्–म. नपुं. द्विती. एक. | ते | तद्–द. (सर्व.) पुं. प्र. बहु. |
| यथा | तद्धितान्तम् अव्ययम् | अतीव | अव्ययम् |
| उक्तम् | अ. नपुं. द्विती. एक. | मे | अस्मद्–द.(सर्व.)षष्ठी एक. (वैकल्पिकं रूपम्) |
| पर्युपासते | परि + उप + आस्– कर्तृवाच्ये आत्मनेपदे लट् प्रपु. बहु. | प्रियाः | अ. पुं. प्र. बहु. |

**आकाङ्क्षा**

**ये पर्युपासते।**

| | |
|---|---|
| किं पर्युपासते? | धर्म्यामृतं पर्युपासते। |
| किं धर्म्यामृतं पर्युपासते? | इदं धर्म्यामृतं पर्युपासते। |
| कीदृशम् इदं धर्म्यामृतम्? | यथोक्तम् (पूर्वोक्तम्) इदं धर्म्यामृतम्। |
| के यथोक्तम् इदं धर्म्यामृतं पर्युपासते? | ये भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते। |
| कीदृशाः भक्ताः पर्युपासते? | श्रद्दधानाः भक्ताः पर्युपासते। |
| पुनश्च कीदृशाः पर्युपासते? | मत्परमाः भक्ताः पर्युपासते। |

**ते प्रियाः (सन्ति)।**

| | |
|---|---|
| ये श्रद्दधानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते ते कीदृशाः (सन्ति)? | ये श्रद्दधानाः मत्परमाः भक्ताः इदं धर्म्यामृतं पर्युपासते ते प्रियाः (सन्ति)। |

www.thearyasamaj.org


| | |
|---|---|
| ते कस्य प्रियाः (सन्ति)? | ते मे प्रियाः (सन्ति)। |
| ते मे किमिव प्रियाः? | ते मे अतीव प्रियाः। |

**अन्वयः**

ये तु श्रद्धानाः मत्परमाः भक्ताः यथोक्तम् इदं धर्म्यामृतं पर्युपासते, ते मे अतीव प्रियाः (सन्ति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| ये तु | ये संन्यासिनः | जो भक्त | Those devotees |
| श्रद्धानाः | श्रद्धां प्रकटयन्तः | श्रद्धा रखते हुए | endued with *Śraddhā - faith* |
| मत्परमाः | मम परायणाः | मेरे परायण होकर | regarding me as their supreme |
| यथोक्तम् | पूर्वनिरूपितम् | पहले बताये गये | as declared |
| इदं धर्म्यामृतम् | एतत् धर्ममयं पीयूषम् | इस धर्ममय अमृत की | immortal *Dharma* |
| पर्युपासते | सेवन्ते | सेवन करते हैं | follow |
| ते | भक्ताः | वे भक्त | they |
| मे | मम (ईश्वरस्य) | मेरे | to me |
| अतीव | अधिकम् | अधिक | exceedingly |
| प्रियः | वल्लभाः | प्रेमी हैं | dear to me |

**भावार्थः**

**संस्कृतम्** – ये मयि स्वीयां श्रद्धां धारयन्ति, भगवत् परायणाः भवन्ति, अपि च पूर्वश्लोकेषु प्रतिपादितं धर्मानुप्राणितम् अमृतमार्गं सेवन्ते, ते भक्ताः मम सर्वाधिकं वल्लभाः भवन्ति।

**हिन्दी** – जो मुझमें अपनी श्रद्धा रखते हैं, भगवत् परायण रहते हैं तथा पहले बताये गये धर्ममय अमृतपथ का सेवन करते हैं, वे भक्त मुझे सर्वाधिक प्रिय हैं।

**आंग्लम्** – They, verily who follow this immortal *Dharma* described above endued with *Śraddhā*, looking upon me as the Supreme goal and devoted they are exceedingly dear to me.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| धर्म्यामृतम् | - | धर्म्य + अमृतम् (दीर्घसन्धिः) |
| यथोक्तम् | - | यथा + उक्तम् (गुणसन्धिः) |
| पर्युपासते | - | परि + उपासते (यण्सन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| धर्म्यामृतम् | - | (धर्मादनपेतम् = धर्म्यम्) धर्म्यं च तदमृतं च = धर्म्यामृतम् (कर्मधारयः) |
| अमृतम् | - | न मृतम् (नञ्-तत्पुरुषः) |
| यथोक्तम् | - | उक्तम् अनतिक्रम्य (अव्ययीभावः) |
| मत्परमाः | - | मम परमः मत्परमः (कर्मधारयः) ते |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| अमृतम् | - | अ + मृ + क्त |
| उक्तम् | - | (ब्रू) वच् + क्त |
| श्रद्धानाः | - | श्रत् + धा + शानच् |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| धर्म्य | = | धर्म + यत् |

---

## अभ्यासः - 13

### श्लोकः - 15

1. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान पूरा करें। Fill in the blanks according to the verse.]

ये तु ---------------- -------------- पर्युपासते।
---------- ---------- ------- अतीव ----- प्रियाः॥

2. **यथानिर्देशं श्लोकात् पदं चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पद चुनकर लिखें। Write the words from the verse as directed.]

(क) क्तान्तं पदम् - (i) -------- (ii) -----------

www.thearyasamaj.org


(ख) प्रथमाबहुवचनान्तम् - (i) -------------- (ii) --------------
(iii) -------------- (iv) --------------

(ग) अव्ययम् - (i) ------- (ii) -------

3. **यथोचितं सन्धिं सन्धिविच्छेदं वा कुरुत–**

[यथा उचित सन्धि या सन्धिविच्छेद करें। Join or Disjoin as appropriately.]

**यथा–** (i) **यथोक्तम्** = **यथा + उक्तम्**

(ii) ------------ = गङ्गा + उदकम्

(iii) महोदय: = ----------------

(iv) यथोचितम् = ----------------

(v) त्वयोक्तम् = ----- + उक्तम्

4. **अधोनिर्दिष्टेषु पदेषु प्रकृति-प्रत्ययविभागं कुरुत–**

[निम्न पदों का प्रकृति-प्रत्यय विभाग करें। Saparate the base and suffix of the following words.]

(i) उक्तम् = **वच् + क्त**

(ii) कथितम् = -------------

(iii) श्रुतम् = -------------

(iv) गतम् = -------------

(v) पठितम् = -------------

(vi) दत्तम् = -------------

(vii) मुक्तम् = -------------

(viii) वर्जितम् = -------------

5. **उत्तरं प्रदत्त–**

[उत्तर दें। Answer the questions.]

(i) भक्त: केन माध्यमेन ईश्वरं प्राप्तुं शक्नोति? ------------------------------

(ii) भक्त: कीदृशं पन्थानम् अनुसरेत्? ------------------------------

(iii) भक्ता: कस्य प्रिया: भविष्यन्ति? ------------------------------

(iv) भक्ता: कथं दर्शनं कर्तुं शक्नुवन्ति? ------------------------------

www.thearyasamaj.org


6. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

ये ------ ------------ --------- भक्ताः -------- -------- ------ पर्युपासते ---------- ------- ---------- प्रियाः -----------।

7. **उचितपदेन योजयत–**

[सही पद से मेल करें। Match with the appropriate word.]

यथा– (i) **ये** — (घ) **सर्वनामपदम्**

| | |
|---|---|
| (i) **ये** | (क) अव्ययम् |
| (ii) भक्ताः | (ख) समस्तपदम् |
| (iii) अतीव | (ग) असमस्तपदम् |
| (iv) पर्युपासते | (घ) **सर्वनामपदम्** |
| (v) मत्परमाः | (ङ) क्रियापदम् |

8. **विशेषणं विशेष्यं वा लिखत–**

[विशेषण या विशेष्य लिखें। Write the qualifier or qualified.]

| **विशेषणम्** | **विशेष्यम्** |
|---|---|
| (i) यथोक्तम् | (क) ------------- |
| (ii) ------------- | (ख) भक्ताः |

9. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences by using following words.]

(क) तु (ख) श्रद्दधान (ग) अतीव (घ) इदम् (नपुं.) (ङ) पर्युपासते

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org

# त्रयोदशोऽध्यायः

**श्लोकः**

**अमानित्वमदम्भित्वमहिंसा क्षान्तिरार्जवम् ।**
**आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः ॥16॥**
**इन्द्रियार्थेषु वैराग्यमनहङ्कार एव च ।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् ॥17॥** (भ.गी. 13.7, 8)

**पदच्छेदः**

अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिः आर्जवम्।
आचार्य–उपासनम् शौचम् स्थैर्यम् आत्म–विनिग्रहः।।
इन्द्रिय–अर्थेषु वैराग्यम् अनहङ्कारः एव च।
जन्म–मृत्यु–जरा–व्याधि–दुःख–दोष-अनुदर्शनम्।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अमानित्वम् | अ. नपुं. प्र. एक. समस्तम् | आत्मविनिग्रहः | अ. पुं. प्र. एक. समस्तम् |
| अदम्भित्वम् | अ. नपुं. प्र. एक. समस्तम् | इन्द्रियार्थेषु | अ. पुं. सप्त. बहु. समस्तम् |
| अहिंसा | आ. स्त्री. प्र. एक. समस्तम् | वैराग्यम् | अ. नपुं. प्र. एक. |
| क्षान्तिः | इ. स्त्री. प्र. एक. | अनहङ्कारः | अ. पुं. प्र. एक. समस्तम् |
| आर्जवम् | अ. नपुं. प्र. एक. | एव | अव्ययम् |
| आचार्योपासनम् | अ. नपुं. प्र. एक. समस्तम् | च | अव्ययम् |
| शौचम् | अ. नपुं. प्र. एक. | जन्ममृत्युजरा–व्याधिदुःख–दोषानुदर्शनम् | अ. नपुं. प्र. एक. समस्तम् |
| स्थैर्यम् | अ. नपुं. प्र. एक. | | |

**आकाङ्क्षा**

**(ज्ञानं प्रोक्तम्)।***

ज्ञानं किम् इति प्रोक्तम्? — अमानित्वम् इति ज्ञानं प्रोक्तम्।
पुनश्च ज्ञानं किम् इति प्रोक्तम्? — अदम्भित्वम् इति ज्ञानं प्रोक्तम्।
पुनश्च ज्ञानं किम् इति प्रोक्तम्? — अहिंसा इति ज्ञानं प्रोक्तम्।
पुनश्च ज्ञानं किम् इति प्रोक्तम्? — क्षान्तिः आर्जवम् च इति ज्ञानं प्रोक्तम्।

* 20 तमश्लोकात् अध्याहृतं पदम्

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च ज्ञानं किम् इति प्रोक्तम्? | आचार्योपासनम् इति ज्ञानं प्रोक्तम्। |
| पुनश्च ज्ञानं किम् इति प्रोक्तम्? | शौचं, स्थैर्यम् आत्मविनिग्रहः च ज्ञानम् इति प्रोक्तम्। |
| पुनश्च ज्ञानं किम् इति प्रोक्तम्? | इन्द्रियार्थेषु वैराग्यं च ज्ञानम् इति प्रोक्तम्। |
| पुनश्च ज्ञानं किम् इति प्रोक्तम्? | अनहङ्कारः एव ज्ञानम् इति प्रोक्तम्। |
| पुनश्च ज्ञानं किम्? | जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं च ज्ञानं प्रोक्तम्। |

## अन्वयः

(हे अर्जुन!) अमानित्वम्, अदम्भित्वम्, अहिंसा, क्षान्तिः, आर्जवम्, आचार्योपासनम्, शौचं, स्थैर्यम्, आत्मविनिग्रहः, इन्द्रियार्थेषु वैराग्यम्, अनहङ्कारः एव जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनं च (ज्ञानम् प्रोक्तम्)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अमानित्वम् | विनयः | विनम्रता | humility |
| अदम्भित्वम् | दम्भहीनता | दम्भहीनता | unpretentiousness |
| अहिंसा | हिंसाप्रवृत्तेः अभावः | अहिंसा | non-injury |
| क्षान्तिः | क्षमा | सहनशीलता | forgiveness |
| आर्जवम् | सरलता | सरलता | uprightness |
| आचार्योपासनम् | गुरोः शुश्रूषा | गुरु की सेवा | service of the teacher |
| शौचम् | पवित्रता | पवित्रता | purity |
| स्थैर्यम् | स्थिरता | स्थिरता | steadnees |
| आत्मविनिग्रहः | मनसः नियन्त्रणम् | मन का वश में होना | self control |
| इन्द्रियार्थेषु | इन्द्रियाणां विषयेषु | इन्द्रियों के विषयों में | sense objects |
| वैराग्यम् | उदासीनता | उदासीनता | dispassion |
| अनहङ्कारः एव | अहङ्कारस्य अभावः | तथा अहंकार का न होना | absence of egoism |
| जन्ममृत्युजरा-व्याधिदुःख-दोषानुदर्शनं च | जनन–मरण–वार्धक्य–रोगेषु दुःखरूपदोषानां वारम्वारं दर्शनं च | जन्म, मृत्यु, बुढ़ापा रोग में दुःख रूपी दोषों का बार-बार दर्शन | perception of evil in birth, death, old age sickness and pair |
| (ज्ञानम्) | (ज्ञानम्) | (ज्ञान) | (knowledge) |
| (प्रोक्तम्) | (कथितम्) | (कहा गया) | (said) |

www.thearyasamaj.org


## भावार्थः

**संस्कृतम्** – हे अर्जुन! विनयशीलता, आडम्बरविहीनता, अहिंसा, क्षमा, सरलता, गुरोः शुश्रूषा, स्थिरता, मनसः नियन्त्रणम्, इन्द्रियाणां विषयेषु उदासीनता, अहङ्कारस्य अभावः, जन्मनः मृत्योः, वार्धक्यस्य रोगस्य च विषये दुःखरूपस्य दोषस्य वारम्वारं दर्शनम्–एतत् सर्वमपि ज्ञानम् इति प्रोक्तम्।

**हिन्दी** – हे अर्जुन! विनयशीलता, आडम्बर का न होना, अहिंसा, क्षमा, सरलता, श्रीगुरु की सेवा, अविचलस्थिति, मन का वश में होना, इन्द्रियों के विषयों में उदासीनता, अहङ्कार का अभाव, जन्म, मृत्यु, वृद्धावस्था, रोग के विषय में दुःख रूप दोष को बार-बार देखना–ये सभी ज्ञान की श्रेणी में पुकारे जाते हैं।

**आंग्लम्** – Humility, modesty, non-injury, for bearace-uprightness, service of the teacher, purity, stead fastness, self control, dispassion towards the objects of the senses and also absence of egoism, perception of evil in birth, death, old age, sickness and pain.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| क्षान्तिरार्जवम् | – | क्षान्तिः + आर्जवम् (विसर्गसन्धिः) |
| आचार्योपासनम् | – | आचार्य + उपासनम् (गुणसन्धिः) |
| अनहङ्कार एव | – | अनहङ्कारः + एव (विसर्गसन्धिः) |
| इन्द्रियार्थेषु | – | इन्द्रिय + अर्थेषु (दीर्घसन्धिः) |
| दोषानुदर्शनम् | – | दोष + अनुदर्शनम् (दीर्घसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| अमानित्वम् | – | न मानित्वम् (नञ् तत्पुरुषः) |
| अदम्भित्वम् | – | न दम्भित्वम् (नञ् तत्पुरुषः) |
| अहिंसा | – | न हिंसा (नञ् तत्पुरुषः) |
| आचार्योपासनम् | – | आचार्यस्य उपासनम् (षष्ठीतत्पुरुषः) |
| आत्मविनिग्रहः | – | आत्मनः विनिग्रहः (षष्ठीतत्पुरुषः) |
| इन्द्रियार्थेषु | – | इन्द्रियाणाम् अर्थः इन्द्रियार्थः (षष्ठीतत्पुरुषः) तेषु |
| अनहङ्कारः | – | न अहङ्कारः (नञ् तत्पुरुषः) |
| जन्ममृत्युजराव्याधि-दुःखदोषानुदर्शनम् | – | जन्म च मृत्युः च जरा च व्याधिः च जन्ममृत्युजराव्याधयः (द्वन्द्वः) |

www.thearyasamaj.org


दुःखमेव दोषः दुःखदोषः (कर्मधारयः) दुःखदोषस्य अनुदर्शनं दुःखदोषानुदर्शनम् (षष्ठीतत्पुरुषः) जन्ममृत्युजराव्याधिषु दुःखदोषानुदर्शनम् (सप्तमीतत्पुरुषः)

**(ग) कृदन्तः**

| | | |
|---|---|---|
| अहिंसा | – | अ + हिंस् + अ + टाप् |
| क्षान्तिः | – | क्षम् + क्तिन् |
| आचार्य | – | आ + चर् + ण्यत् |
| उपासनम् | – | उप + आस् + ल्युट् |
| विनिग्रहः | – | वि + नि + ग्रह् + अप् |
| अर्थेषु | – | ऋ + थन् – अर्थ |
| जन्म | – | जन् + मनिन् – जन्मन् |
| मृत्यु | – | मृ + त्युक् |
| जरा | – | जृ + अङ् + टाप् |
| व्याधि | – | वि + आ + धा + कि |
| दोष | – | दुष् + घञ् |
| अनुदर्शनम् | – | अनु + दृश + ल्युट् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| अमानित्वम् | – | अ – मानिन् + त्व [मानिनः भावः मानित्वम्] |
| | | मानम् अस्य अस्ति इति मानी, मान + इनि–मानिन् |
| अदम्भित्वम् | – | अ – दम्भिन् + त्व [दम्भिनः भाव दम्भित्वम्] |
| | | दम्भः अस्य अस्ति इति दम्भी, दम्भ + इनि–दम्भिन् |
| आर्जवम् | – | ऋजोः भावः आर्जवम्, ऋजु + अण् |
| शौचम् | – | शुचेः भावः शौचम्, शुचि + अण् |
| स्थैर्यम् | – | स्थिरस्य भावः स्थैर्यम्, स्थिर + ष्यञ् |
| वैराग्यम् | – | विरागस्य भावः वैराग्यम्, विराग + ष्यञ् |
| इन्द्रियम् | – | इन्द्र + घ, इन्द्रेण दुर्जयम् |

**(ङ) व्युत्पत्तिः**

| | | |
|---|---|---|
| आचार्यः | – | आचिनोति शास्त्राणि इति (निरुक्तिः) |

www.thearyasamaj.org


**अवधेयम्**

(i) भावप्रत्ययानां विषये
(ii) नञ् तत्पुरुषविषये

## अभ्यासः - 14

### श्लोकः – 16, 17

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार सही पद से रिक्त स्थान भरें। Fill in the blanks with the appropriate words according to the verse.]

------------------ दम्भित्वमहिंसा ------------------।
आचार्योपासनं --------- ---------------------------॥
इन्द्रियार्थेषु ------------------------------------- एव च।
---------------- ---------------------- दोषानुदर्शनम्॥

2. **श्लोकाभ्यां पदानि चित्वा लिखत–**

[श्लोकों से पदों को चुनकर लिखें। Write the words from the verses.]

(क) प्रथमान्तं नपुंसकलिङ्गपदम् - (i) --------- (ii) --------- (iii) ---------
(ख) नञ्समासयुक्तं पदम् - (i) --------- (ii) --------- (iii) ---------
(ग) अव्ययम् - (i) --------- (ii) ---------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) अमानित्वम् - ------------------
(ii) अहिंसा - ------------------
(iii) आर्जवम् - ------------------
(iv) क्षान्तिः - ------------------
(v) वैराग्यम् - ------------------

4. **प्रश्नानाम् उत्तरं प्रदत्त–**

[प्रश्नों के उत्तर दें। Answer the questions.]

(i) श्लोके दम्भस्य अभावं किं पदं सूचयति?------------------------------
(ii) कस्य उपासनं ज्ञानम् उच्यते? ------------------------------

www.thearyasamaj.org


(iii) केषु वैराग्यं ज्ञानरूपं भवति? ----------------------------

(iv) 'अहिंसा', 'अनहङ्कारः' इत्यत्र कः समासः? ----------------------------

5. **उचितपदेन योजयत–**

[सही पद से मिलायें। Match with the appropriate word.]

| | | |
|---|---|---|
| यथा– | (i) **अमानित्वम्** | (क) हिंसायाः अभावः |
| | (ii) अहिंसा | (ख) सारल्यम् |
| | (iii) स्थैर्यम् | (ग) **विनम्रता** |
| | (iv) आर्जवम् | (घ) पवित्रता |
| | (v) शौचम् | (ङ) दृढता |

6. **उदाहरणानुसारं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (i) | ऋजोः | भावः | = | **आर्जवम्** | **(अण्)** |
| | (ii) | मृदोः | भावः | = | -------- | (----) |
| | (iii) | ------- | ------- | = | पाटवम् | (----) |
| | (iv) | गुरोः | भावः | = | -------- | (----) |
| | (v) | ------- | ------- | = | लाघवम् | (----) |
| | (vi) | स्थिरस्य | भावः | = | **स्थैर्यम्** | **(ष्यञ्)** |
| | (vii) | धीरस्य | भावः | = | -------- | (----) |
| | (viii) | ------- | ------- | = | माधुर्यम् | (----) |
| | (ix) | ------- | ------- | = | सौन्दर्यम् | (----) |
| | (x) | विपुलस्य | भावः | = | -------- | (----) |
| | (xi) | विरागस्य | भावः | = | -------- | (----) |

7. **उचितं मेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (i) आत्मविनिग्रहः | (क) तद्धितान्तः |
| (ii) स्थैर्यम् | (ख) कृदन्तः |
| (iii) एव | (ग) षष्ठीतत्पुरुषः |
| (iv) क्षान्तिः | (घ) नञ् तत्पुरुषः |
| (v) अनहङ्कारः | (ङ) अव्ययम् |

www.thearyasamaj.org


8. **श्लोकानुसारं 'ज्ञानस्य' पञ्चरूपाणि रिक्तस्थाने लिखत–**

[श्लोक के अनुसार 'ज्ञान' के पाँच रूपों को रिक्त स्थान में लिखें। Write five features of '*Gñana*' as per the verse.]

| | | | |
|---|---|---|---|
| **यथा–** | (i) | **अमानित्वम्** | ज्ञानम् उच्यते। |
| | (ii) | ----------- | ज्ञानम् उच्यते। |
| | (iii) | ----------- | ज्ञानम् उच्यते। |
| | (iv) | ----------- | ज्ञानम् उच्यते। |
| | (v) | ----------- | ज्ञानम् उच्यते। |
| | (vi) | ----------- | ज्ञानम् उच्यते। |

9. **यथानिर्दिष्टं विग्रहवृत्तं लिखत–**

[निर्देशानुसार विग्रह वृत्त लिखें। Write the analytical sentences as directed.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) शौचम् | = | **शुचेः** | **भावः** | **(अण्)** |
| | (ii) मौनम् | = | ------- | -------- | (------) |
| | (iii) मार्दवम् | = | ------- | -------- | (------) |
| | (iv) लाघवम् | = | ------- | -------- | (------) |
| | (v) मानित्वम् | = | **मानिनः** | **भावः** | **(त्व)** |
| | (vi) दम्भित्वम् | = | ------- | -------- | (------) |
| | (vii) सेवित्वम् | = | ------- | -------- | (------) |

10. **उचितप्रत्ययेन सह मेलनं कुरुत–**

[उचित प्रत्यय से मिलाएँ। Match with appropriate suffix.]

| | | |
|---|---|---|
| **यथा–** | (i) **धैर्यम्** | (क) क्तिन् |
| | (ii) शौचम् | (ख) ल्युट् |
| | (iii) क्षान्तिः | (ग) अप् |
| | (iv) अदम्भित्वम् | (घ) **ष्यञ्** |
| | (v) विनिग्रहः | (ङ) अण् |
| | (vi) उपासनम् | (च) त्व |

www.thearyasamaj.org


11. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using following words.]

(क) क्षान्तिः (ख) आर्जवम् (ग) एव (घ) शौचम् (ङ) जरा

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु ।**
**नित्यं च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥18॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।**
**विविक्तदेशसेवित्वमरतिर्जनसंसदि ॥19॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम् ।**
**एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा ॥20॥** (भ.गी. 13.9, 10, 11)

**पदच्छेदः**

असक्तिः अनभिष्वङ्गः पुत्र–दार–गृहादिषु।
नित्यम् च सम-चित्तत्वम् इष्ट-अनिष्ट-उपपत्तिषु॥
मयि च अनन्य-योगेन भक्तिः अ-व्यभिचारिणी।
विविक्त–देश–सेवित्वम् अ–रतिः जन–संसदि॥
अध्यात्म–ज्ञान–नित्यत्वम् तत्त्व–ज्ञानार्थ–दर्शनम्।
एतत् ज्ञानम् इति प्रोक्तम् अ–ज्ञानम् यत् अतः अन्यथा॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| असक्तिः | इ. स्त्री. प्र. एक. समस्तम् | जनसंसदि | जनसंसद्–द. स्त्री. |
| अनभिष्वङ्गः | अ. पुं. प्र. एक. समस्तम् | | स. एक. समस्तम् |
| पुत्रदारगृहादिषु | इ. नपुं. सप्त बहु. समस्तम् | अध्यात्मज्ञान- | अ. नपुं. प्र. एक. |
| नित्यम् | अ. नपुं. प्र. एक. | नित्यत्वम् | समस्तम् |
| च | अव्ययम् | तत्त्वज्ञानार्थ- | अ. नपुं. प्र. एक. |
| समचित्तत्वम् | अ. नपुं. प्र. एक. समस्तम् | दर्शनम् | समस्तम् |
| इष्टानिष्टोपपत्तिषु | इ. स्त्री. सप्त. बहु. समस्तम् | एतत् | एतद्–द. (सर्व.) |
| मयि | अस्मद्–द. (सर्व.) | | नपुं. प्र. एक. |
| | त्रि. सप्त एक | ज्ञानम् | अ. नपुं. प्र. एक. |
| च | अव्ययम् | इति | अव्ययम् |
| अनन्ययोगेन | अ. पुं. तृ. एक. समस्तम् | प्रोक्तम् | अ. नपुं. प्र. एक. |
| भक्तिः | इ. स्त्री. प्र. एक. | अज्ञानम् | अ. नपुं. प्र. एक. समस्तम् |
| अव्यभिचारिणी | ई. स्त्री. प्र. एक. | यत् | यद्–द. (सर्व.) |
| | समस्तम् विशेषणम् | | नपुं. प्र. एक. |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| विविक्तदेश- | अ. नपुं. प्र. एक | अतः | तद्धितान्तम् अव्ययम् |
| सेवित्वम् | समस्तम् | अन्यथा | तद्धितान्तम् अव्ययम् |
| अरतिः | इ. स्त्री. प्र. एक. समस्तम् | | |

## आकाङ्क्षा

**प्रोक्तम्।**

| | |
|---|---|
| किम् इति प्रोक्तम्? | ज्ञानम् इति प्रोक्तम्। |
| किं ज्ञानम् इति प्रोक्तम्? | एतत् ज्ञानम् इति प्रोक्तम्। |
| किं एतत् ज्ञानम् इति प्रोक्तम्? | तत्त्वज्ञानार्थदर्शनं ज्ञानम् इति प्रोक्तम्। |
| पुनश्च किं ज्ञानम् इति प्रोक्तम्? | अध्यात्मज्ञाननित्यत्वं ज्ञानम् इति प्रोक्तम्। |
| पुनश्च किं ज्ञानम् प्रोक्तम्? | अरतिः ज्ञानम् प्रोक्तम्। |
| कुत्र अरतिः ज्ञानम् प्रोक्तम्? | जनसंसदि अरतिः प्रोक्तम्। |
| पुनश्च किं ज्ञानम् प्रोक्तम्? | विविक्तदेशसेवित्वं ज्ञानम् इति प्रोक्तम्। |
| पुनश्च किं ज्ञानम् प्रोक्तम्? | भक्तिः ज्ञानम् इति प्रोक्तम्। |
| कीदृशी भक्तिः ज्ञानम् प्रोक्तम्? | अव्यभिचारिणी भक्तिः। |
| केन प्रकारेण अव्यभिचारिणी भक्तिः? | अनन्ययोगेन अव्यभिचारिणी भक्तिः। |
| कुत्र अव्यभिचारिणी भक्तिः? | मयि भक्तिः। |
| पुनश्च किं ज्ञानम् इति प्रोक्तम्? | समचित्तत्वं च ज्ञानम् इति प्रोक्तम्। |
| कदा समचित्तत्वम्? | नित्यं समचित्तत्वम्। |
| केषु नित्यं समचित्तत्वम्? | इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वम् |
| पुनश्च किं ज्ञानम् इति प्रोक्तम्? | अनभिष्वङ्गः ज्ञानम् इति प्रोक्तम्। |
| कुत्र अनभिष्वङ्गः ज्ञानम् इति प्रोक्तम्? | पुत्रदारगृहादिषु अनभिष्वङ्गः ज्ञानम् इति प्रोक्तम्। |
| पुनश्च किं ज्ञानम् इति प्रोक्तम्? | असक्तिः (च) ज्ञानम् इति प्रोक्तम्। |

## अन्वयः

असक्तिः, पुत्रदारगृहादिषु अनभिष्वङ्गः, इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वं च, मयि अनन्ययोगेन अव्यभिचारिणी च भक्तिः, विविक्तदेशसेवित्वम्, जनसंसदि अरतिः, अध्यात्मज्ञान-नित्यत्वम्, तत्त्वज्ञानार्थदर्शनम् एतद् ज्ञानम् इति प्रोक्तम्। यद् अतः अन्यथा (तद्) अज्ञानम् (इति प्रोक्तम्)।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| असक्तिः | प्रीतित्यागः | आसक्ति रहित होना | Non-attachment |
| पुत्रदारगृहादिषु | सुत–स्त्री–गेहप्रभृतिषु | पुत्र, स्त्री, घर आदि में | with son, wife and home |
| अनभिष्वङ्गः | अत्यधिकासक्तेः अभावः | अत्यधिक आसक्ति न होना | non-identification of self |
| इष्टानिष्टोप-पत्तिषु | वाञ्छित–अवाञ्छित-प्राप्तिषु | वाञ्छित एवं अवाञ्छित प्राप्तियों में | on the attainment of the desirable and undesirable |
| नित्यं | सर्वदा | सर्वदा | constant |
| समचित्तत्वम् | हर्षविषादराहित्यम् च | चित्त का समान रहना | even mindedness. |
| मयि | परमात्मनि | मुझमें | to me |
| अनन्ययोगेन | भगवतः एव आश्रयरूपयोगेन | भगवान् के ही आश्रय रूप योग के द्वारा | by the yoga of non separation |
| अव्यभिचारिणी | स्थिरा | स्थिर | unswerving |
| भक्तिः | अनुरक्तिः | उपासना | devotion |
| विविक्तदेशसे-वित्वम् | एकान्तस्थाने वासशीलता | एकान्त स्थान में वासशीलता | resort to solitary places |
| जनसंसदि | लोकसमुदाये | लोगों के समुदाय में | for the society |
| अरतिः | प्रीतेः अभावः | प्रीति न रखना | distaste |
| अध्यात्मज्ञान-नित्यत्वम् | आत्मनः सम्बद्धे ज्ञाने नित्यता | आत्मज्ञान के प्रति निरन्तरता | constancy in self knowledge |
| तत्त्वज्ञानार्थदर्शनम् | सर्वत्र तत्त्वज्ञानस्य विषयरूपस्य परमात्मनः दर्शनम् | सब जगह तत्त्व-ज्ञान के विषय रूप परमात्मा के दर्शन | perception for the end of true knowledge |
| एतत् ज्ञानम् | उपर्युक्तम् "अमानित्वत् आरभ्य तत्त्वज्ञानार्थदर्शनं यावत्" ज्ञानाख्यम् | अमानित्व से तत्त्वज्ञानार्थ दर्शन तक ज्ञान नाम से | this knowledge |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| इति प्रोक्तम् | इति कथितम् | कहे गए हैं। | declared |
| अतः | एभ्यः ज्ञाननामकेभ्यः साधनेभ्यः | इन ज्ञान नामक साधनों से | to it |
| अन्यथा | विपरीतम् | विपरीत | opposed |
| अज्ञानम् (प्रोक्तम्) | अज्ञाननामकम् (कथितम्) | अज्ञान नाम से (कहे गए हैं) | ignorance (said) |

## भावार्थः

**संस्कृतम्** – आसक्तेः अभावः, पुत्र-स्त्री-गृहप्रभृतिषु अत्याधिकासक्तेः अभावः, वाञ्छित-अवाञ्छितासु प्राप्तिषु चित्तस्य सर्वदा समस्थितिः, परमात्मनि भगवदाश्रयमात्रत्वेन योगेन स्थिरा अनुरक्तिः, एकान्तस्थाने वासशीलता, सामान्यजनसमुदाये तेषां सांसारिकव्यवहारे प्रीतेः अभावः, आत्माज्ञानस्य निरन्तरता, तत्त्वज्ञानस्य विषयभूतस्य परमात्मनः सर्वत्रैव अनुदर्शनम्–एतत् सर्वं ज्ञाननाम्ना कथितं वर्तते। यद् एतेभ्यः ज्ञानाख्येभ्यः साधनेभ्यः विपरीतम् अस्ति। तद् अज्ञानं कथ्यते।

**हिन्दी** – आसक्ति का अभाव, पुत्र, स्त्री, घर आदि में अत्यधिक आसक्ति न रखना, वाञ्छित-अवाञ्छित प्राप्तियों में चित्त की सर्वदा समान स्थिति, परमात्मा में भगवान ही मात्र सहारा है इस अभिप्राय रूप योग से स्थिर भक्ति, एकान्त स्थान में वासशीलता, सामान्य जनसमुदाय में उनके सांसारिक व्यवहार में प्रीति का अभाव, आत्मज्ञान की निरन्तरता, तत्त्वज्ञान के विषयरूप परमात्मा का सर्वत्र दर्शन – ये सब ज्ञान नाम से कहे गए हैं। इनके विपरीत 'अज्ञान' नाम से कहे गए हैं।

**आंग्लम्** – Unattachment, non-identification of self with son, wife, home and the like and constant equanimity in the occurrence of desirable and undesirable unswerving devotion to me in yoga of non separation resort to sequstred places distaste for the society of men, constancy in self knowledge, perception of the end of the knowledge and what is opposed to it is ignorance.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

असक्तिरनभिष्वङ्गः – असक्तिः + अनभिष्वङ्गः (विसर्गसन्धिः)

इष्टानिष्टोपपत्तिषु – इष्ट + अनिष्ट + उपपत्तिषु (इष्ट + अनिष्ट: दीर्घसन्धिः) (अनिष्ट + उपपत्तिषु: गुणसन्धिः)

चानन्ययोगेन – च + अनन्ययोगेन (दीर्घसन्धिः)

www.thearyasamaj.org



| | | |
|---|---|---|
| भक्तिरव्यभिचारिणी | – | भक्तिः + अव्यभिचारिणी (विसर्गसन्धिः) |
| अरतिर्जनसंसदि | – | अरतिः + जनसंसदि (विसर्गसन्धिः) |
| एतज्ज्ञानम् | – | एतद् + ज्ञानम् (श्चुत्वसन्धिः) |
| यदतोऽन्यथा | – | यत् + अतः + अन्यथा<br>(यत् + अतः: जश्त्वसन्धिः) (अतः + अन्यथा: विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| असक्तिः | – | न सक्तिः (नञ्-तत्पुरुषः) |
| अनभिष्वङ्गः | – | न अभिष्वङ्गः (नञ्-तत्पुरुषः) |
| पुत्रदारगृहादिषु | – | पुत्रः च दाराः च गृहं च पुत्रदारगृहाणि (द्वन्द्वः)<br>पुत्रदारगृहाणि येषां ते = पुत्रदारगृहादयः (बहुव्रीहिः), तेषु |
| समचित्तत्वम् | – | समं च तत् चित्तत्वम् (षष्ठीतत्पुरुषः) |
| इष्टानिष्टोपपत्तिषु | – | न इष्टम् अनिष्टम् (नञ्-तत्पुरुषः)<br>इष्टम् च अनिष्टं च इष्टानिष्टे (कर्मधारयः)<br>इष्टानिष्टयोः उपपत्तिः इष्टानिष्टोपपत्तिः (कर्मधारयः) तासु |
| अनन्ययोगेन | – | अन्येन योगः = अन्ययोगः<br>न विक्षते अन्ययोगः यस्मिन् सः = अनन्ययोगः, (बहुव्रीहिः), तेन अनन्ययोगेन |
| अव्यभिचारिणी | – | न व्यभिचारिणी (नञ्-तत्पुरुषः) |
| विविक्तदेशसेवित्वम् | – | विविक्तश्चासौ देशः विविक्तदेशः (कर्मधारयः)<br>विविक्तदेशस्य सेवित्वम् (षष्ठीतत्पुरुषः) |
| अरतिः | – | न रतिः (नञ्-तत्पुरुषः) |
| जनसंसदि | – | जनानां संसद् जनंससद् (षष्ठीतत्पुरुषः), तस्यां जनसंसदि |
| अध्यात्मज्ञाननि-त्यत्वम् | – | आत्मनि इति अध्यात्मम् (विभक्त्यर्थे अव्ययीभावसमासः)<br>अध्यात्मं तत् ज्ञानम् च अध्यात्मज्ञानम्, अध्यात्मज्ञाने नित्यत्वम् (सप्तमीतत्पुरुषः) |
| अज्ञानम् | – | न ज्ञानम् (नञ्-तत्पुरुषः) |

www.thearyasamaj.org


**( ग ) कृदन्तः**

| | | |
|---|---|---|
| असक्तिः | – | अ + सञ्ज् + क्तिन् |
| अनभिष्वङ्गः | – | अन्–अभि + स्वञ्ज् + घञ् |
| इष्ट | – | इष् + क्त |
| उपपत्तिषु | – | उप + पद् + क्तिन् |
| विविक्त | – | वि + विच् + क्त |
| देश | – | दिश् + घञ् |
| अरतिः | – | अ + रम् + क्तिन् |
| संसदि | – | सम् + सद् + क्विप्–संसद् |
| प्रोक्तम् | – | प्र + ब्रू + क्त |

**( घ ) तद्धितान्तः**

| | | |
|---|---|---|
| चित्तत्वम् | – | चित्त + त्व |
| अव्यभिचारिणी | – | अव्यभिचार + इनि अव्यभिचारिन् |
| | | अव्यभिचारिन् + ङीप् अव्यभिचारिणी |
| | | "व्यभिचारः अस्याः अस्ति इति व्यभिचारिणी" |
| सेवित्वम् | – | सेविन् + त्व |
| | | [सेव् + णिनि सेविन् – इति कृदन्तरूपम्] |
| नित्यत्वम् | – | नित्य + त्व |
| अतः | – | इदम् + तस् |
| अन्यथा | – | अन्यद् + थाल् |

## अभ्यासः – 15

## श्लोकः – 18, 19, 20

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार सही पद से रिक्त स्थान भरें। Fill in the blanks with appropriate words according to the verse.]

असक्ति -------------------- ----------------------।

----------- च -----------------------------------॥

------------- चानन्योगेन ------------------------------।

-----------------------------------------------------॥

www.thearyasamaj.org



अध्यात्म ------------ तत्त्व -------------------------------।
-------------------- प्रोक्तमज्ञानं ----------------------॥

**2. श्लोकेभ्य: पदानि चित्वा लिखत–**

[श्लोकों से पद चुनकर लिखें। Write the words from the verses.]

(क) नञ्तत्पुरुषसमासपदानि (i) ------- (ii) ------- (iii) ------- (iv) -------

(ख) अव्ययपदानि (i) ------- (ii) ------- (iii) ------- (iv) -------

(ग) सप्तम्यन्तपदानि (i) ------- (ii) ------- (iii) ------- (iv) -------

**3. प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) मयि ---------------

(ii) जनसंसदि ---------------

(iii) असक्ति: ---------------

(iv) पुत्रदारगृहादिषु ---------------

(v) अनित्यत्वम् ---------------

**4. कृदन्तपरिचयं प्रदत्त–**

[कृदन्त परिचय दें। Identify the *Kṛdantas*.]

**यथा–** (i) क्षान्ति: = **क्षम् + क्तिन्**

(ii) असक्ति: = --------------

(iii) इष्ट: = --------------

(iv) भक्ति: = --------------

(v) प्रोक्तम् = --------------

(vi) विविक्त = --------------

**5. उचितपदेन योजयत–**

[सही पद से मिलायें। Match appropriately.]

| | |
|---|---|
| **यथा–** (i) **नित्यम्** | (क) आराधना |
| (ii) ज्ञानम् | (ख) एवं प्रकारेण |
| (iii) प्रोक्तम् | (ग) **शाश्वतम्** |
| (iv) इति | (घ) ब्रह्मविद्या |
| (v) भक्ति: | (ङ) उद्घोषितम् |

www.thearyasamaj.org



6. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान को पूरा करें। Fill in the blanks according to the verse.]

| | | | |
|---|---|---|---|
| यथा– (i) | पुत्रदारगृहादिषु | **अनभिष्वङ्गः** | ज्ञानम् प्रोक्तम्। |
| (ii) | इष्टानिष्टोपपत्तिषु | ------------------ | ज्ञानम् प्रोक्तम्। |
| (iii) | जनसंसदि | ------------------ | ज्ञानम् प्रोक्तम्। |
| (iv) | मयि अव्यभिचारिणी | ------------------ | ज्ञानम् प्रोक्तम्। |

7. **अधोलिखितानां शब्दानाम् अग्रे ज्ञानम्/अज्ञानम् इति लिखत–**

[नीचे दिये गए शब्दों के आगे ज्ञान/अज्ञान लिखें। Write *Gñānam/Agñānam* against following words.]

| | | | |
|---|---|---|---|
| यथा– (i) | अदम्भित्वम् | = | **ज्ञानम्** |
| (ii) | मानित्वम् | = | -------------- |
| (iii) | असक्तिः | = | -------------- |
| (iv) | तत्त्वज्ञानार्थदर्शनम् | = | -------------- |
| (v) | अहङ्कारः | = | -------------- |
| (vi) | शौचम् | = | -------------- |
| (vii) | आर्जवम् | = | -------------- |
| (viii) | अस्थैर्यम् | = | -------------- |
| (ix) | आचार्योपासनम् | = | -------------- |
| (x) | विविक्तदेशसेवित्वम् | = | -------------- |

8. **यथान्वयं योजयत–**

[श्लोकों के अन्वय के अनुसार योग करें। Match as per the construction of the verse.]

| | |
|---|---|
| (i) पुत्रदारगृहादिषु | (क) प्रोक्तम् |
| (ii) इष्टानिष्टोपपत्तिषु | (ख) अरतिः |
| (iii) मयि | (ग) अज्ञानम् |
| (iv) जनसंसदि | (घ) समचित्तत्वम् |
| (v) एतद् ज्ञानम् | (ङ) अनभिष्वङ्गः |
| (vi) अतः अन्यथा | (च) भक्तिः |

www.thearyasamaj.org



**9. विषमं पदं पृथक्कुरुत–**

[विषम पद को अलग करें। Separate odd word.]

(i) अमानित्वम्, अदम्भित्वम्, अहिंसा, अशौचम् – ---------------------

(ii) स्थैर्यम्, वैराग्यम्, नैराश्यम्, आर्जवम् – ---------------------

(iii) क्षान्तिः, भ्रान्तिः, असक्तिः, भक्तिः – ---------------------

(iv) समचित्वम्, भगवदाश्रयः, अहङ्कारः, तत्त्वदर्शनम् – ---------------------

**10. सन्धिं विसन्धिं वा कुरुत–**

[सन्धि अथवा विसन्धि करें। Join or disjoin the *Sandhi.*]

| | | | | | |
|---|---|---|---|---|---|
| (i) | असक्तिः | + | अनभिष्वङ्गः | = | -------------- |
| (ii) | अतः | + | अन्यथा | = | -------------- |
| (iii) | --------- | + | --------- | = | भक्तिरव्यभिचारिणी |
| (iv) | --------- | + | --------- | = | अरतिर्जनसंसदि |
| (v) | क्षान्तिः | + | आर्जवम् | = | -------------- |
| (vi) | ------- | + | --------- | = | अनहङ्कार एव |
| (vii) | ------- | + | उपासनम् | = | आचार्योपासनम् |
| (viii) | दोष | + | --------- | = | दोषानुदर्शनम् |
| (ix) | एतद् | + | ज्ञानम् | = | -------------- |
| (x) | ------- | + | --------- | = | चानन्ययोगेन |

www.thearyasamaj.org



**श्लोकः**

**समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम् ।**
**विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यति ॥21॥** (भ.गी. 13.27)

**पदच्छेदः**

समम् सर्वेषु भूतेषु तिष्ठन्तम् परम-ईश्वरम्।
विनश्यत्सु अविनश्यन्तम् यः पश्यति सः पश्यति॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| समम् | अ. नपुं. द्विती. एक. क्रियाविशेषणम् | विनश्यत्सु | विनश्यत्–त. नपुं. सप्त. बहु. |
| | | अविनश्यन्तम् | अविनश्यत्–त. पुं. द्विती. एक. |
| सर्वेषु | सर्व–अ. (सर्व.) नपुं. सप्त. बहु. | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| | | पश्यति | हश्–कर्तरि लट् प्रपु. एक. |
| भूतेषु | अ. नपुं. सप्त. बहु. | सः | तद्–द. (सर्व.) पुं. प्र. एक. |
| तिष्ठन्तम् | तिष्ठत्–त. पुं. द्विती. एक. | पश्यति | दृश्–कर्तरि लट् प्रपु. एक. |
| परमेश्वरम् | अ. पुं. द्विती. एक. समस्तम् | | |

**आकाङ्क्षा**

**पश्यति।**

| | |
|---|---|
| कं पश्यति? | परमेश्वरं पश्यति। |
| कीदृशं परमेश्वरं पश्यति? | अविनश्यन्तं परमेश्वरं पश्यति। |
| केषु परमेश्वरं पश्यति? | सर्वेषु भूतेषु परमेश्वरं पश्यति। |
| कीदृशेषु सर्वेषु भूतेषु अविनश्यन्तं परमेश्वरं पश्यति? | विनश्यत्सु सर्वेषु भूतेषु अविनश्यन्तं परमेश्वरं पश्यति। |
| सर्वेषु भूतेषु परमेश्वरं पुनश्च कथम्भूतं पश्यति? | सर्वेषु भूतेषु परमेश्वरं तिष्ठन्तं पश्यति। |
| परमेश्वरं केन रूपेण तिष्ठन्तं पश्यति? | परमेश्वरं समं तिष्ठन्तं पश्यति। |
| कः पश्यति? | यः (मनुष्यः) पश्यति। |
| सः (मनुष्यः) कीदृशः भवति? | सः (वस्तुतः) पश्यति। |

www.thearyasamaj.org


**अन्वयः**

यः विनश्यत्सु सर्वेषु भूतेषु अविनश्यन्तं परमेश्वरं समं तिष्ठन्तं पश्यति, सः (एव) पश्यति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | मनुष्यः | जो | Who |
| विनश्यत्सु | नश्वरेषु | नष्ट हो रहे | among the perishing |
| सर्वेषु भूतेषु | सकलेषु प्राणिषु | सभी प्राणियों मे | in all beings |
| अविनश्यन्तम् | अनश्वरम् | नाशरहित | the unperishing |
| परमेश्वरम् | परमात्मानम् | परमात्मा को | the supreme Lord |
| समं | समानरूपेण | समान रूप से | equally |
| तिष्ठन्तं | स्थितम् | स्थित | existing |
| पश्यति | अवलोकयति | देखता | sees |
| सः | सः मनुष्यः | वही मनुष्य | he |
| पश्यति | वस्तुतः अवलोकयति | वास्तव में देखता | sees |

**भावार्थः**

**संस्कृतम्** – यः मनुष्यः नश्वरेषु सकलेषु प्राणिषु अनश्वरं परमात्मानं समानरूपेण स्थितम् अवलोकयति सः मनुष्यः एव वास्तविकरूपेण अवलोकयति।

**हिन्दी** – जो मनुष्य नाश को प्राप्त हो रहे सभी प्राणियों में अविनाशी परमात्मा को समान रूप से स्थित देखता है, वही मनुष्य वास्तव में देखता है।

**आंग्लम्** – He who sees the supreme Lord, remaining the same in all beings, the undying in the dying.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| परमेश्वरम् | – | परम + ईश्वरम् (गुणसन्धिः) |
| विनश्यत्स्वविनश्यन्तम् | – | विनश्यत्सु + अविनश्यन्तम् (यण्सन्धिः) |
| स पश्यति | – | सः + पश्यति (विसर्गसन्धिः) |

www.thearyasamaj.org


(ख) **समासः**

परमेश्वरम् - परमश्च असौ ईश्वरः परमेश्वरः (कर्मधारयः) तम्

अविनश्यन्तम् - न विनश्यन् अविनश्यन् (नञ् तत्पुरुषः) तम्

(ग) **कृदन्तः**

तिष्ठन्तम् - स्था + शतृ - तिष्ठत्

विनश्यत्सु - वि + नश् + शतृ - विनश्यत्

अविनश्यन्तम् - अ–वि + नश् + शतृ - अविनश्यत्

**अवधेयम्**

**शतृप्रत्ययविषये**

## अभ्यासः – 16

### श्लोकः - 21

1. **प्रस्तुतश्लोकात् उचितपदेन रिक्तस्थानं पूरयत–**

[प्रस्तुत श्लोक से उचित पद लेकर रिक्त स्थान भरें। Fill in the blanks with appropriate words from the verse.]

समं ------------ ------------- तिष्ठन्तं ------------।

--------------------------- यः -------- --- पश्यति।।

2. **निर्देशानुसारं श्लोकात् पदानि चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पद चुनकर लिखें। Write the words from the verse according to the instruction.]

(क) द्वितीयान्तपदानि - (i) ----------- (ii) ---------- (iii) ------------

(ख) सप्तम्यन्तपदानि - (i) ----------- (ii) ---------- (iii) ------------

(ग) क्रियाविशेषणपदम् - (i) -----------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stems of given words.]

**यथा–** (i) सर्वेषु - **सर्व**

(ii) अविनश्यन्तम् - --------------

(iii) यः - --------------

(iv) तिष्ठन्तम् - --------------

(v) समम् - --------------

www.thearyasamaj.org


4. **उचितपदेन योजयत–**

[सही पद मिलायें। Match with appropriate word.]

| | | |
|---|---|---|
| **यथा–** (i) | **परमेश्वरम्** | (क) द. पुं. प्र. एक. |
| (ii) | पश्यति | (ख) त. पुं. द्विती. एक. |
| (iii) | भूतेषु | (ग) **अ. पुं. द्विती. एक.** |
| (iv) | तिष्ठन्तम् | (घ) दृश–कर्तरि लट् प्रपु. एक. |
| (v) | सः | (ङ) अ. नपुं. सप्त. बहु. |

5. **कोष्ठकात् उचितपदं चित्वा रिक्तस्थानं पूरयत–**

[कोष्ठक से सही पद चुनकर रिक्त स्थान भरें। Fill in the blanks by appropiated word from the box.]

(i) भूतानि -------------- सन्ति। (नाशयुक्तानि/नाशरहितानि)

(ii) परमात्मा ------------ अस्ति। (विनाशी/अविनाशी)

(iii) वास्तविकद्रष्टा भूतेषु ------------ परमेश्वरं पश्यति। (विनश्यन्तम्/अविनश्यन्तम्)

(iv) परमात्मा -------------- भूतेषु तिष्ठति। (केषुचन/सर्वेषु)

(v) परमात्मा सर्वेषु भूतेषु -------- तिष्ठति। (विषमं/समं)

6. **कृदन्तपरिचयं प्रदत्त–**

[कृदन्त परिचय दें। Give the identify of the *Kṛidanta*.]

**यथा–** (i) तिष्ठन्तम् = **स्था + शतृ त. पुं. द्विती. एक.**

(ii) विनश्यन्तम् = -------------------------

(iii) गच्छन्तम् = -------------------------

(iv) पठन्तम् = -------------------------

(v) क्रीडन्तम् = -------------------------

(vi) पश्यन्तम् = -------------------------

7. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

यः ----------- ----------- भूतेषु ---------- ----------- समं --------- ------------- सः --------- ----------।

www.thearyasamaj.org



8. **उचितपदेन योजयत–**

[सही पद से मिलाएँ। Match with the appropriate word.]

यथा–

| | |
|---|---|
| (i) **यः** | (क) नश्वरेषु |
| (ii) तिष्ठन्तम् | (ख) तुल्यदृष्ट्या |
| (iii) समम् | (ग) अवलोकयति |
| (iv) विनश्यत्सु | (घ) **पुरुषः** |
| (v) पश्यति | (ङ) स्थितम् |

9. **अत्र प्रदत्तानि पदानि प्रयुज्य कतिचन वाक्यानि लिखत–**

(क) यः  (ख) समम्  (ग) पश्यन्तम्  (घ) तिष्ठन्तम्  (ङ) विनश्यन्तम्

www.thearyasamaj.org


## श्लोकः

**समं पश्यन् हि सर्वत्र समवस्थितमीश्वरम् ।**
**न हिनस्त्यात्मनात्मानं ततो याति परां गतिम् ॥22॥** (भ.गी. 13.28)

## पदच्छेदः

सममृ पश्यन् हि सर्वत्र समवस्थितम् ईश्वरम्।
न हिनस्ति आत्मना आत्मानम् ततः याति पराम् गतिम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| समम् | अ. नपुं. द्विती. एक. (क्रियाविशेषणम्) | हिनस्ति | हिंस्–कर्तरि लट् प्रपु. एक. |
| | | आत्मना | आत्मन्–न. पुं. तृ. एक. |
| पश्यन् | पश्यत्–त. पुं. प्र. एक. | आत्मानम् | आत्मन्–न. पुं. द्विती. एक. |
| हि | अव्ययम् | ततः | तद्धितान्तम् अव्ययम् |
| सर्वत्र | तद्धितान्तम् अव्ययम् | याति | या–कर्तरि लट् प्रपु. एक. |
| समवस्थितम् | अ. पुं. द्विती. एक. | पराम् | आ. स्त्री. द्विती. एक. |
| ईश्वरम् | अ. पुं. द्विती. एक. | गतिम् | इ. स्त्री. द्विती. एक. |
| न | अव्ययम् | | |

## आकाङ्क्षा

**न हिनस्ति।**

| | |
|---|---|
| कं न हिनस्ति? | आत्मानं न हिनस्ति। |
| केन आत्मानं न हिनस्ति? | आत्मना आत्मानं न हिनस्ति। |
| किं कुर्वन् आत्मना आत्मानं न हिनस्ति? | पश्यन् आत्मना आत्मानं न हिनस्ति। |
| कं पश्यन् आत्मानं न हिनस्ति? | ईश्वरं पश्यन् आत्मानं न हिनस्ति। |
| कीदृशम् ईश्वरं पश्यन्? | समवस्थितम् ईश्वरं पश्यन्। |
| कुत्र समवस्थितम् ईश्वरं पश्यन्? | सर्वत्र समवस्थितम् ईश्वरं पश्यन्। |
| सर्वत्र समवस्थितम् ईश्वरं कथं पश्यन्? | सर्वत्र समवस्थितम् ईश्वरं समं पश्यन्। |

**याति।**

| | |
|---|---|
| कुत्र याति? | गतिं याति। |

www.thearyasamaj.org


| | |
|---|---|
| कीदृशीं गतिं याति? | परां गतिं याति। |
| कुतः परां गतिं याति? | ततः परां गतिं याति। |
| कः ततः परां गतिं याति? | यः समवस्थितम् ईश्वरं सर्वत्र पश्यन् आत्मना आत्मानं न हिनस्ति। |

**अन्वयः**

(यः) सर्वत्र हि समवस्थितम् ईश्वरं समं पश्यन् आत्मना आत्मानं न हिनस्ति (सः) ततः परां गतिं याति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| सर्वत्र | सर्वेषु स्थानेषु | सब जगह | Everywhere |
| हि | निश्चयेन | निश्चित रूप से | indeed |
| समवस्थितम् | तुल्यतया स्थितम् | स्थित | equally dwelling |
| ईश्वरम् | परमात्मानम् | परमात्मा को | the Lord |
| समं | समानरूपेण | समान रूप से | equally |
| पश्यन् | अवलोकयन् | देखता हुआ | seeing |
| आत्मना | स्वयं | अपने द्वारा | by the self |
| आत्मानम् | स्वम् | अपने को | the self |
| न हिनस्ति | न मारयति | नहीं मारता है | destroys |
| ततः | तस्मात् कारणात् | इसलिए | then |
| परां गतिम् | परमपदम् | परम गति को | the highest goal |
| याति | प्राप्नोति | प्राप्त करता है | goes |

**भावार्थः**

**संस्कृतम्** – सर्वेषु भूतेषु समरूपेण स्थितं परमात्मानं समरूपेण एव अवलोकयन् मनुष्यः स्वयं स्वस्य हिंसां न करोति, तस्मात् सः परमां गतिं प्राप्नोति।

**हिन्दी** – सभी प्राणियों में समान रूप से स्थित परमात्मा को समरूप से ही देखता हुआ मनुष्य अपने द्वारा अपनी हिंसा नहीं करता है। इस कारण वह परम गति को प्राप्त कर लेता है।

**आंग्लम्** – Because he who sees the lord, seated the same everywhere destroys not the self by the self, therefore he reaches the supreme goal.

www.thearyasamaj.org


## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

हिनस्त्यात्मनात्मानम् – हिनस्ति + आत्मना + आत्मानम्
(यण्सन्धिः) (दीर्घसन्धिः)

ततो याति – ततः + याति (विसर्गसन्धिः)

**(ख) कृदन्तः**

पश्यन् – दृश् + शतृ-पश्यत्

समवस्थितम् – सम् + अव + स्था + क्त

गतिम् – गम् + क्तिन्

**(ग) तद्धितान्तः**

सर्वत्र – सर्व + त्रल्

आत्मना – अत + मनिन्

ततः – तद् + तसिल्

---

## अभ्यासः - 17

### श्लोकः - 22

1. **श्लोकंस्य अनुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान भरें Fill in the blanks according to the verse.]

------ पश्यन् --- --------- --------------------------।
न -------------------- ततो------- -------- ----------॥

2. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पद चुनकर लिखें। Write the words from the verse.]

(क) अव्ययपदम् - (i) -------- (ii) -------- (iii) ---------
(ख) द्वितीयान्तम् (पुं.) - (i) -------- (ii) -------- (iii) ---------
(ग) द्वितीयान्तम् (स्त्री.) - (i) -------- (ii) --------
(घ) क्रियापदम् - (i) -------- (ii) --------

www.thearyasamaj.org


3. **यथोदाहरणं रूपं लिखत–**

[उदाहरण के अनुसार रूप लिखें। Write the words according to the illustration.]

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (i) | दृश् | + | शतृ | = | **पश्यन्** |
| | (ii) | गम् | + | शतृ | = | ------- |
| | (iii) | चल् | + | शतृ | = | ------- |
| | (iv) | स्था | + | शतृ | = | ------- |
| | (v) | पा | + | शतृ | = | ------- |
| | (vi) | भ्रम् | + | शतृ | = | ------- |
| | (vii) | खाद् | + | शतृ | = | ------- |
| | (viii) | लिख् | + | शतृ | = | ------- |
| | (ix) | स्पृश् | + | शतृ | = | ------- |
| | (x) | नश् | + | शतृ | = | ------- |
| | (xi) | नृत् | + | शतृ | = | ------- |

4. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

सर्वत्र --- -------- ------ पश्यन् ---------- --------- हिनस्ति, ------परां -------- याति।

5. **उचितपदेन योजयत–**

[सही पद से मिलायें। Match with the appropriate words.]

| | | |
|---|---|---|
| यथा– | (i) **ईश्वरम्** | (क) जीवम् |
| | (ii) सर्वत्र | (ख) हन्ति |
| | (iii) हि | (ग) **परमात्मानम्** |
| | (iv) आत्मानम् | (घ) निश्चयेन |
| | (v) हिनस्ति | (ङ) प्रत्येकस्थले |

6. **श्लोकानुसारं समाधानं प्रदत्त–**

[श्लोक के अनुसार समाधान दें। Answer the questions according to the verse.]

(i) भक्तः सर्वत्र कं पश्यति? ----------------------------------

(ii) भक्तः सर्वत्र केन रूपेण पश्यति? ----------------------------------

www.thearyasamaj.org



(iii) भक्तः आत्मना आत्मानं किं न करोति? ------------------------------

(iv) भक्तः कां याति? ------------------------------

7. **'क' स्तम्भं 'ख' स्तम्भेन योजयत–**

['क' स्तम्भ को 'ख' स्तम्भ से मिलाएँ। Match 'ka' with 'kha' column.]

| **'क'** | | **'ख'** | |
|---|---|---|---|
| (i) | पश्यन् | (क) | गतिम् इत्यस्य विशेषणम् |
| (ii) | पराम् | (ख) | त. पुं. प्र. एक. |
| (iii) | हि | (ग) | क्रियापदम् |
| (iv) | आत्मना | (घ) | अव्ययम् |
| (v) | याति | (ङ) | न. पुं. तृ. एक. |

www.thearyasamaj.org


## श्लोकः

**प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।**
**यः पश्यति तथात्मानमकर्तारं स पश्यति ॥23॥** (भ.गी. 13.29)

## पदच्छेदः

प्रकृत्या एव च कर्माणि क्रियमाणानि सर्वशः।
यः पश्यति तथा आत्मानम् अकर्तारम् सः पश्यति॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| प्रकृत्या | इ. स्त्री. तृ. एक. | पश्यति | दृश्–कर्तरि लट् प्रपु. एक. |
| एव | अव्ययम् | तथा | तद्धितान्तम् अव्ययम् |
| च | अव्ययम् | आत्मानम् | आत्मन्–न. पुं. द्विती. एक. |
| कर्माणि | कर्मन्–न. नपुं. द्विती. बहु. | अकर्तारम् | ऋ. पुं. द्विती. एक. समस्तम् |
| क्रियमाणानि | अ. नपुं. द्विती. बहु | अनहङ्कारः | तद्–द. (सर्व.) पुं. प्र. एक. |
| सर्वशः | तद्धितान्तम् अव्ययम् | पश्यति | दृश्–कर्तरि लट् प्रपु. एक. |
| यः | यद्–द. (सर्व.) पुं. प्र. एक. | | |

## आकाङ्क्षा

**पश्यति।**

| | |
|---|---|
| कानि पश्यति? | कर्माणि पश्यति। |
| कीदृशानि कर्माणि पश्यति? | क्रियमाणानि कर्माणि पश्यति। |
| कया क्रियमाणानि कर्माणि पश्यति? | प्रकृत्या एव क्रियामाणानि कर्माणि पश्यति। |
| केन प्रकारेण प्रकृत्या क्रियमाणानि कर्माणि पश्यति? | सर्वशः प्रकृत्या क्रियमाणानि कर्माणि पश्यति। |
| पुनश्च कं पश्यति। | तथा आत्मानं पश्यति। |
| कीदृशम् आत्मानं पश्यति? | अकर्तारम् आत्मानं पश्यति। |
| कः पश्यति? | यः (मनुष्यः) पश्यति। |
| एतादृशः मनुष्यः किं करोति? | सः (एव वस्तुतः) पश्यति। |

www.thearyasamaj.org


**अन्वयः**

यः च कर्माणि सर्वशः प्रकृत्या एव क्रियमाणानि तथा आत्मानम् अकर्तारं पश्यति, सः (वस्तुतः) पश्यति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | मनुष्यः | जो मनुष्य | The person who |
| कर्माणि | क्रियाः | सभी कर्मों को | actions |
| सर्वशः | सर्वप्रकारेण | हर प्रकार से | with all |
| प्रकृत्या | सहजतया | प्रकृति के द्वारा | by *Prakṛti* |
| क्रियमाणानि | अनुष्ठीयमानानि | किये जाते हुए | being performed |
| तथा | एवम् | और | so also |
| आत्मानम् | जीवम् | अपने को | the self |
| अकर्तारम् | कर्तृत्वरहितम् | अकर्ता रूप में | actionless |
| पश्यति | अवलोकयति | देखता है | sees |
| सः | एतादृशः मनुष्यः | ऐसा मनुष्य | he |
| पश्यति | वस्तुतः अवलोकयति | वस्तुतः देखता है | sees |

**भावार्थः**

**संस्कृतम्** – यः मनुष्यः सर्वाणि अपि कर्माणि सर्वप्रकारेण प्रकृतिद्वारा एव अनुष्ठीयमानानि पश्यति, तथा च यः आत्मानम् अर्थात् जीवं कर्तृत्वरहितम् अवलोकयति; सः एव मनुष्यः वास्तविकः द्रष्टा अस्ति।

**हिन्दी** – जो मनुष्य सभी कर्मों को हर प्रकार से प्रकृति के द्वारा ही किया जाता हुआ देखता है तथा अपने आपको कर्तृत्वविहीन मानता है; वही मनुष्य वास्तविक द्रष्टा है।

**आंग्लम्** – He verily sees, who sees that all actions are done by *prakṛti* alone and that the *Ātman* is actionless.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

प्रकृत्यैव – प्रकृत्या + एव (वृद्धिसन्धिः)

www.thearyasamaj.org


तथात्मानम् - तथा + आत्मानम् (दीर्घसन्धिः)
स पश्यति - सः + पश्यति (विसर्गसन्धिः)

**(ख) समासः**

अकर्तारम् - न कर्ता अकर्ता (नञ्तत्पुरुषः) तम्

**(ग) कृदन्तः**

प्रकृत्या - प्र + कृ + क्तिन्-प्रकृति
क्रियमाणानि - कृ + यक् + शानच्-क्रियमाण, कर्मणि प्रयोगः (कर्मणि यक् प्रत्ययः)
अकर्तारम् - अ + कृ + तृच् = अकर्तृ

**अवधेयम्**
**शानच् प्रत्ययः, कर्मणि प्रयोगः**

## अभ्यासः - 18

### श्लोकः - 23

1. **श्लोकानुसारम् उचितेन पदेन रिक्तस्थानं पूरयत–**

[श्लोकानुसार सही पद से रिक्त स्थान को भरें। Fill in the blanks with appropriate words according to the verse.]

---------- च कर्माणि ----------------- ------------।
यः ------------ ----------------- स-------------॥

2. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पदों को चुनकर लिखें। Write the words from the verse.]

(क) प्रथमान्तपदम् - (i) --------- (ii) --------
(ख) द्वितीयान्तपदम् - (i) --------- (ii) -------- (iii) ------- (iv) --------
(ग) अव्ययपदम् - (i) --------- (ii) -------- (iii) -------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) प्रकृत्या = **प्रकृति**
(ii) कर्माणि = ----------

www.thearyasamaj.org


(iii) आत्मानम् = ----------

(iv) अकर्तारम् = ----------

(v) य: = ----------

4. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद कर लिखें। Disjoin the *Sandhi*.]

**यथा–** (i) प्रकृत्यैव = **प्रकृत्या + एव**

(ii) सदैव = ---------------------

(iii) तथैव = ---------------------

(iv) बालिकैषा = ---------------------

(v) मालैका = ---------------------

(vi) तथात्मानम् = **तथा + आत्मानम्**

(vii) महात्मानम् = ---------------------

(viii) विद्यालय: = ---------------------

(ix) पूर्णाधार: = **पूर्ण + आधार:**

(x) विवेकानन्द: = ---------------------

5. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction of the verse.]

य: च ------ --------- --------- --------- क्रियमाणानि ------ ---------
अकर्तारं --------- स: ----------- -----------।

6. **उचितपदेन योजयत–**

[सही पद से मिलायें। Match with the appropriate words.]

| | |
|---|---|
| (i) कर्माणि | (क) अनुभवति |
| (ii) प्रकृत्या | (ख) सर्वप्रकारेण |
| (iii) अकर्तारम् | (ग) कार्याणि |
| (iv) सर्वश: | (घ) मायया |
| (v) पश्यति | (ङ) कर्तृरहितम् |

www.thearyasamaj.org


7. **पदपरिचयं प्रदत्त–**

[पद–परिचय दें। Identify the words.]

(i) प्रकृत्या = ------------------------

(ii) कर्माणि = ------------------------

(iii) आत्मानम् = ------------------------

(iv) अकर्तारम् = ------------------------

(v) तथा = ------------------------

www.thearyasamaj.org



**श्लोकः**

**यदा भूतपृथग्भावमेकस्थमनुपश्यति ।**
**तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ॥24॥** (भ.गी. 13.30)

**पदच्छेदः**

यदा भूत–पृथक्–भावम् एकस्थम् अनुपश्यति।
ततः एव च विस्तारम् ब्रह्म सम्पद्यते तदा॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यदा | तद्धितान्तम् अव्ययम् | एव | अव्ययम् |
| भूतपृथग्भावम् | अ. पुं. द्विती. एक. समस्तम् | च | अव्ययम् |
| | | विस्तारम् | अ. पुं. द्विती. एक. |
| एकस्थम् | अ. पुं. द्विती. एक. समस्तम् | ब्रह्म | ब्रह्मन् – न. नपुं. द्विती. एक. |
| अनुपश्यति | अनु + दृश् – कर्तरि लट् प्रपु. एक. | सम्पद्यते | सम् + पद् – कर्तरि आत्मनेपदे लट् प्रपु. एक. |
| ततः | तद्धितान्तम् अव्ययम् | तदा | तद्धितान्तम् अव्ययम् |

**आकाङ्क्षा**

**(मनुष्यः) अनुपश्यति।**

| | |
|---|---|
| (मनुष्यः) कम् अनुपश्यति? | भूतपृथग्भावम् अनुपश्यति। |
| भूतपृथग्भावं कथम्भूतं पश्यति? | भूतपृथग्भावम् एकस्थम् अनुपश्यति। |
| पुनश्च किम् अनुपश्यति? | विस्तारं च अनुपश्यति। |
| कस्मात् विस्तारम् अनुपश्यति? | ततः (एकस्थात्) एव विस्तारम् अनुपश्यति। |

**सम्पद्यते।**

| | |
|---|---|
| (सः) किं सम्पद्यते? | (सः) ब्रह्म सम्पद्यते। |
| सः कदा ब्रह्म सम्पद्यते? | यदा सः भूतपृथग्भावम् एकस्थम् अनुपश्यति ततः एव विस्तारं च (अनुपश्यति) तदा सः ब्रह्म सम्पद्यते। |

www.thearyasamaj.org


**अन्वयः**

यदा (मनुष्यः) भूतपृथग्भावम् एकस्थं ततः एव च विस्तारं अनुपश्यति, तदा (सः) ब्रह्म सम्पद्यते।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यदा | यस्मिन् समये | जिस समय | When |
| भूतपृथग्भावम् | प्राणिनां पृथक् आकारान् | प्राणियों के भिन्न-भिन्न स्वरूपों को | the whole veriety of beings |
| एकस्थम् | एकस्मिन्नेव स्वरूपे | एक ही स्वरूप में | resting in the one |
| ततः एव | एकस्मात् स्वरूपादेव | उसी एकरूप से ही | form that alone |
| विस्तारम् | भेदादिकम् | विस्तार (भेदों) को | the spreading |
| अनुपश्यति | अनुभवति | महसूस करता है | sees |
| तदा | तस्मिन् समये | तब | then |
| ब्रह्म | परमतत्त्वं | ब्रह्मतत्त्व को | *Brahman* |
| सम्पद्यते | प्राप्नोति | प्राप्त हो जाता है | becomes |

**भावार्थः**

**संस्कृतम्** – यस्मिन् समये मनुष्यः प्राणिनां भिन्नान्-भिन्नान् आकारान् एकस्मिन् आकारे अनुभवति, तस्मात् एकस्मात् रूपात् एव सर्वेषां विस्तारं च अनुभवति, तस्मिन् समये सः ब्रह्मतत्त्वं प्राप्नोति।

**हिन्दी** – जब मनुष्य प्राणियों के भिन्न-भिन्न स्वरूपों को एक स्वरूप में अनुभव करता है, उसी से सभी का विस्तार देखता है, उस समय वह ब्रह्मतत्त्व को प्राप्त हो जाता है।

**आंग्लम्** – when he realizes the whole veriety of beings as resting in the one and is as evolution from that one alone, then he becomes *Brahman*.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

भूतपृथग्भावम् = भूतपृथक् + भावम् (जश्त्वसन्धिः)

तत एव = ततः + एव (विसर्गसन्धिः)

www.thearyasamaj.org


(ख) **समास:**

भूतपृथग्भावम् = भूतानां पृथग्भाव: = भूतपृथग्भाव: (षष्ठीतत्पुरुष:) तम्

एकस्थम् = एकस्मिन् तिष्ठति इति एकस्थ: (उपपदतत्पुरुष:) तम्

(ग) **कृदन्त:**

भूत = भू + क्त

भावम् = भू + घञ्

विस्तारम् = वि + स्तृ + घञ्

ब्रह्म = बृंह् + मनिन्-ब्रह्मन्

(घ) **तद्धितान्त:**

यदा = यद् + दा

तत: = तद् + तसिल्

तदा = तद् + दा

---

## अभ्यास: - 19

### श्लोक: - 24

1. **श्लोकानुसारम् उचितेन पदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान को भरें। Fill in the blanks with the appropiate word according to the verse.]

यदा ----------------------------------------।

तत एव ---- ------------ ब्रह्म---------- ------॥

2. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पदों को चुनकर लिखें। Write the words from the verse.]

(क) अव्ययपदम् - (i) ------- (ii) ------- (iii) -------

(ख) द्वितीयान्तं पदम् - (i) ------- (ii) ------- (iii) ------- (iv) --------

(ग) क्रियापदम् - (i) --------------- (ii) ---------------

3. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) भूतपृथग्भावम् = ------------------

(ii) ब्रह्म = ------------------

www.thearyasamaj.org


(iii) विस्तारम् = ------------------

(iv) एकस्थम् = ------------------

**4. सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद कर लिखें। Disjoin the *Sandhi*.]

**यथा–** (i) पृथग्भावम् = **पृथक् + भावम्**

(ii) वाग्दानम् = ------------------

(iii) स्रग्धरा = ------------------

(iv) वागीशः = ------------------

(v) सद्भावः = **सत् + भावः**

(vi) सदाचारः = ------------------

(vii) यदेकम् = ------------------

(viii) महदस्ति = ------------------

(ix) षडाननः = **षट् + आननः**

(x) षडेव = ------------------

(xi) षडशीतिः = ------------------

**5. अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction of the verse.]

यदा ------------ ------------ एकस्थम् ------ --- --- ----------
---------- ------------- ------- ब्रह्म ------------।

**6. उचितपदेन योजयत–**

[सही पद से मिलायें। Match with the appropriate words.]

**यथा–** (i) **ब्रह्म** — (ग) **सम्पद्यते**

| | |
|---|---|
| (i) **ब्रह्म** | (क) भूतानाम् |
| (ii) पृथग्भावम् | (ख) अनुपश्यति |
| (iii) ततः एव | (ग) **सम्पद्यते** |
| (iv) एकस्थम् | (घ) तदा |
| (v) यदा | (ङ) विस्तारम् |

www.thearyasamaj.org


**श्लोकः**

**अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः ।**
**शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ॥25॥** (भ.गी. 13.31)

**पदच्छेदः**

अनादित्वात् निर्गुणत्वात् परमात्मा अयम् अव्ययः।
शरीरस्थः अपि कौन्तेय न करोति न लिप्यते।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अनादित्वात् | अ. नपुं. पं. एक. समस्तम् | अपि | अव्ययम् |
| निर्गुणत्वात् | अ. नपुं. पं. एक. | कौन्तेय | अ. पुं. सम्बो. एक. |
| परमात्मा | परमात्मन् – न. पुं. प्र. एक. समस्तम् | न | अव्ययम् |
| | | करोति | कृ – कर्तरि लट् प्रपु. एक. |
| अयम् | इदम् – म. (सर्व.) पुं. प्र. एक. | न | अव्ययम् |
| | | लिप्यते | लिप् – भावे आत्मनेपदे लट् प्रपु. एक. |
| अव्ययः | अ. पुं. प्र. एक. समस्तम् | | |
| शरीरस्थः | अ. पुं. प्र. एक. समस्तम् | | |

**आकाङ्क्षा**

**कौन्तेय! ( कर्म ) न करोति।**

| | |
|---|---|
| कः (कर्म) न करोति? | परमात्मा (कर्म) न करोति। |
| कः परमात्मा न करोति? | अयम् परमात्मा न करोति। |
| कीदृशः अयम् परमात्मा न करोति? | अव्ययः अयम् परमात्मा न करोति। |
| कस्मात् कारणात् अयम् अव्ययः? | अनादित्वात् अयम् अव्ययः। |
| पुनश्च कस्मात् कारणात् अयम् अव्ययः? | निर्गुणत्वात् अयम् अव्ययः। |
| कथम्भूतः अपि अयम् अव्ययः परमात्मा न करोति? | शरीरस्थः अपि अयम् अव्ययः परमात्मा न करोति। |
| पुनश्च अयम् अव्ययः शरीरस्थः अपि किं न भवति? | अयम् अव्ययः शरीरस्थः अपि न लिप्यते। |

www.thearyasamaj.org


**अन्वयः**

हे कौन्तेय! अयम् (परमात्मा) अनादित्वात्, निर्गुणत्वात् (च) अव्ययः शरीरस्थः अपि न करोति, न लिप्यते।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| कौन्तेय! | अर्जुन! | अर्जुन! | O *Arjuna*! |
| अयम् | एषः | यह | this |
| परमात्मा | परमात्मा | परमात्मा | the Supreme self |
| अनादित्वात् | आदिरहितत्वात् | अनादि होने से | being without beginnings |
| निर्गुणत्वात् | गुणरहितत्वात् | गुणों से रहित होने से | being devoid of *Guṇas* |
| अव्ययः | अविनाशी | अविनाशी | imperishable |
| शरीरस्थः | देहस्थितः | शरीर में रहता हुआ | dwelling in this body |
| न करोति | न विदधाति | नहीं करता है | not acts |
| न लिप्यते | निर्लिप्तः भवति | नहीं लिप्त होता है | not is tainted |

**भावार्थः**

**संस्कृतम्** – अर्जुन! एष परमात्मा आदिरहितः गुणरहितश्च अस्ति। तस्मात् कारणात् एषः अव्ययः वर्तते। एषः देहे स्थित्वा अपि न किञ्चित् करोति, न च केनचित् कर्मणा लिप्यते एव।

**हिन्दी** – हे अर्जुन! यह परमात्मा आदि रहित है व गुण रहित है ; इसीलिए यह अविनाशी है। यह देह में स्थित होकर भी न कुछ करता है और न किसी कर्म से लिप्त ही होता है।

**आंग्लम्** – Having no beginning and possessing no *Guṇas* this supreme self imperishable, though dwelling in the body, O *kaunteya*, neither acts nor is tainted.

www.thearyasamaj.org


## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

अनादित्वान्निर्गुणत्वात् – अनादित्वात् + निर्गुणत्वात् (अनुनासिकसन्धिः)

परमात्मायम् – परम + आत्मा + अयम्

(दीर्घसन्धिः)

शरीरस्थोऽपि – शरीरस्थः + अपि (विसर्गसन्धिः)

**(ख) समासः**

अनादिः – अविद्यमानः आदिः यस्य सः अनादिः (बहुव्रीहिः)

परमात्मा – परमश्चासौ आत्मा परमात्मा (कर्मधारयः)

अव्ययः – अविद्यमानः व्ययः यस्य सः अव्ययः (बहुव्रीहिः)

शरीरस्थः – शरीरे तिष्ठति इति शरीरस्थः (उपपदतत्पुरुषः)

**(ग) कृदन्तः**

अव्ययः – अ + वि + इ + अच्

शरीर – शॄ + ईरन्

**(घ) तद्धितान्तः**

अनादित्वात् – अनादेः भावः, अनादि + त्व = अनादित्वम्, तस्मात् (तस्य भावस्त्वतलौ)

निर्गुणत्वात् – निर्गुणस्य भावः, निर्गुणः + त्व = निर्गुणत्वम्, तस्मात्

कौन्तेय – कुन्त्याः अपत्यं पुमान्, कुन्ती + ढक्

www.thearyasamaj.org


## अभ्यासः - 20
### श्लोकः - 25

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार सही पद से रिक्त स्थान पूरा करें। Fill in the blanks with the appropriate word according to the verse.]

अनादित्वा -------------------- ---------------------।

--------------- कौन्तेय --- ------------- ---- ---------॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पद चुनकर लिखें। Write the words from verse according to the instructions.]

(क) प्रथमान्तपदम् - (i) -------- (ii) -------- (iii) ------- (iv) --------

(ख) पञ्चम्यन्तपदम् - (i) -------- (ii) --------

(ग) अव्ययपदम् - (i) -------- (ii) --------

(घ) क्रियापदम् - (i) -------- (ii) --------

3. **सन्धिं सन्धिविच्छेदं वा कुरुत–**

[यथोचित सन्धि कार्य करें। Join/disjoin the *Sandhi*.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) | **परमात्मा** | = | **परम** | + | **आत्मा** |
| | (ii) | ---------- | = | देव | + | आलयः |
| | (iii) | हिमालयः | = | ------- | + | ------- |
| | (iv) | देवात्मा | = | ------- | + | ------- |
| | (v) | ---------- | = | मम | + | आशयः |
| **यथा–** | (vi) | **अनादित्वान्निर्गुणत्वात्** | = | **अनादित्वात्** | + | **निर्गुणत्वात्** |
| | (vii) | तस्मान्मुनेः | = | तस्मात् | + | ------- |
| | (viii) | ------------ | = | तत् | + | न |
| | (ix) | जगन्नाथः | = | ------- | + | नाथः |
| | (x) | चिन्मयम् | = | ------- | + | ------- |

www.thearyasamaj.org


4. **प्रश्नम् उत्तरेण यथोचितं योजयत–**

[प्रश्न का उत्तर से सही मिलान करें। Match the appropriate answer with the question.]

**यथा–** (i) **अयम् कीदृशः?** — (ग) **अव्ययः**

| | |
|---|---|
| (i) **अयम् कीदृशः?** | (क) परमात्मनि |
| (ii) कौन्तेयः कः? | (ख) निर्गुणत्वात् |
| (iii) आत्मा कस्मात् न लिप्यते? | (ग) **अव्ययः** |
| (iv) अनादित्वं कस्मिन् अस्ति? | (घ) अर्जुनः |

5. **अन्वयं पूरयत–**

[अन्वय पूर्ण करें। Complete the construction of the verse.]

हे कौन्तेय! ------ ------------- ------------ निर्गुणत्वात् -------- --------

--------- अपि ---- करोति ------- ----------------।

6. **उचितेन पदेन योजयत–**

[उचित पद से मिलायें। Match with the appropriate words.]

**यथा–** (i) **अयम्** — (ग) **एषः**

| | |
|---|---|
| (i) **अयम्** | (क) नित्यत्वात् |
| (ii) परमात्मा | (ख) देहस्थः |
| (iii) अनादित्वात् | (ग) **एषः** |
| (iv) शरीरस्थः | (घ) लिप्तः भवति |
| (v) लिप्यते | (ङ) अव्ययः |

www.thearyasamaj.org


**श्लोकः**

**यथा सर्वगतं सौक्ष्म्यादाकाशं नोपलिप्यते।**
**सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥26॥** (भ.गी. 13.32)

**पदच्छेदः**

यथा सर्वगतम् सौक्ष्म्यात् आकाशम् न उपलिप्यते।
सर्वत्र अवस्थितः देहे तथा आत्मा न उपलिप्यते॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यथा | तद्धितान्तम् अव्ययम् | अवस्थितः | अ. पुं. प्र. एक. |
| सर्वगतम् | अ. नपुं. प्र. एक. समस्तम् | देहे | अ. पुं. सप्त एक. |
| सौक्ष्म्यात् | अ. नपुं. पं. एक. | तथा | तद्धितान्तम् अव्ययम् |
| आकाशम् | अ. नपुं. प्र. एक. | आत्मा | आत्मन् – न. पुं. प्र. एक. |
| न | अव्ययम् | न | अव्ययम् |
| उपलिप्यते | उप + लिम्प् – कर्मणि लट् प्रपु. एक. | उपलिप्यते | उप + लिम्प् – कर्मणि लट् प्रपु. एक. |
| सर्वत्र | तद्धितान्तम् अव्ययम् | | |

**आकाङ्क्षा**

**न उपलिप्यते।**

| | |
|---|---|
| किं न उपलिप्यते? | आकाशं न उपलिप्यते। |
| कीदृशम् आकाशं न उपलिप्यते? | सर्वगतम् आकाशं न उपलिप्यते। |
| कस्मात् कारणात् सर्वगतम् आकाशं न उपलिप्यते? | सौक्ष्म्यात् सर्वगतम् आकाशं न उपलिप्यते। |

**न उपलिप्यते।**

| | |
|---|---|
| पुनश्च कः न उपलिप्यते? | आत्मा न उपलिप्यते। |
| किम्भूतः आत्मा न उपलिप्यते? | अवस्थितः आत्मा न उपलिप्यते। |
| कुत्र अवस्थितः आत्मा न उपलिप्यते? | सर्वत्र अवस्थितः आत्मा न उपलिप्यते। |

www.thearyasamaj.org


| | |
|---|---|
| सर्वत्र अवस्थितः आत्मा कस्मिन् न उपलिप्यते? | सर्वत्र अवस्थितः आत्मा देहे न उपलिप्यते। |
| कथम् आत्मा देहे न उपलिप्यते। | यथा (उपर्युक्तम्) आकाशं न उपलिप्यते तथा अयम् आत्मा देहे न उपलिप्यते। |

## अन्वयः

यथा सर्वगतम् आकाशं सौक्ष्म्यात् (कुत्रापि) न उपलिप्यते तथा सर्वत्र अवस्थितः आत्मा देहे न उपलिप्यते।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यथा | येन प्रकारेण | जैसे | As |
| सर्वगतम् | सर्वव्यापी | सर्वत्र व्याप्त | the all pervading |
| आकाशम् | गगनम् | आकाश | ether |
| सौक्ष्म्यात् | सूक्ष्मतायाः कारणात् | सूक्ष्म होने के कारण | because of its subtlety |
| न उपलिप्यते | कुत्रापि लिप्तं न भवति | कहीं भी लिप्त नहीं होता है | not is tainted |
| तथा | तेन प्रकारेण | वैसे | so |
| सर्वत्र अवस्थितः | सर्वव्यापकः | सभी जगह व्याप्त | seated everywhere |
| आत्मा | आत्मा | आत्मा | the self |
| देहे | शरीरे | शरीर में | in the body |
| न उपलिप्यते | लिप्तः न भवति | लिप्त नहीं होता है | not tainted |

## भावार्थः

**संस्कृतम्** – येन प्रकारेण सर्वत्र व्याप्तं गगनम् अतिसूक्ष्मतायाः कारणात् कुत्रापि लिप्तं न भवति, तेनैव प्रकारेण सर्वव्यापकः आत्मा कस्मिंश्चित् अपि शरीरे लिप्तः न भवति।

**हिन्दी** – जिस प्रकार सभी जगह फैला हुआ आकाश अति सूक्ष्म होने के कारण कहीं भी लिप्त नहीं होता है। उसी प्रकार सर्वव्यापक आत्मा भी किसी भी शरीर में लिप्त नहीं होता है।

**आंग्लम्** – As the all pervading *Ākāśa* is not tainted, by reason of its subtlety so the self seated in the body everywhere is not tainted.

www.thearyasamaj.org



## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| सौक्ष्म्यादाकाशम् | – | सौक्ष्म्यात् + आकाशम् (जश्त्वसन्धिः) |
| नोपलिप्यते | – | न + उपलिप्यते (गुणसन्धिः) |
| सर्वत्रावस्थितो देहे | – | सर्वत्र + अवस्थितः + देहे<br>(दीर्घसन्धिः) (विसर्गसन्धिः) |
| तथात्मा | – | तथा + आत्मा (दीर्घसन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| सर्वगतम् | – | सर्वं गतम्, सर्वगतम् (आकाशम् इत्यस्य विशेषणम्)<br>(द्वितीयातत्पुरुषः) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| गतम् | – | गम् + क्त |
| अवस्थितः | – | अव + स्था + क्त |
| आकाशम् | – | आ + काश् + घञ् |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| यथा | – | यद् + थाल् (प्रकारार्थे) |
| सौक्ष्म्यात् | – | सूक्ष्म + ष्यञ्, सौक्ष्म्यम् (भावार्थे) |
| सर्वत्र | – | सर्व + त्रल् (स्थानार्थे) |
| तथा | – | तद् + थाल् (प्रकारार्थे) |

---

## अभ्यासः - 21

## श्लोकः - 26

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार सही पद से रिक्त स्थान भरें। Fill in the blanks with appropriate word according to the verse.]

------- सर्वगतं --------------------- --------------।

---------------- --------- तथात्मा ----------------॥

www.thearyasamaj.org


2. **यथानिर्देशं पदानि चित्वा लिखत–**

[निर्देश के अनुसार पद चुनकर लिखें। Write the words according to the instruction.

(क) अव्ययपदम् - (i) ------- (ii) ------- (iii) ------- (iv) --------

(ख) प्रथमान्तपदम् - (i) ------- (ii) ------- (iii) ------- (iv) --------

(ग) सप्तम्यन्तपदम् - (i) -------

3. **अधोलिखितानां शब्दानां पदपरिचयं प्रदत्त–**

[नीचे लिखे शब्दों का पद–परिचय दें। Identify the following words.]

**यथा–** (i) सौक्ष्म्यात् = **अ. नपुं. पं. एक.**

(ii) अवस्थितः = ---------------

(iii) सर्वत्र = ---------------

(iv) आत्मा = ---------------

(v) उपलिप्यते = ---------------

4. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद कर लिखें। Disjoin the *Sandhi*.]

**यथा–** (i) नोपलिप्यते = **न + उपलिप्यते**

(ii) चोपदेशः = -----------------

(iii) तवोपकार = -----------------

(iv) ममोपवासः = -----------------

(v) सौक्ष्म्यादाकाशम् = **सौक्ष्म्यात् + आकाशम्**

(vi) नगरादागतः = -----------------

(vii) गृहादपि = -----------------

(viii) पठेदिति = -----------------

5. **सन्धिं कुरुत–**

[सन्धि करें। Join the *Sandhi*.]

**यथा–** (i) वाक् + ईशः = **वागीशः**

(ii) सत् + आचारः = --------------

(iii) महत् + अन्तरम् = --------------

(iv) दिक् + अम्बरः = --------------

www.thearyasamaj.org


(v) दिक् + अन्तः = --------------

(vi) दृक् + इन्द्रियम् = --------------

6. **यथोचितं रिक्तस्थानं पूरयत–**

[उचित प्रकार से रिक्त स्थान भरें। Fill in the blanks appropriately.]

यथा– (i) **सौक्ष्म्यम्** = **सूक्ष्मस्य भावः**

(ii) मौर्ख्यम् = -------------- भावः

(iii) ---------- = सुन्दरस्य भावः

(iv) ---------- = मधुरस्य भावः

(v) दौर्बल्यम् = -------------- -------

(vi) जाड्यम् = -------------- -------

(vi) साम्यम् = -------------- -------

(vi) ---------- = विषमस्य भावः

7. **प्रदत्तानां पदानां कृदन्तपरिचयं प्रदत्त–**

[दिये गए पदों का कृदन्त परिचय दें। Identify the *Kṛdanta*.]

(i) अवस्थितः = ----------------------------------

(ii) आकाशम् = ----------------------------------

(iii) सर्वगतम् = ----------------------------------

(iv) देहे = ----------------------------------

8. **समाधानं प्रदत्त–**

[समाधान दें। Answer the questions.]

(i) देहे कः न उपलिप्यते? ----------------------------------

(ii) सर्वगतं किम् अस्ति? ----------------------------------

(iii) सर्वत्र कः अवस्थितः? ----------------------------------

(iv) आकाशं कस्मात् न उपलिप्यते? ----------------------------------

9. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि पृथक्पत्रे लिखत–**

[दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using given words.]

(क) यथा (ख) सौक्ष्म्यम् (ग) उपलिप्यते (घ) सर्वत्र

www.thearyasamaj.org


**श्लोकः**

**यथा प्रकाशयत्येकः कृत्स्नं लोकमिमं रविः।**
**क्षेत्रं क्षेत्री तथा कृत्स्नं प्रकाशयति भारत॥27॥** (भ.गी. 13.33)

**पदच्छेदः**

यथा प्रकाशयति एकः कृत्स्नम् लोकम् इमम् रविः।
क्षेत्रं क्षेत्री तथा कृत्स्नम् प्रकाशयति भारत॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यथा | तद्धितान्तम् अव्ययम् | रविः | इ. पुं. प्र. एक. |
| प्रकाशयति | प्र+काश्+णिच् (प्रेरणार्थे) कर्तरि लट्, प्रपु. एक. | क्षेत्रम् | अ. नपुं. द्विती. एक. |
| | | क्षेत्री | क्षेत्रिन् – न. पुं. प्र. एक. |
| एकः | अ. पुं. प्र. एक. (संख्यावाचकः शब्दः) | तथा | तद्धितान्तम् अव्ययम् |
| | | कृत्स्नम् | अ. नपुं. द्विती. एक. विशेषणम् |
| कृत्स्नम् | अ. पुं. द्विती. एक. विशेषणम् | प्रकाशयति | प्र+काश्+णिच् (प्रेरणार्थे) कर्तरि लट् प्रपु. एक |
| लोकम् | अ. पुं. द्विती. एक | | |
| इमम् | इदम् – म. (सर्व.) पुं. द्विती. एक. | भारत | अ. पुं. सम्बो. एक. |

**आकाङ्क्षा**

**यथा प्रकाशयति।**

| | |
|---|---|
| यथा कं प्रकाशयति? | यथा लोकं प्रकाशयति। |
| कथम्भूतं लोकं प्रकाशयति? | इमं कृत्स्नं लोकं प्रकाशयति। |
| कः कृत्स्नं लोकं प्रकाशयति? | रविः कृत्स्नं लोकं प्रकाशयति। |
| कीदृशः रविः कृत्स्नं लोकं प्रकाशयति? | एकः रविः कृत्स्नं लोकं प्रकाशयति। |

**तथा प्रकाशयति।**

| | |
|---|---|
| तथा किं प्रकाशयति? | तथा क्षेत्रं प्रकाशयति। |
| कथम्भूतं क्षेत्रं प्रकाशयति? | कृत्स्नं क्षेत्रं प्रकाशयति। |

www.thearyasamaj.org


| | |
|---|---|
| कः कृत्स्नं क्षेत्रं प्रकाशयति? | क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति। |
| पद्ये सम्बोधनं किम्? | भारत! |

**अन्वयः**

हे भारत! यथा एकः रविः इमं कृत्स्नं लोकं प्रकाशयति तथा क्षेत्री कृत्स्नं क्षेत्रं प्रकाशयति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| भारत! | अर्जुन! | हे अर्जुन! | O *Bhārata!* |
| यथा | येन प्रकारेण | जिस प्रकार | as |
| एकः रविः | सूर्यः | अकेला सूर्य | sun |
| इमं | एनम् | इसे | this |
| कृत्स्नं लोकं | सम्पूर्णं भूमण्डलम् | सम्पूर्ण संसार को | whole world |
| प्रकाशयति | द्योतयति | प्रकाशित करता है | illumines |
| तथा | तेनैव प्रकारेण | उसी प्रकार से | like that |
| क्षेत्री | आत्मा | आत्मा | the lord knower of the field |
| कृत्स्नं क्षेत्रम् | सम्पूर्णं शरीरं | सम्पूर्ण शरीर को | whole of the |
| प्रकाशयति | द्योतयति | प्रकाशित करता है | illumines |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! येन प्रकारेण सूर्यः एकाकी एनं सम्पूर्णं भूमण्डलं द्योतयति, तेनैव प्रकारेण आत्मा एकाकी इदं सम्पूर्णं शरीरं द्योतयति।

**हिन्दी** – हे अर्जुन! जिस प्रकार सूर्य अकेले ही इस सम्पूर्ण संसार को प्रकाशित करता है, ठीक उसी प्रकार यह आत्मा इस सम्पूर्ण शरीर को प्रकाश युक्त करता है।

**आंग्लम्** – As the one sun illumines this whole world so does the Lord of the *kṣetra* illumines O *Bhārata.*

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

प्रकाशयत्येकः – प्रकाशयति + एकः (यणसन्धिः)

www.thearyasamaj.org



(ख) **कृदन्तः**

लोकम् - लोक् + घञ्

(ग) **तद्धितान्तः**

क्षेत्री - क्षेत्रम् अस्य अस्ति इति, (क्षेत्र + इनि)

## अभ्यासः - 22

### श्लोकः - 27

1. **प्रस्तुत-श्लोकगत-पदैः रिक्तं स्थानं पूरयत–**

[प्रस्तुत श्लोक के पदों से रिक्त स्थान भरें। Fill in the blanks with the words of the verse.]

यथा ---------------- --------- लोकमिमं -------।
----- क्षेत्री ----- ----------- --------------भारत।।

2. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

हे भारत! ------ ----- ------ इमं ------- ---------- ---------- तथा ------ ------ --------- प्रकाशयति।

3. **पदपरिचयं प्रदत्त–**

[पद-परिचय दें। Identify the words.]

**यथा–** (i) कृत्स्नम् = **अ. पुं. द्विती. एक.**

(ii) इमम् = --------------------

(iii) क्षेत्री = --------------------

(iv) भारत = --------------------

(v) प्रकाशयति = --------------------

4. **उचितमेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| **यथा–** (i) **यथा** | (अ) इ. पुं. प्र. एक. |
| (ii) एकः | (आ) अ. नपुं. द्विती. एक. |
| (iii) लोकम् | (इ) अ. पुं. प्र. एक. |
| (iv) रविः | (ई) **अव्ययम्** |
| (v) क्षेत्रम् | (उ) अ. पुं. द्विती. एक. |

www.thearyasamaj.org


5. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पद चुनकर लिखें। Write the words from the verse.]

(क) द्वितीयान्तपदम् - (i) -------- (ii) -------- (iii) -------- (iv) --------

(ख) प्रथमान्तपदम् - (i) -------- (ii) -------- (iii) --------

(ग) अव्ययपदम् - (i) -------- (ii) --------

6. **उत्तरं प्रदत्त–**

[उत्तरं दें। Answer the questions.]

(i) कः प्रकाशयति? ----------------------------------

(ii) कं प्रकाशयति? ----------------------------------

(iii) श्लोके 'क्षेत्री' कः अस्ति? ----------------------------------

(iv) 'भारत' इति कस्य सम्बोधनम् अस्ति? ----------------------------------

7. **यथोचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | | |
|---|---|---|
| **यथा–** | (i) **क्षेत्रम् अस्य अस्ति** | (क) दानी |
| | (ii) धनम् अस्य अस्ति | (ख) स्नेही |
| | (iii) गुणः अस्य अस्ति | (ग) रोगी |
| | (iv) दानम् अस्य अस्ति | (घ) **क्षेत्री** |
| | (v) फणः अस्य अस्ति | (ङ) गुणी |
| | (vi) रोगः अस्य अस्ति | (च) धनी |
| | (vii) स्नेहः अस्य अस्ति | (छ) फणी |

8. **उचितेन पदेन योजयत–**

[सही पद से मिलाएँ। Match with the appropriate word.]

| | | |
|---|---|---|
| **यथा–** | (i) **रविः** | (क) सम्पूर्णम् |
| | (ii) इमम् | (ख) जगत् |
| | (iii) कृत्स्नम् | (ग) द्योतयति |
| | (iv) लोकम् | (घ) **सूर्यः** |
| | (v) प्रकाशयति | (ङ) एनम् |

www.thearyasamaj.org


**श्लोकः**

**क्षेत्रक्षेत्रज्ञयोरेवमन्तरं ज्ञानचक्षुषा।**
**भूतप्रकृतिमोक्षं च ये विदुर्यान्ति ते परम् ॥28॥** (भ.गी. 13.34)

**पदच्छेदः**

क्षेत्र-क्षेत्रज्ञयोः एवम् अन्तरम् ज्ञान-चक्षुषा।
भूत-प्रकृति-मोक्षम् च ये विदुः यान्ति ते परम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| क्षेत्रक्षेत्रज्ञयोः | अ. पुं. षष्ठी द्वि. समस्तम् | च | अव्ययम् |
| एवम् | अव्ययम् | ये | यद्–द. (सर्व.) पुं. प्र. बहु. |
| अन्तरम् | अ. नपुं. द्वितो. एक. | विदुः | विद्–कर्तरि लट् प्रपु. बहु. |
| ज्ञानचक्षुषा | ज्ञानचक्षुष्–ष. नपुं. तृ. एक. समस्तम् | यान्ति | या–कर्तरि लट् प्रपु. बहु. |
| | | ते | यद्–द. (सर्व.) पुं. प्र. बहु. |
| भूतप्रकृतिमोक्षम् | अ. पुं. द्विती. एक. समस्तम् | परम् | अ. नपुं. द्विती. एक. |

**आकाङ्क्षा**

**ये विदुः।**

ये कं विदुः? — ये भूतप्रकृतिमोक्षं विदुः।
ये पुनश्च कं विदुः? — ये अन्तरं विदुः।
ये कयोः अन्तरं विदुः? — ये क्षेत्रक्षेत्रज्ञयोः अन्तरं विदुः।
ये केन विदुः? — ये ज्ञानचक्षुषा विदुः।

**यान्ति।**

के यान्ति? — ते (उपर्युक्ताः) यान्ति।
ते कुत्र यान्ति? — ते परं (पदं) यान्ति।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| एवम् | पूर्वोक्तप्रकारेण | इस प्रकार | Thus |
| ये | पूर्वोक्तज्ञानधारिणः | पूर्वोक्त ज्ञान को धारण करने वाले | who |
| ज्ञानचक्षुषा | विद्यानेत्रेण | ज्ञानरूपी नेत्र से | through the eyes of knowledge |
| क्षेत्रक्षेत्रज्ञयोः | क्षेत्राणाम् आत्मनश्च मध्ये | क्षेत्र और क्षेत्रज्ञ (आत्मा) के बीच | between the *kṣetra* and *kṣetrajña* |
| अन्तरम् | भेदम् | अन्तर को | distinction |
| भूतप्रकृतिमोक्षम् | कार्यकारणसहितायाः प्रकृत्याः स्वविच्छेदम् | कार्य–कारणसहित प्रकृति से अपने अलगाव को | the Liberation from the *Prakṛti* of being |
| विदुः | जानन्ति | जानते हैं | know |
| ते | ते जनाः | वे लोग | they |
| परम् | परं पदम् (मोक्षम्) | परम पद को | the Supreme |
| यान्ति | प्राप्नुवन्ति | प्राप्त करते हैं | go |

**भावार्थः**

**संस्कृतम्** – पूर्वोक्तप्रकारेण ज्ञानवन्तः ये जनाः ज्ञाननेत्रेण क्षेत्राणां क्षेत्रज्ञस्य (आत्मनः) च मध्ये भेदं तथा कार्यकारणसहितायाः प्रकृत्याः स्वविच्छेदं जानन्ति, ते जनाः परं पदं प्राप्नुवन्ति।

**हिन्दी** – पूर्वोक्त प्रकार से ज्ञान प्राप्त किये हुए जो लोग अपने ज्ञानरूपी नेत्र से क्षेत्रों और क्षेत्रज्ञ (आत्मा) में भेद को तथा कार्यकारण सहित प्रकृति से अपने अलगाव को जानते हैं, वे लोग परम पद को प्राप्त करते हैं।

**आंग्लम्** – They who perceive with the eye of wisdom this distinction between the *kṣetra* and *kṣetrajña* and the deliverance of beings from *Prakṛti* they go to the supreme.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

| | | |
|---|---|---|
| क्षेत्रक्षेत्रज्ञयोरेवम् | = | क्षेत्रक्षेत्रज्ञयोः + एवम् (विसर्गसन्धिः) |
| विदुर्यान्ति | = | विदुः + यान्ति (विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| क्षेत्रक्षेत्रज्ञयोः | = | क्षेत्रं जानाति इति क्षेत्रज्ञः (उपपदतत्पुरुषः) क्षेत्रं च क्षेत्रज्ञश्च क्षेत्रक्षेत्रज्ञौ (द्वन्द्वः) तयोः |
| ज्ञानचक्षुषा | = | ज्ञानम् एव चक्षुः ज्ञानचक्षुः (कर्मधारयः) तेन |
| भूतप्रकृतिमोक्षम् | = | भूतं च प्रकृतिः च भूतप्रकृती (द्वन्द्वः) भूतप्रकृतिभ्यां मोक्षः (पञ्चमीतत्पुरुषः) तम् |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| क्षेत्रम् | = | क्षि + ष्ट्रन् |
| चक्षुषा | = | चक्ष् + उसि - चक्षुस् |
| भूत | = | भू + क्त |
| प्रकृति | = | प्र + कृ + क्तिन् |
| मोक्षम् | = | मोक्ष् + घञ् - मोक्षः |

**(ङ) क्रियापदम् (तिङन्तम्)**

| | | |
|---|---|---|
| विदुः | = | 'विद' धातोः वर्तमानकालिकः वैकल्पिकः प्रयोगः |

(ii) **पर्यायः**

| | | |
|---|---|---|
| चक्षुः | = | नेत्रं, नयनं, अक्षि |

## अभ्यासः - 23

## श्लोकः - 28

1. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Read the verse and answer the questions.]

(क) ज्ञानिनः कयोः अन्तरं जानन्ति? ----------------------------------

(ख) ते कीदृशेन चक्षुषा अन्तरं जानन्ति? ----------------------------------

www.thearyasamaj.org


(ग) क्षेत्रज्ञः कः अस्ति? --------------------------------

(घ) ज्ञानिनः भूतप्रकृतिभ्यां किं विदुः? --------------------------------

(ङ) एतादृशाः ज्ञानिनः किं प्राप्नुवन्ति? --------------------------------

2. **'क' स्तम्भं 'ख' स्तम्भेन योजयत–**

['क' स्तम्भ को 'ख' स्तम्भ से जोड़ें। Join the 'ka' column with 'kha' column.]

| क | ख |
|---|---|
| (i) ज्ञानचक्षुषा | (क) तिङन्तम् |
| (ii) विदुः | (ख) समस्तं तृतीयान्तम् |
| (iii) परम् | (ग) प्रथमान्तम् |
| (iv) ये | (घ) समस्तं षष्ठ्यन्तम् |
| (v) क्षेत्रक्षेत्रज्ञयोः | (ङ) असमस्तं द्वितीयान्तम् |

3. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write the analytical sentences.]

| | | | | |
|---|---|---|---|---|
| **यथा–** (i) | ज्ञानचक्षुः | = | **ज्ञानम् एव चक्षुः** | **(कर्मधारयः)** |
| (ii) | मानधनम् | = | ---------------------- | (-------) |
| (iii) | गुरुदेवः | = | ---------------------- | (-------) |
| (iv) | विद्याधनम् | = | ---------------------- | (-------) |
| (v) | आचार्यदेवः | = | ---------------------- | (-------) |
| (vi) | पितृदेवः | = | ---------------------- | (-------) |
| (vii) | मातृदेवः | = | ---------------------- | (-------) |
| (viii) | यशोधनम् | = | ---------------------- | (-------) |

4. **शब्दरूपं पूरयत–**

[शब्दरूप पूरा करें। Complete the declension.]

| | एक. | द्वि. | बहु. |
|---|---|---|---|
| **यथा–** (क) | **चक्षुषा** | **चक्षुर्भ्याम्** | **चक्षुर्भिः** |
| (ख) | वपुषा | ------------ | ---------- |
| (ग) | ---------- | ------------ | ते |
| (घ) | ---------- | ------------ | ये |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| (ङ) | ---------- | क्षेत्रज्ञयोः | ---------- |
| (च) | परम् | ------------- | पराणि |
| (छ) | अन्तरम् | ------------- | ---------- |

5. **उचितं योजयत–**

[उचित मेल करें। Match appropriately.]

| | |
|---|---|
| (i) ये | (क) मोक्षम् |
| (ii) ते | (ख) चक्षुषा |
| (iii) अन्तरम् | (ग) विदुः |
| (iv) भूतप्रकृतिभ्यां | (घ) क्षेत्रक्षेत्रज्ञयोः |
| (v) ज्ञानरूपेण | (ङ) यान्ति |

6. **पदपरिचयं प्रदत्त–**

[पद परिचय दें। Identify the words.]

(i) ज्ञानचक्षुषा = ------------------

(ii) ते = ------------------

(iii) एवम् = ------------------

(iv) अन्तरम् = ------------------

(v) क्षेत्रक्षेत्रज्ञयोः = ------------------

www.thearyasamaj.org

# चतुर्दशोऽध्यायः

## श्लोकः

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥29॥** (भ.गी. 14.5)

## पदच्छेदः

सत्त्वम् रजः तमः इति गुणाः प्रकृतिसम्भवाः।
निबध्नन्ति महाबाहो देहे देहिनम् अव्ययम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सत्त्वम् | अ. नपुं. प्र. एक. | निबध्नन्ति | नि + बन्ध्–कर्तरि |
| रजः | रजस्–स. नपुं. प्र. एक. | | लट् प्रपु. बहु. |
| तमः | तमस्–स. नपुं. प्र. एक. | महाबाहो | उ. पुं. सम्बो. एक. समस्तम् |
| इति | अव्ययम् | देहिनम् | देहिन्–न. पुं. द्विती. एक. |
| गुणाः | अ. पुं. प्र. बहु. | अव्ययम् | अ. पुं. द्विती. एक. समस्तम् |
| प्रकृतिसम्भवाः | अ. पुं. प्र. बहु. समस्तम् | | |

## आकाङ्क्षा

श्रीकृष्णः अर्जुनं किं सम्बोधयति? — महाबाहो! इति।

**निबध्नन्ति।**

के कं निबध्नन्ति? — गुणाः देहिनं निबध्नन्ति।

कीदृशं देहिनं निबध्नन्ति? — अव्ययं देहिनं निबध्नन्ति।

कीदृशाः गुणाः देहिनं निबध्नन्ति? — प्रकृतिसम्भवाः गुणाः देहिनं निबध्नन्ति।

प्रकृतिसम्भवाः गुणाः के सन्ति? — सत्त्वं, रजः, तमः इति प्रकृतिसम्भवाः गुणाः सन्ति।

सत्त्वं, रजः, तमः इति गुणाः देहिनं कस्मिन् निबध्नन्ति? — सत्वं, रजः, तमः इति गुणाः देहिनं देहे निबध्नन्ति।

## अन्वयः

हे महाबाहो! प्रकृतिसम्भवाः सत्त्वं, रजः, तमः इति गुणाः अव्ययं देहिनं देहे निबध्नन्ति।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| महाबाहो! | विशालभुजाधारिन् अर्जुन! | विशालबाहु | O mighty armed |
| प्रकृतिसम्भवाः | भौतिकप्रकृत्याः उत्पन्नाः | भौतिक प्रकृति से उत्पन्न | born of *prakṛti* |
| सत्त्वम् | सत्त्वगुणः | सत्त्वगुण | *Sattva* |
| रजः | रजोगुणः | रजोगुण | *Rajas* |
| तमः | तमोगुणः | तमोगुण | *Tamas* |
| इति गुणाः | एते त्रयः गुणाः | ये तीन गुण | these *Guṇas* |
| अव्ययं | अविनाशिनम् | अविनाशी | the indestructible |
| देहिनम् | शरीरस्थम् आत्मानम् | आत्मा को | the embodied |
| देहे | शरीरे | शरीर में | in the body |
| निबध्नन्ति | बध्नन्ति | बाँधते हैं। | bind |

**भावार्थः**

**संस्कृतम्** – हे विशालभुजाधारिन् अर्जुन! भौतिकप्रकृत्याः उत्पन्नाः सत्त्वं, रजः, तमः इति नामकाः त्रयः गुणाः अविनाशिनम् आत्मानं शरीरे बध्नन्ति।

**हिन्दी** – हे विशालबाहो अर्जुन! भौतिक प्रकृति से उत्पन्न सत्त्व, रज और तम नामक तीन गुण अविनाशी आत्मा को शरीर में बाँधते हैं।

**आंग्लम्** – *Sattva, Rajas, Tamas* - these *Guṇas,* O mighty armed born of *prakṛti,* the indestructible embodied one fast in the body.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

रजस्तम इति – रजः + तमः + इति (विसर्गसन्धिः)

**(ख) समासः**

प्रकृतिसम्भवाः – प्रकृत्याः सम्भवः प्रकृतिसम्भवः (पञ्चमीतत्पुरुषः) ते

www.thearyasamaj.org


| | | |
|---|---|---|
| महाबाहो | – | महान्तौ बाहू यस्य सः महाबाहुः (बहुव्रीहिः), हे महाबाहो |
| अव्ययम् | – | अविद्यमानः व्ययः यस्य सः अव्ययः, (बहुव्रीहिः) तम् |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| रजः | – | रञ्ज् + असुन् - रजस् |
| तमः | – | तम् + असुन् |
| प्रकृति | – | प्र + कृ + क्तिन् |
| सम्भवः | – | सम् + भू + अ |
| देहे | – | दिह् + घञ् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| देहिनम् | – | देहः अस्य अस्ति इति देही, तम् (देह + इनि) |
| सत्त्वम् | – | सत् + त्व |

**(ङ) कारकम्**

| | | |
|---|---|---|
| प्रकृत्याः सम्भवति | – | पञ्चमी |

**अवधेयम्**

**पञ्चमीविभक्तिविषये**

## अभ्यासः - 24
## श्लोकः - 29

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान को पूरा करें। Fill in the blanks with the words from the verse.]

----- ----------- इति गुणाः ---------------------।
निबध्नन्ति ------------- ------- -----------------॥

2. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

हे महाबाहो! ------------ सत्त्वं --------- --------- इति गुणाः -------------
---------- देहे -------------।

www.thearyasamaj.org


3. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पद चुनकर लिखें। Write the words form the verse as instructed.]

(क) प्रथमान्तमेकवचनम् - (i) -------- (ii) -------- (iii) ------- (iv) -------

(ख) प्रथमान्तं बहुवचनम् - (i) -------------- (ii) --------------

(ग) सम्बोधनपदम् - (i) --------------

(घ) सप्तम्यन्तपदम् - (i) --------------

4. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) रजः = ---------------

(ii) तमः = ---------------

(iii) देहिनम् = ---------------

(iv) प्रकृतिसम्भवाः = ---------------

(v) महाबाहो = ---------------

5. **यथोचितं विशेषणं विशेष्यं वा लिखत–**

[उचित विशेषणं या विशेष्य लिखें। Write the appropriate qualifier or qualified.]

| | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|
| (i) | ----------- | गुणाः |
| (ii) | अव्ययम् | ------------- |
| (iii) | ----------- | अर्जुन |
| (iii) | बन्धकः | ------------- |

6. **यथोचितं योजयत–**

[सही मिलान करें। Match appropriately.]

| | | |
|---|---|---|
| यथा– (i) | **सत्त्वम्** | (क) अ. पुं. प्र. बहु. |
| (ii) | देहिनम् | (ख) स. नपुं. प्र. एक. |
| (iii) | देहे | (ग) न. पुं. द्विती. एक. |
| (iv) | गुणाः | (घ) अ. पुं. सप्त एक. |
| (v) | तमः | (ङ) **अ. नपुं. प्र. एक.** |

www.thearyasamaj.org


7. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

| | | | | |
|---|---|---|---|---|
| **यथा–** | (i) | रजस्तमः | = | **रजः + तमः** |
| | (ii) | इतस्ततः | = | ------------- |
| | (iii) | कृष्णस्तथा | = | ------------- |
| | (iv) | अर्जुनस्तदा | = | ------------- |
| | (v) | तम इति | = | **तमः + इति** |
| | (vi) | तत एव | = | ------------- |
| | (vii) | पुरत आयाति | = | ------------- |
| | (viii) | अर्जुन उवाच | = | ------------- |

8. **समाधत्त–**

[समाधान दें। Answer the questions.]

(i) गुणाः कं निबध्नन्ति? ----------------------------------------

(ii) गुणाः के सन्ति? ----------------------------------------

(iii) गुणाः कुतः सम्भवन्ति? ----------------------------------------

(iv) गुणाः देहिनं कुत्र निबध्नन्ति? ----------------------------------------

(v) महाबाहुः कः अस्ति? ----------------------------------------

9. **यथोदाहरणं विग्रहं/विग्रहवाक्यं वा लिखत–**

[उदाहरण के अनुसार विग्रह या विग्रह वाक्य लिखें। Write the compound or analytical sentences as per Example.]

**यथा– (क)**

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | **महाबाहुः** | = | **महान्तौ** | **बाहू** | **यस्य** | **सः** |
| (ii) | महाभुजः | = | -------- | -------- | -------- | -------- |
| (iii) | ------ | = | महान् | कम्बुः | यस्य | सः |
| (iv) | ------ | = | महती | ग्रीवा | यस्य | सः |
| (v) | लम्बकर्णः | = | -------- | कर्णौ | -------- | -------- |
| (vi) | लम्बोदरः | = | -------- | -------- | -------- | -------- |
| (vii) | पीनोदरः | = | पीनम् | -------- | -------- | -------- |

www.thearyasamaj.org


(ख)

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | महायशाः | = | **महत्** | **यशः** | **यस्य** | **सः** |
| (ii) | महातपाः | = | -------- | -------- | -------- | -------- |
| (iii) | महामनाः | = | -------- | -------- | -------- | -------- |

10. **कोष्ठकस्थ-शब्दस्य उचितप्रयोगेन रिक्तस्थानं पूरयत–**

[कोष्ठक में स्थित शब्द के उचित प्रयोग से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate form of the bracketed words.]

**यथा–** (i) गुणाः **प्रकृत्याः** (प्रकृति) सम्भवन्ति।

(ii) नद्यः ------------- (पर्वत) सम्भवन्ति।

(iii) प्रजाः ------------ (प्रजापति) जायन्ते।

(iv) गङ्गा ------------- (हिमालय) प्रभवति।

(v) पक्षी ------------- (अण्ड) उत्पद्यते।

11. **निम्नलिखितप्रातिपादिकानि प्रयुज्य कतिचन वाक्यानि लिखत–**

[निम्नलिखित प्रातिपदिकों के प्रयोग से कुछ वाक्य लिखें। Make the some sentences with nominal stem.]

(i) तमस्  (ii) देहिन्  (iii) महाबाहु  (iv) प्रकृति  (v) रजस्

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥30॥** (भ.गी. 14.6)

## पदच्छेदः

तत्र सत्त्वम् निर्मलत्वात् प्रकाशकम् अनामयम्।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन च अनघ॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| तत्र | तद्धितान्तम् अव्ययम् | सुखसङ्गेन | अ. पुं. तृ. एक. समस्तम् |
| सत्त्वम् | अ. नपुं. प्र. एक. | बध्नाति | बन्ध्–कर्तरि लट् प्रपु. एक. |
| निर्मलत्वात् | अ. नपुं. पं. एक. | ज्ञानसङ्गेन | अ. पुं. तृ. एक. समस्तम् |
| प्रकाशकम् | अ. नपुं. प्र. एक. | च | अव्ययम् |
| अनामयम् | अ. नपुं. प्र. एक. समस्तम् | अनघ | अ. पुं. सम्बो. एक. समस्तम् |

## आकाङ्क्षा

| | |
|---|---|
| पद्ये सम्बोधनं किम्? | अनघ। |
| **बध्नाति।** | |
| हे अनघ! किं (कः गुणः) बध्नाति? | हे अनघ! सत्त्वं बध्नाति। |
| कीदृशं सत्त्वं बध्नाति? | प्रकाशकं सत्त्वं बध्नाति। |
| सत्त्वं केन बध्नाति? | सत्त्वं सुखसङ्गेन बध्नाति। |
| सत्त्वं पुनश्च केन बध्नाति? | सत्त्वं ज्ञानसङ्गेन च बध्नाति। |
| सत्त्वं कस्मात् कारणात् सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति? | सत्त्वं निर्मलत्वात् सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति। |

## अन्वयः

हे अनघ! तत्र प्रकाशकम् अनामयं सत्त्वं निर्मलत्वात् सुखसङ्गेन ज्ञानसङ्गेन च बध्नाति।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अनघ! | हे निष्पाप अर्जुन! | हे निष्पाप अर्जुन | O Sinless one |
| तत्र | त्रिषु गुणेषु | तीनों गुणों में | of these |
| सत्त्वम् | सत्त्वनामकः गुणः | सत्त्व गुण | *Sattva* |
| प्रकाशकम् | ज्ञानस्य द्योतकम् | ज्ञान का प्रकाशक | luminous |
| अनामयम् | रोगरहितम् | विकारों से रहित | healthy |
| निर्मलत्वात् | शुद्धतायाः कारणात् | शुद्ध होने के कारण | from its stainlessness |
| सुखसङ्गेन | सुखस्य सङ्गत्या | सुख के सङ्ग से | by attachment to happiness |
| ज्ञानसङ्गेन | ज्ञानस्य अभिमानेन | ज्ञान के सङ्ग से उपजे अभिमान से | by attachment to knowledge |
| बध्नाति | अधिगृह्णाति | बान्धता है | binds |

**भावार्थः**

**संस्कृतम्** – हे निष्पाप अर्जुन! तेषु त्रिषु गुणेषु सत्त्वगुणः ज्ञानस्य प्रकाशकः, समग्रविकारैः रहितश्च अस्ति। सः सर्वेभ्यः निर्मलः, अतः सुखस्य सङ्गत्या ज्ञानस्य च अभिमानेन जीवं बध्नाति।

**हिन्दी** – हे निष्पाप अर्जुन! उन तीनों गुणों में सत्त्व गुण ज्ञान का प्रकाशक व सभी विकारों से रहित है। वह सब से निर्मल होने के कारण सुख की सङ्गति से तथा ज्ञान के अभिमान से जीव को बाँधता है।

**आंग्लम्** – Of these *Sattva*, being stainless is luminous and unobstructive. It binds, O sinless one by creating attachment to happiness and attachment to knowledge.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

चानघ – च + अनघ (दीर्घसन्धिः)

www.thearyasamaj.org


(ख) **समासः**

| | | |
|---|---|---|
| अनामयम् | – | आमयस्य अभावः (नञ् तत्पुरुषः) |
| सुखसङ्गेन | – | सुखस्य सङ्गः सुखसङ्गः (षष्ठीतत्पुरुषः) तेन |
| ज्ञानसङ्गेन | – | ज्ञानस्य सङ्गः ज्ञानसङ्गः (षष्ठीतत्पुरुषः) तेन |
| अनघ | – | न अघः अनघः (नञ् तत्पुरुषः), हे अनघ |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| प्रकाशकम् | – | प्र + काश् + ण्वुल् |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| तत्र | – | तद् + त्रल् |
| निर्मलत्वात् | – | निर् + मल + त्व (निर्मलस्य भावः निर्मलत्वम्) |

(ङ) **कारकम्**

सत्त्वं **सुखसङ्गेन** बध्नाति।
सत्त्वं **ज्ञानसङ्गेन** बध्नाति।

**अवधेयम्**

**क्रियापदविषये**

**बन्ध् धातुः लट् लकारः**

| | | | |
|---|---|---|---|
| बध्नाति | बध्नीतः | बध्नन्ति | प्रपु. |
| बध्नासि | बध्नीथः | बध्नीथ | मपु. |
| बध्नामि | बध्नीवः | बध्नीमः | उपु. |

## अभ्यासः - 25

## श्लोकः - 30

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान को पूरा करें। Fill in the blanks with appropriate words according to the verse.]

------- ----------- निर्मलत्वात् -------------------।
सुख ---------- ----------- ज्ञान ------- ----------॥

2. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

**यथा–** (i) सत्त्वम् = **सत्त्व**

(ii) ज्ञानसङ्गेन = ---------

www.thearyasamaj.org


(iii) अनघ = ---------

(iv) निर्मलत्वात् = ---------

(v) अनामयम् = ---------

3. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analysis of the given words.]

**यथा–** (i) सुखसङ्गः = **सुखस्य सङ्गः**

(ii) ज्ञानसङ्गः = ----------------

(iii) अर्थसङ्गः = ----------------

(iv) दुष्टसङ्गः = ----------------

(v) रामसङ्गः = ----------------

(vi) शास्त्रसङ्गः = ----------------

(vii) धर्मसङ्गः = ----------------

4. **यथोचितं योजयत–**

[सही मिलान करें। Match appropriately.]

| | |
|---|---|
| (i) निर्मलत्वात् | अ. नपुं. प्र. एक. |
| (ii) ज्ञानसङ्गेन | अ. पुं. पं. एक. |
| (iii) अनघ | अ. पुं. तृ. एक. |
| (iv) प्रकाशकम् | अ. पुं. सम्बो. एक. |

5. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

हे अनघ! ---- --------- ---------- सत्त्वं ------------- सुखसङ्गेन --------------- ---- बध्नाति।

6. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पदों को चुनकर लिखें। Write the words from the verse as per instruction.]

(क) अव्ययम् - (i) -------- (ii) ----------------

(ख) तृतीयान्तम् - (i) -------- (ii) --------------

(ग) क्रियापदम् - (i) ---------------

www.thearyasamaj.org


7. **श्लोकानुसारं सत्यम् ☑/असत्यम् ☒ सूचयत–**

[श्लोक के अनुसार सत्य ☑/असत्य ☒ सूचित करें। Show the right ☑ or wrong ☒ according to the verse.]

(i) सत्त्वं ज्ञानसङ्गेन देहिनं बध्नाति। ( )

(ii) सत्त्वं आमयम् अस्ति। ( )

(iii) सत्त्वगुणः निर्मलः भवति। ( )

(iv) अर्जुनः सपापः वर्तते। ( )

(v) ज्ञानस्य सङ्गः जीवं न बध्नाति। ( )

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the following words.]

(क) बध्नाति (ख) अनघ (ग) तत्र (घ) अनामयम् (ङ) च

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।**
**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥31॥** (भ.गी. 14.7)

**पदच्छेदः**

रजः रागात्मकम् विद्धि तृष्णा–सङ्ग–समुद्भवम्।
तद् निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| रजः | रजस्–स. नपुं. द्विती. एक. | निबध्नाति | नि+बन्ध्–कर्तरि लट् प्रपु. एक. |
| रागात्मकम् | अ. नपुं. द्विती. एक. समस्तम् | कौन्तेय | अ. पुं. सम्बो. एक. |
| विद्धि | विद्–कर्तरि लोट् मपु. एक. | कर्मसङ्गेन | अ. पुं. तृ. एक. समस्तम् |
| तृष्णासङ्गसमुद्भवम् | अ. नपुं. द्विती. एक. समस्तम् | देहिनम् | देहिन्–न. पुं. द्विती. एक. |
| तत् | तद्–द. (सर्व.) नपुं. प्र. एक. | | |

**आकाङ्क्षा**

**कौन्तेय! (त्वं) विद्धि।**

| | |
|---|---|
| किं विद्धि? | रजः विद्धि। |
| कीदृशं रजः विद्धि? | रागात्मकं रजः विद्धि। |
| पुनश्च कीदृशं रजः विद्धि? | तृष्णासङ्गसमुद्भवं रजः विद्धि। |

**निबध्नाति।**

| | |
|---|---|
| कं निबध्नाति? | देहिनं निबध्नाति। |
| केन देहिनं निबध्नाति? | कर्मसङ्गेन देहिनं निबध्नाति। |
| किं कर्मसङ्गेन देहिनं निबध्नाति? | तत् (रजः) कर्मसङ्गेन देहिनं निबध्नाति। |

**अन्वयः**

हे कौन्तेय! (त्वं) रजः रागात्मकं तृष्णासङ्गसमुद्भवं विद्धि। तत् कर्मसङ्गेन देहिनं निबध्नाति।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हे कौन्तेय | हे कुन्तीपुत्र अर्जुन! | हे कुन्तीपुत्र अर्जुन | O *Kaunteya* |
| रजः | रजो नामकं गुणं | रजोगुण को | *Rajas* |
| रागात्मकम् | कामोद्भवम् | रागमय | of the nature of passion |
| तृष्णासङ्गसमुद्भवम् | लिप्सासङ्गोत्पन्नः | इच्छा की संगति से उत्पन्न | The source of thirst and attachment |
| विद्धि | जानीहि | समझो | know |
| तत् | रजः | रजोगुण | that |
| कर्मसङ्गेन | सकामकर्मणः आसक्त्या | सकाम कर्म की सङ्गति से | by attachment to happiness |
| देहिनम् | जीवम् | जीवात्मा को | the embodied one |
| निबध्नाति | बध्नाति | बान्धता है | binds |

**भावार्थः**

**संस्कृतम्** – हे कुन्तीपुत्र अर्जुन! रजोगुणं लिप्सादिसङ्गत्या उत्पन्नं जानीहि। अयं रजोगुणः शरीरस्थम् आत्मानं सकामकर्मणः सङ्गत्या बध्नाति।

**हिन्दी** – हे कुन्तीपुत्र अर्जुन! रजोगुण रागात्मक है और यह लिप्सादि की सङ्गति से उत्पन्न होता है। यह गुण आत्मा को सकामकर्म की सङ्गति से शरीर में बाँधता है।

**आंग्लम्** – Know *Rajas* to be of the nature of passion, the source of thirst and attachment; it binds fast, O *kaunteya* the embodied one by attachment to action.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

रजो रागात्मकम् = रजः + रागात्मकम् (विसर्गसन्धिः)

तन्निबध्नाति = तत् + निबध्नाति (अनुनासिकसन्धिः)

**(ख) समासः**

रागात्मकम् = रागः आत्मा यस्य तत् रागात्मकम् (बहुव्रीहिः)

www.thearyasamaj.org


| | | |
|---|---|---|
| तृष्णासङ्गसमुद्भवम् | = | तृष्णा च सङ्गश्च, तृष्णासङ्गौ (द्वन्द्वः) तृष्णासङ्गयोः समुद्भवम् (षष्ठीतप्तुरुषः) |
| कर्मसङ्गेन | = | कर्मणः सङ्गः कर्मसङ्गः (षष्ठीतत्पुरुषः) तेन |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| तृष्णा | = | तृष् + न + टाप् |
| समुद्भवम् | = | सम् + उद् + भू + अप् |
| रागः | = | रञ्ज् + घञ् (नलोपः, कुत्वम्) |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| कौन्तेय | = | (कुन्त्याः अपत्यं पुमान्) कुन्ती + ढक् |
| देहिनम् | = | (देहः अस्य अस्ति इति देही, तम्) देह + इनि-देहिन् |

## अभ्यासः - 26

### श्लोकः - 31

1. **श्लोकं पूरयत–**

[श्लोक को पूरा करें। Complete the verse.]

रजो ----------- विद्धि ------------------------------।
--------------- कौन्तेय --------------- ------------॥

2. **यथोचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | | |
|---|---|---|
| **यथा–** (i) | **कौन्तेय** | (क) अ. नपुं. द्विती. एक. |
| (ii) | देहिनम् | (ख) अ. पुं. तृ. एक. |
| (iii) | रागात्मकम् | (ग) स. नपुं. द्विती. एक. |
| (iv) | कर्मसङ्गेन | **(घ) अ. पुं. सम्बो. एक.** |
| (v) | रजः | (ङ) न. पुं. द्विती. एक. |

3. **विग्रहवाक्यं लिखत–**

[विग्रहवाक्य लिखें। Write the analytical senstence.]

(i) रागात्मकम् = **रागः आत्मा यस्य तत्**

(ii) भावात्मकम् = ------------------------------------

(iii) द्वेषात्मकम् = ------------------------------------

www.thearyasamaj.org


(iv) लयात्मकम् = ----------------------------------------

(v) प्रतीकात्मकम् = ----------------------------------------

**4. अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction of the verse.]

हे कौन्तेय! -------- ------------- ---------------- विद्धि। तत् ------------- ------ निबध्नाति।

**5. समाधत्त–**

[समाधान दें। Answer the questions.]

(i) रजोगुणः कीदृशः अस्ति? ----------------------------------------

(ii) रजः कस्याः सङ्गात् उद्भूतः? ----------------------------------------

(iii) रजः देहिनं केन बध्नाति? ----------------------------------------

(iv) कौन्तेयः कः अस्ति? ----------------------------------------

**6. उचितपदेन योजयत–**

[उचित पद से मिलायें। Match with appropriate word.]

| | |
|---|---|
| (i) रजः | (क) कामोद्भवम् |
| (ii) कौन्तेय | (ख) आत्मानम् |
| (iii) विद्धि | (ग) अर्जुन |
| (iv) रागात्मकम् | (घ) गुणः |
| (v) देहिनम् | (ङ) जानीहि |

**7. यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks according to the example.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** (i) | कौन्तेयः | = | **कुन्त्याः** | **अपत्यं** | **पुमान्** |
| (ii) | आत्रेयः | = | ---------- | ------- | ------- |
| (iii) | राधेयः | = | ---------- | अपत्यं | पुमान् |
| (iv) | -------- | = | विनतायाः | अपत्यं | पुमान् |
| (v) | ---------- | = | गङ्गायाः | अपत्यं | पुमान् |
| (vi) | -------- | = | कृत्तिकानाम् | अपत्यं | पुमान् |

www.thearyasamaj.org



8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों को प्रयोग करते हुए कुछ वाक्य लिखें। Write some sentences using the following words.]

(क) रजस्  (ख) देहिन्  (ग) विद् (कर्तरि लोट्)  (घ) कर्मन्  (ङ) तृष्णा

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

www.thearyasamaj.org



**श्लोकः**

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।**
**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥32॥** (भ.गी. 14.8)

**पदच्छेदः**

तमः तु अज्ञानजम् विद्धि मोहनम् सर्वदेहिनाम्।
प्रमाद-आलस्य–निद्राभिः तत् निबध्नाति भारत॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| तमः | तमस्–स. नपुं. द्विती. एक. | प्रमादालस्य- | आ. स्त्री. तृ. बहु. |
| तु | अव्ययम् | निद्राभिः | समस्तम् |
| अज्ञानजम् | अ. नपुं. द्विती. एक. समस्तम् | तत् | तद्–द. (सर्व.) नपुं. प्र. एक. |
| विद्धि | विद्–कर्तरि लोट् मपु. एक. | निबध्नाति | नि + बन्ध्–कर्तरि लट् प्रपु. एक. |
| मोहनम् | अ. नपुं. द्विती. एक. | | |
| सर्वदेहिनाम् | न. पुं. षष्ठी बहु. समस्तम् | भारत | अ. पुं. सम्बो. एक. |

**आकाङ्क्षा**

**भारत! विद्धि।**

| | |
|---|---|
| किं विद्धि? | तमः विद्धि। |
| कीदृशं तमः विद्धि? | अज्ञानजं तमः विद्धि। |
| तमः पुनश्च कीदृशं विद्धि? | तमः मोहनं विद्धि। |
| तमः केषां मोहनं विद्धि? | तमः सर्वदेहिनां मोहनं विद्धि। |

**निबध्नाति।**

| | |
|---|---|
| किं निबध्नाति? | तत् (तमोगुणः) निबध्नाति। |
| तत् कथं निबध्नाति? | तत् प्रमादालस्यनिद्राभिः निबध्नाति। |

**अन्वयः**

हे भारत! तमः तु अज्ञानजं सर्वदेहिनां मोहनं विद्धि। तत् प्रमाद-आलस्य-निद्राभिः (देहिनं) निबध्नाति।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हे भारत! | हे अर्जुन। | हे अर्जुन | O *Bhārata* |
| तमः तु | तमोगुणम् | तमोगुण को | inertia |
| अज्ञानजम् | अज्ञानोत्पन्नम् | अज्ञान से उत्पन्न | born of ignorance |
| सर्वदेहिनाम् | समस्तप्राणिनाम् | सभी प्राणियों के | to all embodied beings |
| मोहनम् | अविवेककरम् | मोहित कर देने वाले | deloding |
| विद्धि | जानीहि | जानना | know |
| तत् | तमोगुणः | वह (तमोगुण) | that |
| प्रमादालस्य-निद्राभिः | अनवधानता-उद्यमहीनता-निद्राभिः | लापरवाही, आलस्य व निद्रा से | by headlessness, indolence and sleep |
| निबध्नाति | बध्नाति | बाँधता है | binds fast |

**भावार्थः**

**संस्कृतम्** – हे भरतपुत्र अर्जुन! तमोगुणः अज्ञानात् उत्पद्यते, स समस्तप्राणिनां सम्मोहयति। प्रमादः, आलस्यं, निद्रा च तमोगुणस्य प्रतिफलानि सन्ति। सः एतैः प्रतिफलैः जीवं बध्नाति।

**हिन्दी** – हे भरतपुत्र अर्जुन! तमोगुण अज्ञान से उत्पन्न होता है, वह सभी प्राणियों को सम्मोहित करता है। प्रमाद, आलस्य और निद्रा उसके प्रतिफल हैं, जिनसे वह जीव को बाँधता है।

**आंग्लम्** – But know *Tamas* to be born of ignorance, deloding all embodied being; it binds fast, O *Bhārata*, by headlessness, indolence and sleep.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

तमस्त्वज्ञानजम् – तमः + तु + अज्ञानजम्
(विसर्गसन्धिः) (यण्-सन्धिः)

प्रमादालस्यनि-द्राभिस्तन्निबध्नाति – प्रमाद + आलस्यनिद्राभिः + तत् + निबध्नाति
– (दीर्घसन्धिः) (विसर्गसन्धिः) (अनुनासिकसन्धिः)

www.thearyasamaj.org


**(ख) समासः**

| | | |
|---|---|---|
| अज्ञानजम् | - | न ज्ञानम् अज्ञानम् (नञ् तत्पुरुषः), अज्ञानात् जायते इति अज्ञानजम् (उपपदतत्पुरुषः) |
| सर्वदेहिनाम् | - | सर्वेषां देहिनाम् (षष्ठीतत्पुरुषः) |
| प्रमादालस्यनिद्राभिः | - | प्रमादश्च आलस्यं च निद्रा च प्रमादालस्यनिद्राः (द्वन्द्वसमासः) ताभिः |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| मोहनम् | - | मुह् + ल्युट् |
| प्रमाद | - | प्र + मद् + घञ् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| आलस्य | - | अलसस्य भावः आलस्यम्, अलस + ष्यञ् |
| भारत | - | भरतस्य अपत्यं पुमान्, भरत + अण् |

---

## अभ्यासः – 27

### श्लोकः – 32

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks with appropriate words according to the verse.]

------------- विद्धि-------- -----------------।
प्रमाद -------------------------------------भारत।।

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देश के अनुसार श्लोक से पद चुनकर लिखें। Write the words from the verse according to the instructions.]

(क) द्वितीयान्तं पदम् - (i) ------------ (ii) ------------ (iii) -----------
(ख) क्रियापदम् - (i) ------------ (ii) ------------
(ग) अव्ययपदम् - (i) ------------
(घ) सम्बोधनम् - (i) ------------

www.thearyasamaj.org


3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi.*]

(i) तमस्तु = **तमः + तु**

(ii) निद्राभिस्तत् = ----------------

(iii) तन्निबध्नाति = ----------------

(iv) तन्मयम् = ----------------

(v) चिन्मात्रम् = ----------------

4. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

| **पदम्** | | **प्रातिपदिकम्** |
|---|---|---|
| (i) तमः | = | ---------------- |
| (ii) सर्वदेहिनाम् | = | ---------------- |
| (iii) तत् | = | ---------------- |
| (iv) भारत | = | ---------------- |
| (v) मोहनम् | = | ---------------- |

5. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write analytical sentence.]

(i) अज्ञानम् = **न ज्ञानम्**

(ii) अविद्या = ---- --------

(iii) अनघ = ---- --------

(iv) अब्राह्मणः = ---- --------

(v) अप्रसन्नः = ---- --------

6. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

हे भारत! ------------ ------ ------------ ------------- मोहनं -------
तत् -------------------- -------- निबध्नाति।

www.thearyasamaj.org


7. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analytical sentence.]

| | | | | | |
|---|---|---|---|---|---|
| (i) | अज्ञानजम् | = | **अज्ञानात्** | **जायते** | **इति** |
| (ii) | श्रवणजम् | = | -------- | ------ | ------ |
| (iii) | कायजम् | = | -------- | ------ | ------ |
| (iv) | मोहजम् | = | -------- | ------ | ------ |
| (v) | कर्मजम् | = | **कर्मणः** | **जायते** | **इति** |
| (vi) | आत्मजः | = | -------- | ------ | ------ |

8. **उचितपदेन योजयत–**

[उचित पद से जोड़े। Match with appropriate words.]

| | |
|---|---|
| (क) भारत | (i) गुणः |
| (ख) तमः | (ii) अर्जुन |
| (ग) बन्धनकारणम् | (iii) जीवात्मनाम् |
| (घ) देहिनाम् | (iv) अज्ञानोत्पन्नम् |
| (ङ) अज्ञानजम् | (v) प्रमादः |

9. **प्रश्नम् उचितेन उत्तरेण योजयत–**

[प्रश्न को सही उत्तर से मिलायें। Match the question with the appropriate answer.]

| | |
|---|---|
| (i) तमः मोहनं केषाम्? | (अ) तमः |
| (ii) तमः कं बध्नाति? | (आ) गुणः |
| (iii) तमः केन बध्नाति? | (इ) देहिनम् |
| (iv) अज्ञानात् किम् उत्पद्यते? | (ई) सर्वदेहिनाम् |
| (v) तमः किम् अस्ति? | (उ) आलस्येन |

www.thearyasamaj.org


श्लोकः

**सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।**
**ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥33॥** (भ.गी. 14.9)

पदच्छेदः

सत्त्वम् सुखे सञ्जयति रजः कर्मणि भारत।
ज्ञानम् आवृत्य तु तमः प्रमादे सञ्जयति उत।

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सत्त्वम् | अ. नपुं. प्र. एक. | ज्ञानम् | अ. नपुं. द्विती. एक. |
| सुखे | अ. नपुं. सप्त. एक. | आवृत्य | ल्यबन्तम् अव्ययम् |
| सञ्जयति | सम् + जि–कर्तरि लट् प्रपु. एक. | तु | अव्ययम् |
| | | तमः | तमस्–स. नपुं. प्र. एक. |
| रजः | रजस्–स. नपुं. प्र. एक. | प्रमादे | अ. पुं. सप्त. एक. |
| कर्मणि | कर्मन्–न. नपुं. सप्त. एक. | सञ्जयति | सम्+जि–कर्तरि लट् प्रपु. एक. |
| भारत | अ. पुं. सम्बो. एक. | उत | अव्ययम् |

आकाङ्क्षा

**(देहिनं) सञ्जयति।**

| | |
|---|---|
| श्लोके सम्बोधनं किम्? | भारत! |
| किं सञ्जयति? | सत्त्वं सञ्जयति। |
| सत्त्वं कुत्र सञ्जयति? | सत्त्वं सुखे सञ्जयति। |
| पुनश्च किं सञ्जयति? | रजः सञ्जयति। |
| रजः कस्मिन् सञ्जयति? | रजः कर्मणि सञ्जयति। |

**सञ्जयति।**

| | |
|---|---|
| पुनः किं सञ्जयति? | तमः सञ्जयति। |
| तमः किं कृत्वा सञ्जयति? | तमः आवृत्य सञ्जयति। |
| तमः किम् आवृत्य सञ्जयति? | तमः ज्ञानम् आवृत्य सञ्जयति। |
| तमः कस्मिन् सञ्जयति? | तमः प्रमादे सञ्जयति। |

www.thearyasamaj.org


**अन्वयः**

हे भारत! सत्त्वं सुखे, रजः कर्मणि (देहिनं) सञ्जयति। तमः तु ज्ञानम् आवृत्य उत प्रमादे (देहिनं) सञ्जयति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| भारत! | हे भरतवंशोत्पन्न अर्जुन! | हे भरतवंशज अर्जुन! | *O Bhārata* |
| सत्त्वं | सत्त्वगुणः | सत्त्वगुण | *sattva* |
| सुखे | आमोदे | सुख में | to happiness |
| रजः | रजोगुणः | रजोगुण | *Rajas* |
| कर्मणि | क्रियायां | कर्म में (लगाकर) | to action |
| सञ्जयति | विजयते (संश्लेषयति) | (मनुष्य को) जीत लेता है (संश्लेषित करता है।) | attaches |
| तमः | तमोगुणः | तमोगुण | *Tamas* |
| ज्ञानमावृत्य | ज्ञानमाच्छाद्य | ज्ञान को ढँककर | knowledge shrouding |
| उत | अथवा | या | but |
| प्रमादे | अवश्यकर्तव्यस्याकरणे | प्रमाद में (लगाकर) | to headlessness |
| सञ्जयति | संश्लेषं जनयति | (मनुष्य को) जीत लेता है | attaches |

**भावार्थः**

**संस्कृतम्** – हे भरतवंशोत्पन्न अर्जुन! सत्त्वगुणः सुखे रजोगुणश्च कर्मणि मनुष्यं संश्लेषयति। तमोगुणस्तु ज्ञानम् आच्छाद्य, मनुष्यं प्रमादैः तं संश्लेषयति।

**हिन्दी** – हे भरतवंशज अर्जुन! सत्त्वगुण मनुष्य को सुख में लगाकर तथा रजोगुण मनुष्य को कर्मों में लगाकर उसे जीत लेता है। तमोगुण तो ज्ञान को ढँककर या मनुष्य को प्रमादयुक्त कर उस पर जीत प्राप्त करता है।

**आंग्लम्** – *Sattva* binds one to happiness, and *Rajas* to action, O *Bhārata*, while *tamas* verily veils knowledge and binds to headlessness.

www.thearyasamaj.org 

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

सञ्जयत्युत - सञ्जयति + उत (यण् सन्धिः)

(ख) **कृदन्तः**

आवृत्य - आ + वृत् + ल्यप्

प्रमादे - प्र + मद् + घञ्-प्रमाद

**अवधेयम्**

**सप्तमीविभक्तिविषये**

---

## अभ्यासः - 28

### श्लोकः - 33

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks with appropriate word according to the verse.]

----- सुखे ------------ ----------- कर्मणि ---------।
ज्ञानमावृत्य --- ------ प्रमादे ---------------------------॥

2. **यथोचितं सन्धिकार्यं कृत्वा रिक्तस्थानं पूरयत–**

[यथोचितं सन्धिकार्य करके रिक्त स्थान भरें। Fill in the blanks as per joining/disjoining the *Sandhi*.]

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (i) | **सञ्जयत्युत** | = | **सञ्जयति** | + | **उत** |
| | (ii) | इच्छत्युत | = | ------- | + | उत |
| | (iii) | करोत्युत | = | करोति | + | ------- |
| | (iv) | ----------- | = | जानाति | + | उत |
| | (v) | ----------- | = | पठति | + | अपि |
| | (vi) | शृणोत्येव | = | ------- | + | एव |
| | (vii) | भवत्यादौ | = | भवति | + | ------- |
| | (viii) | यद्यपि | = | ------- | + | ------- |

www.thearyasamaj.org


(ix) प्रकाशयत्येकः = -------- + -----

(x) पृच्छत्येनम् = -------- + -----

**3. यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोक से पद चुनकर लिखें। Write the words from the verse as per instruction.]

(क) प्रथमान्तपदम् - (i) ----------- (ii) ----------- (iii) -----------

(ख) सप्तम्यन्तपदम् - (i) ----------- (ii) ----------- (iii) -----------

(ग) अव्ययपदम् - (i) ----------- (ii) -----------

**4. अधोनिर्दिष्टेषु पदेषु प्रकृति-प्रत्यय-विभागं कुरुत–**

[नीचे बताये गये पदों में प्रकृति-प्रत्यय विभाग करें। Separate the base and suffix of the following words.]

**यथा–** (i) आवृत्य = **आ + वृत् + ल्यप्**

(ii) सम्भूय = ----- + ----- + -----

(iii) आमन्त्र्य = ----- + ----- + -----

(iv) आगत्य = ----- + ----- + -----

(v) उपविश्य = ----- + ----- + -----

(vi) प्रविश्य = ----- + ----- + -----

(vii) उत्थाय = ----- + ----- + -----

(viii) प्रणम्य = ----- + ----- + -----

**5. यथोचितं योजयत–**

[सही मेल करें। Match appropriately.]

**यथा–** (i) **सत्त्वम्** — (क) अ. नपुं. द्विती. एक.

(ii) सुखे — (ख) स. नपुं. प्र. एक.

(iii) भारत — (ग) अव्ययम्

(iv) ज्ञानम् — (घ) **अ. नपुं. प्र. एक.**

(v) तु — (ङ) अ. पुं. सम्बो. एक.

(vi) रजः — (च) अ. नपुं. सप्त एक.

www.thearyasamaj.org


6. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

--- ----- ---- सुखे ---- ------ ------ सञ्जयति। ------ --- ज्ञानम् -----
--- -------- -------- -------------।

7. **समाधानं प्रदत्त–**

[समाधान दें। Answer the questions.]

(i) सत्त्वगुणः कस्मिन् सञ्जयति देहिनम्? ------------------------------------

(ii) रजोगुणः कस्मिन् सञ्जयति? ------------------------------------

(iii) तमोगुणः कस्मिन् सञ्जयति? ------------------------------------

(iv) तमोगुणः किम् आवृणोति? ------------------------------------

www.thearyasamaj.org


**श्लोकः**

**प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।**
**न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति ॥34॥** (भ.गी. 14.22)

**पदच्छेदः**

प्रकाशम् च प्रवृत्तिम् च मोहम् एव च पाण्डव।
न द्वेष्टि सम्–प्रवृत्तानि न निवृत्तानि काङ्क्षति॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| प्रकाशम् | अ. पुं. द्विती. एक. | द्वेष्टि | द्विष्–कर्तरि लट् प्रपु. बहु. |
| च | अव्ययम् | सम्प्रवृत्तानि | अ. नपुं. द्विती. बहु. विशेषणम् |
| प्रवृत्तिम् | इ. स्त्री. द्विती. एक. | | |
| मोहम् | अ. पुं. द्विती. एक. | न | अव्ययम् |
| एव | अव्ययम् | निवृत्तानि | अ. नपुं. द्विती. बहु. विशेषणम् |
| च | अव्ययम् | | |
| पाण्डव | अ. पुं. सम्बो. एक. | काङ्क्षति | काङ्क्ष्–कर्तरि लट् प्रपु. एक. |
| न | अव्ययम् | | |

**आकाङ्क्षा**

**(गुणातीतः) न द्वेष्टि।**

| | |
|---|---|
| पद्ये सम्बोधनं किम्? | पाण्डव! |
| (गुणातीतः मनुष्यः) कं न द्वेष्टि? | प्रकाशं न द्वेष्टि। |
| पुनश्च कां न द्वेष्टि? | प्रवृत्तिं च न द्वेष्टि। |
| पुनश्च कं न द्वेष्टि? | मोहं च न द्वेष्टि। |
| प्रकाशं, प्रवृत्तिं मोहं च (इति त्रीणि कीदृशानि) न द्वेष्टि? | प्रकाशं, प्रवृत्तिं मोहं च (इति त्रीणि) सम्प्रवृत्तानि न द्वेष्टि। |

**न काङ्क्षति।**

| | |
|---|---|
| किं न काङ्क्षति? | प्रकाशं, प्रवृत्तिं मोहं च न काङ्क्षति। |
| प्रकाशं, प्रवृत्तिं मोहं च इति किं रूपाणि न काङ्क्षति? | प्रकाशं, प्रवृत्तिं मोहं च इति निवृत्तानि न काङ्क्षति। |

www.thearyasamaj.org



**अन्वयः**

हे पाण्डव! प्रकाशं च प्रवृत्तिं च मोहम् एव च (इति त्रीणि) सम्प्रवृत्तानि (गुणातीतः मनुष्यः) न द्वेष्टि, निवृत्तानि न काङ्क्षति (सः गुणातीतः इति उच्यते।)

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हे पाण्डव! | हे पाण्डुपुत्र अर्जुन! | हे अर्जुन! | O *pāṇḍava!* |
| प्रकाशम् च | अन्तःकरणस्य निर्मलताम् | अन्तःकरण की निर्मलता की | light |
| प्रवृत्तिम् च | लोभ–स्पृहादि प्रवृत्तिम् | लोभस्पृहादि प्रवृत्ति को | activity |
| मोहम् एव च | कर्तव्याकर्तव्यविवेकहीनतां च | कर्तव्य–अकर्तव्य सम्बन्धी विवेकहीनता को | delusion |
| सम्प्रवृत्तानि | सम्यक्तया व्यवहृतानि | अच्छी प्रकार से व्यवहृत होने पर | gone forth |
| न द्वेष्टि | द्वेषं न करोति | द्वेष नहीं करता है | not hates |
| निवृत्तानि | मुक्तानि | निवृत्त होने पर | when absent |
| न काङ्क्षति | न कामयते | इच्छा नहीं करते हैं | not longs |

**भावार्थः**

**संस्कृतम्** – हे पाण्डुपुत्र अर्जुन! सत्त्वगुणस्य कार्यम् इन्द्रियाणाम् अन्तःकरणस्य च निर्मलतारूपः प्रकाशः अस्ति। रजोगुणस्य कार्यं लोभ-स्पृहादिकर्मसु प्रवृत्तिः, तमोगुणस्य च कार्यं कर्तव्याकर्तव्य-विवेकहीनता रूपः मोहः अस्ति। एतेषु त्रिषु सम्यक्तया व्यवहृतेषु अपि गुणातीतः मनुष्यः एतैः सह द्वेषं न करोति। एतेषु त्रिषु निवृत्तेषु एतेषां पुनः कामनां न करोति (सः गुणातीतः इत्युच्यते।)

**हिन्दी** – हे पाण्डुपुत्र अर्जुन! सत्त्व गुण का कार्य इन्द्रियों व अन्तःकरण की निर्मलता का रूप प्रकाश है। रजोगुण का कार्य लोभ–स्पृहादि प्रवृत्ति है और तमोगुण का कार्य कर्तव्याकर्तव्य का विवेक न होना अर्थात् मोह है। इन तीनों के अच्छी प्रकार व्यवहृत होने पर गुणातीत मनुष्य इनसे द्वेष नहीं करता है तथा इनके निवृत्त होने पर भी इनकी इच्छा नहीं करता है (वह गुणातीत कहलाता है।)

**आंग्लम्** – O *pāṇḍava*, who hates not light activity and delusion, when present, nor longs after them when absent (he is called *guṇātīta*.)

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **कृदन्तः**

| | | |
|---|---|---|
| प्रकाशम् | - | प्र + काश् + घञ् |
| प्रवृत्तिम् | - | प्र + वृत् + क्तिन् |
| मोहम् | - | मुह् + घञ् |
| सम्प्रवृत्तानि | - | सम् + प्र + वृत् + क्त |
| निवृत्तानि | - | नि + वृत् + क्त |

(ख) **तद्धितान्तः**

| | | |
|---|---|---|
| पाण्डवः | - | पाण्डोः अपत्यं पुमान् पाण्डवः, पाण्डु + अण् |

## अभ्यासः - 29

### श्लोकः - 34

1. **अधोलिखितं योजयत–**

[अधोलिखित को जोड़ें। Match the followings.]

| | |
|---|---|
| (i) प्रकाशम् | (क) तिङन्तम् |
| (ii) पाण्डव | (ख) अव्ययम् |
| (iii) द्वेष्टि | (ग) कृदन्तः |
| (iv) एव | (घ) तद्धितान्तः |

2. **सत्यम् ☑ असत्यं ☒ वा निर्दिशत–**

[सही ☑ या गलत ☒ बतायें। Say true ☑ or false ☒.]

(क) प्रकाशः सत्त्वगुणस्य कार्यम् अस्ति। ( )

(ख) मोहः रजोगुणस्य कार्यम् अस्ति। ( )

(ग) गुणातीतः मोहे सम्प्रवृत्ते मोहं द्वेष्टि। ( )

(घ) गुणातीतः प्रकाशे निवृत्ते प्रकाशं न काङ्क्षति। ( )

(ङ) तमोगुणः मोहं जनयति। ( )

3. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction.]

हे पाण्डव! --------- ---- प्रवृत्तिं --- -------- ------- ----- ----------

--------- ------------- ------ द्वेष्टि ---------- ------- --------।

www.thearyasamaj.org



4. **मञ्जूषायां प्रदत्तैः शब्दैः श्लोकस्य भावार्थं प्रकाशयत–**

[मञ्जूषा में प्रदत्त शब्दों से श्लोक के भावार्थ को स्पष्ट करें। Give the meaning of the verse with the words given in the box.]

| | | | |
|---|---|---|---|
| गुणातीतः | प्रकाशं<br>प्रवृत्तिं<br>मोहं | सम्प्रवृत्तं<br>निवृत्तं | न काङ्क्षति<br>न द्वेष्टि |

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

5. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) द्वेष्टि | (क) अस् लट् |
| (ii) दोग्धि | (ख) पा लट् |
| (iii) शास्ति | (ग) दुह् लट् |
| (iv) अस्ति | (घ) विद् लट् |
| (v) पाति | (ङ) द्विष् लट् |
| (vi) याति | (च) शास् लट् |
| (vii) वेत्ति | (छ) या लट् |

6. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) प्रवृत्तिम् | (अ) द्विष्–लट् प्रपु. एक. |
| (ii) निवृत्तानि | (आ) अ. पुं. द्विती. एक. |
| (iii) प्रकाशम् | (इ) अ. पुं. सम्बो. एक. |
| (iv) पाण्डव | (ई) इ. स्त्री. द्विती. एक. |
| (v) द्वेष्टि | (उ) अ. नपुं. द्विती. बहु. |

—●—

www.thearyasamaj.org


**श्लोकः**

**उदासीनवदासीनो गुणैर्यो न विचाल्यते ।**
**गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥35॥** (भ.गी. 14.23)

**पदच्छेदः**

उदासीनवत्–आसीनः गुणैः यः न विचाल्यते।
गुणाः वर्तन्ते इति एव यः अवतिष्ठति न इङ्गते॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| उदासीनवत् | तद्धितान्तम् अव्ययम् | वर्तन्ते | वृत्–कर्तरि आत्मनेपदे लट् प्रपु. बहु. |
| आसीनः | अ. पुं. प्र. एक. | इति | अव्ययम् |
| गुणैः | अ. पुं. तृ. बहु. | एव | अव्ययम् |
| यः | यद्–द. (सर्व.) पुं. प्र. एक. | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| न | अव्ययम् | अवतिष्ठति | अव+स्था–कर्तरि लट् प्रपु.एक. |
| विचाल्यते | वि+चल्+णिच् कर्मणि लट् प्रपु. एक. | न | अव्ययम् |
| गुणाः | अ. पुं. प्र. बहु. | इङ्गते | इङ्ग (इगि) कर्तरि आत्मनेपदे लट् प्रपु. एक. |

**आकाङ्क्षा**

**(गुणातीतः) न विचाल्यते।**

| | |
|---|---|
| कः न विचाल्यते? | सः न विचाल्यते। |
| कैः न विचाल्यते? | गुणैः न विचाल्यते। |
| कीदृशः सः न विचाल्यते? | यः आसीनः सः न विचाल्यते। |
| कथम् आसीनः गुणैः न विचाल्यते? | यः उदासीनवत् आसीनः सः गुणैः न विचाल्यते। |
| पुनश्च कः न विचाल्यते? | यः अवतिष्ठति सः न विचाल्यते। |
| किं कृत्वा अवतिष्ठति? | इत्येव (मत्वा) अवतिष्ठति। |
| अपि च किं करोति? | न इङ्गते। |
| किम् इत्येव (मत्वा) अवतिष्ठति, न इङ्गते? | गुणाः वर्तन्ते इत्येव मत्वा यः अवतिष्ठति न इङ्गते सः न विचाल्यते। |

www.thearyasamaj.org



## अन्वयः

यः उदासीनवत् आसीनः, गुणैः न विचाल्यते, गुणाः वर्तन्ते इत्येव यः अवतिष्ठति न इङ्गते, ('सः गुणातीतः इति उच्यते इति अग्रिमश्लोकस्थविषयेण सह अन्वयः।)

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | (गुणातीतः) मनुष्यः | जो मनुष्य | Who |
| उदासीनवत् | तटस्थ इव | तटस्थ की तरह | like one unconcerned |
| आसीनः | अवस्थितः | स्थितः | seated |
| गुणैः | सत्त्वादिगुणैः | सत्त्व आदि गुणों के द्वारा | by the *Guṇas* |
| न विचाल्यते | विचलितो न भवति | विचलित नहीं होता | is not moved |
| गुणाः वर्तन्ते | सत्त्वादयः प्रवर्तन्ते | गुण ही तो प्रवृत्त हो रहे हैं | the *Guṇas* |
| इत्येव | अनेनैव भावेन | इसी भाव से | thus even |
| यः अवतिष्ठति | यः मनुष्यः स्थितो भवति | जो स्थित रहता है | who is self-centred |
| न इङ्गते | न चेष्टते | किसी प्रकार की चेष्टा नहीं करता है। | not moves |

## भावार्थः

**संस्कृतम्** – यः मनुष्यः तटस्थः सत्त्वादिभिः गुणैः विचलितः न भवति। गुणेषु सत्त्वादयः गुणाः एव प्रवर्तन्ते इति भावेन यः तिष्ठति, स्वयं च किमपि न चेष्टते। ब्रह्माकारभावेन तिष्ठति इति (सः गुणातीतः इति कथ्यते।)

**हिन्दी** – जो मनुष्य उदासीन की तरह स्थित होकर सत्त्व आदि गुणों के द्वारा कदापि विचलित नहीं होता तथा गुणों में गुणों की ही प्रवृत्ति हो रही है, इस भावना से अपने में ही स्थित रहता हुआ स्वयं किसी भी प्रकार की चेष्टा नहीं करता है। केवल ब्रह्माकार भाव से अवस्थित रहता है (वह गुणातीत कहलाता है।)

**आंग्लम्** – He who sitting like one indifferent, is not distracted by the three qualities; he who, thinking that the qualities alone act, remains firm and surely does not move; (is called *guṇātīta*).

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

उदासीनवदासीनो गुणैर्यो न – उदासीनवत् + आसीनः + गुणैः + यः + न
(जश्त्वसन्धिः) (विसर्गसन्धिः)

गुणा वर्तन्त इत्येव – गुणाः + वर्तन्ते + इति + एव
(विसर्गसन्धिः) (अयादिसन्धिः) (यण्सन्धिः)

योऽवतिष्ठति – यः + अवतिष्ठति (विसर्गसन्धिः)

नेङ्गते – न + इङ्गते (गुणसन्धिः)

(ख) **कृदन्तः**

उदासीन – उत् + आस् + शानच्

आसीनः – आस् + शानच्

(ग) **तद्धितान्तः**

उदासीनवत् – उदासीन + वत्

---

## अभ्यासः – 30

## श्लोकः – 35

1. **यथोचितं योजयत–**

[उचित मेल बनाएँ। Match with the appropriate one.]

| | |
|---|---|
| (i) अ. पुं. तृ. बहु. | (क) आसीनः |
| (ii) द. पुं. प्र. एक. | (ख) गुणाः |
| (iii) अ. पुं. प्र. एक. | (ग) उदासीनवत् |
| (iv) तद्धितान्तम् अव्ययम् | (घ) यः |
| (v) अव्ययम् | (ङ) गुणैः |
| (vi) अ. पुं. प्र. बहु. | (च) एव |

www.thearyasamaj.org



2. **सन्धिविच्छेदं कुरुत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

| | | | | |
|---|---|---|---|---|
| **यथा–** (i) | वर्तन्त इति | = | **वर्तन्ते** + | **इति** |
| (ii) | त एव | = | ------- + | ------- |
| (iii) | वर्तत एव | = | ------- + | ------- |
| (iv) | हर इह | = | ------- + | ------- |
| (v) | सूर्य उदिते | = | ------- + | ------- |

3. **यथोदाहरणं रिक्तं स्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान को भरें। Fill in the blanks as per the example.]

| | | | |
|---|---|---|---|
| **यथा–** (क) | उदासीनवत् | = | **उदासीनः इव** |
| (ख) | मूढवत् | = | ---------------- |
| (ग) | रामवत् | = | ---------------- |
| (घ) | कृष्णवत् | = | ---------------- |
| (ङ) | चतुरवत् | = | ---------------- |

4. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) विचाल्यते | (क) भू + णिच् लट् |
| (ii) विचार्यते | (ख) पठ् + णिच् कर्मणि लट् |
| (iii) पाठयते | (ग) दा + णिच् कर्मणि लट् |
| (iv) स्थाप्यते | (घ) वि + चल् + णिच् कर्मणि लट् |
| (v) भाव्यते | (ङ) स्था + णिच् भावे लट् |
| (vi) दाप्यते | (च) वि + चर + णिच् कर्मणि लट् |

5. **समाधानं प्रदत्त–**

[समाधान दें। Answer the questions.]

(i) कथम् आसीनः न विचाल्यते? ----------------------------------------

(ii) के विचाल्यन्ते? ----------------------------------------

(iii) गुणाः कं न विचाल्यन्ते? ----------------------------------------

(iv) कः न इङ्गते? ----------------------------------------

www.thearyasamaj.org



6. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिए गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) गुण (ख) आसीन (ग) वि + चल् + णिच् कर्मणि (लट्) (घ) इत्येव

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

---------------------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।**
**तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥36॥**
**मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।**
**सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥37॥** (भ.गी. 14.24, 25)

**पदच्छेदः**

सम–दुःख–सुखः स्वस्थः सम–लोष्ट–अश्म–काञ्चनः।
तुल्य–प्रिय–अप्रियः धीरः तुल्य–निन्दा–आत्म–संस्तुतिः॥
मान–अपमानयोः तुल्यः तुल्यः मित्र–अरि–पक्षयोः।
सर्व–आरम्भ–परित्यागी गुण–अतीतः सः उच्यते॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| समदुःखसुखः | अ. पुं. प्र. एक. समस्तम् | तुल्यः | अ. पुं. प्र. एक. |
| स्वस्थः | अ. पुं. प्र. एक. समस्तम् | मित्रारिपक्षयोः | अ. पुं. सप्त. द्वि. समस्तम् |
| समलोष्टाश्मकाञ्चनः | अ. पुं. प्र. एक. समस्तम् | सर्वारम्भपरित्यागी | सर्वारम्भपरित्यागिन्– |
| तुल्यप्रियाप्रियः | अ. पुं. प्र. एक. समस्तम् | | न. पुं. प्र. एक. |
| धीरः | अ. पुं. प्र. एक. | गुणातीतः | अ. पुं. प्र. एक. समस्तम् |
| तुल्यनिन्दात्मसंस्तुतिः | इ. पुं. प्र. एक. समस्तम् | सः | तद्–द. (सर्व.) |
| मानापमानयोः | अ. पुं. सप्त. द्वि. समस्तम् | | पुं. प्र. एक. |
| तुल्यः | अ. पुं. प्र. एक. | उच्यते | ब्रू–कर्मणि लट् प्रपु.एक. |

**आकाङ्क्षा**

**सः उच्यते।**

| | |
|---|---|
| सः कः उच्यते? | सः गुणातीतः उच्यते। |
| कीदृशः (मनुष्यः) गुणातीतः उच्यते? | समदुःखसुखः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | स्वस्थः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | समलोष्टाश्मकाञ्चनः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | तुल्यप्रियाप्रियः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | धीरः गुणातीतः उच्यते। |

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च कीदृशः गुणातीतः उच्यते? | तुल्यनिन्दात्मसंस्तुतिः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | मानापमानयोः तुल्यः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | मित्रारिपक्षयोः तुल्यः गुणातीतः उच्यते। |
| पुनश्च कीदृशः गुणातीतः उच्यते? | सर्वारम्भपरित्यागी गुणातीतः उच्यते। |

**अन्वयः**

(यः) समदुःखसुखः, स्वस्थः, समलोष्टाश्मकाञ्चनः, तुल्यप्रियाप्रियः, धीरः, तुल्यनिन्दात्मसंस्तुतिः, मानापमानयोः तुल्यः, मित्रारिपक्षयोः तुल्यः, सर्वारम्भपरित्यागी सः गुणातीतः उच्यते।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| (यः) | यः मनुष्यः | जो मनुष्य | Who |
| समदुःखसुखः | विषादप्रसादयोः समः | सुख-दुःख में समान | Same in sorrow and happiness |
| स्वस्थः | आत्मसंस्थितः | अपने स्वरूप में स्थित | established in his own self |
| समलोष्टाश्म-काञ्चनः | मृदि, पाषाणे स्वर्णे च समानदृष्टिः | मिट्टी के ढेले, पत्थर व सोने में समान दृष्टि वाला | lump of earth, iron and gold are the same |
| तुल्यप्रियाप्रियः | स्निग्धास्निग्धयोः समः | प्रिय व अप्रिय में समान दृष्टि वाला | the agreeable and the disagreeable are the same |
| धीरः | धैर्यशाली | धीर | wise |
| तुल्यनिन्दास्तुतिः | निन्दायां आत्मप्रशंसायां च समः | निन्दा और प्रशंसा दोनों में समान रहने वाला | in censure and praise are the same |
| मानापमानयोः तुल्यः | आदरानादरयोः समभावः | मान तथा अपमान में समान भाव वाला | in honour and dishonour the same |
| मित्रारिपक्षयोः तुल्यः | सखिशत्रुपक्षयोः समदृष्टिः | मित्र तथा शत्रु से समान व्यवहार करने वाला | to friend and foe the same |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| सर्वारम्भ-परित्यागी | सर्वकर्मपरित्यागी | जिसने सभी कार्यों का त्याग कर दिया हो | abandoning all undertakings |
| सः | एतादृशः मनुष्यः | ऐसा मनुष्य | he |
| गुणातीतः | प्रकृतिसम्भवान् गुणान् अतीतः | प्रकृति के गुणों से परे | crossed beyond the *Guṇas* |
| उच्यते | कथ्यते | कहा जाता है | is said |

## भावार्थः

**संस्कृतम्** – यः मनुष्यः हर्षविषादयोः समः, आत्मसंस्थितः धीरश्च भवति; यः मृत्खण्डे, पाषाणे स्वर्णे च समः तिष्ठति; यः प्रिये-अप्रिये तथा निन्दायाम्-आत्मप्रशंसायां च समः तिष्ठति; यः माने अपमाने वा, मित्रपक्षे शत्रुपक्षे वा समः तिष्ठति; यश्च सर्वेषां कर्मणां प्रारम्भत्यागी अस्ति; सः मनुष्यः गुणातीतः कथ्यते।

**हिन्दी** – जो मनुष्य सुख व दुःख में समान रहता है; अपने स्वरूप में स्थित रहता हुआ मिट्टी के ढेले, पत्थर व सुवर्ण में समान दृष्टि रखता है; जो प्रिय व अप्रिय में; निन्दा-स्तुति में समदृष्टि रखता है तथा धीर बना रहता है; जो मान व अपमान में, मित्र व शत्रु पक्ष में समान भावना रखता है; जो सम्पूर्ण कर्मों के आरम्भ का त्यागी है; वह मनुष्य गुणातीत कहा जाता है।

**आंग्लम्** – He to whom sorrow and happiness are alike, who is established in his own self, to whom a lump of earth, iron and gold are the same, to whom the agreeable and the disagreeable are the same, who is wise, to whom censure and praise are the same.

He who is the same under honour and dishonour, who is equally disposed both towards the side of friend and of the foe, who has renounced all enterprise, he is said to have gone beyond the qualities.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

धीरस्तुल्यनिन्दात्मसंस्तुतिः – धीरः + तुल्यनिन्दा + आत्मसंस्तुतिः

(विसर्गसन्धिः) (दीर्घसन्धिः)

www.thearyasamaj.org


मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः – मान+अपमानयोः + तुल्यः + तुल्यः + मित्र + अरिपक्षयोः

(दीर्घसन्धिः) (विसर्गसन्धिः) (दीर्घसन्धिः)

स उच्यते – सः + उच्यते (विसर्गसन्धिः)

**(ख) समासः**

समदुःखसुखः – दुःखं च सुखं च दुःखसुखे (द्वन्द्वः)
समे दुःखसुखे यस्य सः (बहुव्रीहिः)

स्वस्थः – स्वस्मिन् तिष्ठति इति स्वस्थः (उपपदतत्पुरुषः)

समलोष्टाश्म-काञ्चनः – लोष्टं च अश्मा च काञ्चनं च लोष्टाश्मकाञ्चनानि (द्वन्द्वः) समानि लोष्टाश्मकाञ्चनानि यस्य सः (बहुव्रीहिः)

तुल्यप्रियाप्रियः – प्रियं च अप्रियं च प्रियाप्रिये (द्वन्द्वः)
तुल्ये प्रियाप्रिये यस्य सः (बहुव्रीहिः)

तुल्यनिन्दात्मसंस्तुतिः – आत्मनः संस्तुतिः आत्मसंस्तुतिः (षष्ठीतत्पुरुषः)
निन्दा च आत्मसंस्तुतिः च निन्दात्मसंस्तुती (द्वन्द्वः)
तुल्ये निन्दात्मसंस्तुती यस्य सः (बहुव्रीहिः)

मानापमानयोः – मानं च अपमानं च मानापमाने (द्वन्द्वः) तयोः

मित्रारिपक्षयोः – मित्रं च अरिः च मित्रारी (द्वन्द्वः)
मित्रार्योः पक्षः (षष्ठीतत्पुरुषः) तयोः

गुणातीतः – गुणान् अतीतः (द्वितीयातत्पुरुषः)

**(ग) कृदन्तः**

निन्दा – निन्द् + अ + टाप्

संस्तुतिः – सम् + स्तु + क्तिन्

मान – मन् + घञ्

अपमान – अप + मन् + घञ्

आरम्भ – आ + रभ् + घञ्

परित्यागी – परि + त्यज् + घिनुण्

अतीतः – अति + इ + क्त

www.thearyasamaj.org


| | | |
|---|---|---|
| सर्वारम्भपरित्यागी | - | सर्वान् आरम्भान् परित्यक्तुं शीलम् अस्य<br>सर्वारम्भपरित्यज् + घिनुण् |

## अभ्यासः - 31

### श्लोकः - 36, 37

1. **श्लोकयोः आधारेण रिक्तं स्थानं यथोचितं पूरयत–**

[श्लोकों के आधार पर उचित पदों से रिक्त स्थान भरें। Fill in the blanks with the appropriate words from the verses.]

--------------- ---------- समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो ------------------------------॥
मानापमानयो ------------- -----------------।
सर्वारम्भ ---------- ------------ स --------॥

2. **यथोचितं योजयत–**

[सही मेल बनाएँ। Match with the appropriate one.]

**यथा–** (i) **स्वस्मिन् तिष्ठति** — (क) आत्मसंस्तुतिः
(ii) समे दुःखसुखे अस्य — (ख) अरिपक्षः
(iii) गुणान् अतीतः — (ग) **स्वस्थः**
(iv) आत्मनः संस्तुतिः — (घ) समदुःखसुखः
(v) अरेः पक्षः — (ङ) गुणातीतः

3. **यथाश्लोकं युग्मं योजयत–**

[श्लोकों के अनुसार युग्म का मेल करें। Match the on the basis of the verses.]

(i) निन्दा — (अ) अश्मा
(ii) मित्रपक्षः — (आ) अप्रियम्
(iii) अपमानम् — (इ) आत्मसंस्तुतिः
(iv) सुखम् — (ई) अरिपक्षः
(v) प्रियम् — (उ) दुःखम्
(vi) लोष्ट — (ऊ) मानम्

www.thearyasamaj.org


4. **यथोदाहरणं रिक्तं स्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान भरें। Fill in the blanks as shown in the example.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** | (i) | गुणातीतः | = | **गुणम्** | **अतीतः** |
| | (ii) | संख्यातीतः | = | -------- | ----------- |
| | (iii) | भावातीतः | = | -------- | ----------- |
| | (iv) | दुःखातीतः | = | -------- | ----------- |
| | (v) | इन्द्रियातीतः | = | -------- | ----------- |
| | (vi) | लोकातीतः | = | -------- | ----------- |
| | (vii) | मोहातीतः | = | -------- | ----------- |

5. **यथोदाहरणं रिक्तं स्थानं पूरयत–**

[यथा उदाहरण रिक्त स्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | | | | |
|---|---|---|---|---|
| **यथा–** | (i) | **स्वस्थः** | = | **स्वस्मिन् तिष्ठति** |
| | (ii) | ----------- | = | ध्याने तिष्ठति |
| | (iii) | ----------- | = | आसने तिष्ठति |
| | (iv) | ----------- | = | वने तिष्ठति |
| | (v) | कूपस्थः | = | -------------- |
| | (vi) | तटस्थः | = | -------------- |
| | (vii) | नगरस्थः | = | -------------- |

6. **विसन्धिं कुरुत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| (i) | प्रियाप्रियः | = | **प्रिय** | + | **अप्रियः** |
| (ii) | मानापमानयोः | = | -------- | + | -------- |
| (iii) | विद्याविद्ये | = | -------- | + | -------- |
| (iv) | निन्दात्मसंस्तुतिः | = | -------- | + | -------- |
| (v) | मित्रारिपक्षयोः | = | -------- | + | -------- |
| (vi) | सर्वारम्भः | = | -------- | + | -------- |
| (vii) | गुणातीतः | = | -------- | + | -------- |

www.thearyasamaj.org


7. **सन्धिं कृत्वा सन्धेर्नाम लिखत–**

[सन्धि करके सन्धि का नाम लिखें। Join the *Sandhi and write the name.*]

| | | | | | | |
|---|---|---|---|---|---|---|
| (i) | तुल्यः | + | तुल्यः = | | **तुल्यस्तुल्यः** | **विसर्गसन्धिः** |
| (ii) | धीरः | + | तुल्यः = | | ---------------- | ---------------- |
| (iii) | यः | + | तम् | = | ---------------- | ---------------- |
| (iv) | पुरुषः | + | तु | = | ---------------- | ---------------- |
| (v) | प्रियः | + | धीरः = | | **प्रियो धीरः** | **विसर्गसन्धिः** |
| (vi) | यः | + | न | = | ---------------- | ---------------- |
| (vii) | आसीनः + | | गुणैः = | | ---------------- | ---------------- |
| (viii) | अहङ्कारः + | | बुद्धिः = | | ---------------- | ---------------- |

8. **श्लोकयोः आगतेषु गुणातीतस्य विशेषणेषु एकम् एकं विशेषणं रिक्ते स्थाने योजयत–**

[श्लोकों में आयें गुणातीत के विशेषणों में एक-एक विशेषण रिक्त स्थान में भरें। Fill in the blanks with the qualifiers of *Guṇātīta* appearing in the verse.]

**यथा–** (i) **समदुःखसुखः** मनुष्यः गुणातीतः उच्यते।

(ii) ---------------- मनुष्यः गुणातीतः उच्यते।

(iii) ---------------- मनुष्यः गुणातीतः उच्यते।

(iv) ---------------- मनुष्यः गुणातीतः उच्यते।

(v) ---------------- मनुष्यः गुणातीतः उच्यते।

(vi) ---------------- मनुष्यः गुणातीतः उच्यते।

(vii) ---------------- मनुष्यः गुणातीतः उच्यते।

(viii) ---------------- मनुष्यः गुणातीतः उच्यते।

9. **अधोनिर्दिष्टानां समस्तपदानां विग्रहवाक्यं लिखत–**

[अधोलिखित समस्त पदों के विग्रह वाक्य लिखें। Write the analytical sentence of the following compounds.]

(i) तुल्यप्रियाप्रियो = ----------------------------------------

(ii) मानापमानयोः = ----------------------------------------

(iii) गुणातीतः = ----------------------------------------

(iv) सर्वारम्भः = ----------------------------------------

www.thearyasamaj.org


10. **समाधत्त–**

[समाधान करें। Answer the questions.]

(i) गुणातीतः सर्वारम्भे कीदृशः भवति?

---------------------------------------------------------------

(ii) श्लोके कयोः पक्षयोः तुल्यः उक्तः?

---------------------------------------------------------------

(iii) लोष्टाश्मकाञ्चनेषु गुणातीतस्य दृष्टिः कीदृशी भवति?

---------------------------------------------------------------

(iv) धीरता कस्य विशेषता?

---------------------------------------------------------------

www.thearyasamaj.org



**श्लोकः**

**मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।**
**स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥38॥** (भ.गी. 14.26)

**पदच्छेदः**

माम् च यः अव्यभिचारेण भक्ति–योगेन सेवते।
सः गुणान् सम्–अतीत्य एतान् ब्रह्म–भूयाय कल्पते।।

**पदपरिचयः**

| **पदम्** | **विश्लेषणम्** | **पदम्** | **विश्लेषणम्** |
|---|---|---|---|
| माम् | अस्मद्–द. (सर्व.) पुं. द्विती. एक. | गुणान् | अ. पुं. द्विती. बहु. |
| | | समतीत्य | ल्यबन्तम् अव्ययम् |
| च | अव्ययम् | एतान् | एतद्–द. (सर्व.) पुं. द्विती. बहु. |
| यः | यद् - द. (सर्व) पुं. प्र. एक | | |
| अव्यभिचारेण | अ. पुं. तृ. एक. समस्तम् | ब्रह्मभूयाय | अ. नपुं. चतु. एक. समस्तम् |
| भक्तियोगेन | अ. पुं. तृ. एक. समस्तम् | कल्पते | क्लृप्–कर्तरि आत्मनेपदे लट् प्रपु. एक. |
| सेवते | सेव्–कर्तरि आत्मनेपदे लट् प्रपु. एक. | | |
| सः | तद्–द. (सर्व.) पुं. प्र. एक. | | |

**आकाङ्क्षा**

**यः सेवते।**

यः कं सेवते? — यः मां सेवते।

यः मां केन सेवते? — यः मां भक्तियोगेन सेवते।

यः मां कीदृशेन भक्तियोगेन सेवते? — यः माम् अव्यभिचारेण भक्तियोगेन सेवते।

**सः कल्पते।**

सः कस्मै कल्पते? — सः ब्रह्मभूयाय कल्पते।

सः किं कृत्वा ब्रह्मभूयाय कल्पते? — सः समतीत्य ब्रह्मभूयाय कल्पते।

सः कान् समतीत्य ब्रह्मभूयाय कल्पते? — सः एतान् गुणान् समतीत्य ब्रह्मभूयाय कल्पते।

**अन्वयः**

यः च अव्यभिचारेण भक्तियोगेन मां सेवते, सः एतान् गुणान् समतीत्य ब्रह्मभूयाय कल्पते।

www.thearyasamaj.org


## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | मनुष्यः | जो मनुष्य | Who |
| अव्यभिचारेण | व्यवच्छेदं विना | बिना किसी व्यवच्छेद के | unswering |
| भक्तियोगेन | भगवतः भक्तिरूप-योगाश्रयेण | भगवान् की भक्ति के ही सहारे | with devotion |
| मां सेवते | भगवन्तम् अवलम्बते | मेरा सेवन करता है | serves me |
| सः | तादृशः मनुष्यः | वह मनुष्य | he |
| एतान् गुणान् | पूर्वोक्तानि विशेषणानि | पूर्वोक्त गुणों को | these *Guṇas* |
| समतीत्य | अतिक्रम्य | अतिक्रमण करके | crossing beyond |
| ब्रह्मभूयाय | ब्रह्मत्वाय | ब्रह्म जैसी स्थिति को | for becoming *Brahman* |
| कल्पते | अधिकारी भवति | प्राप्त कर जाता है | is fitted |

## भावार्थः

**संस्कृतम्** – यः मनुष्यः सांसारिकम् आश्रयं विना केवलं भगवतः भक्तिम् आश्रित्य भगवन्तं सेवते, सः मनुष्यः पूर्वोक्तान् समस्तगुणान् अतिक्रम्य ब्रह्मस्थितिं प्राप्तुं योग्यः भवति।

**हिन्दी** – जो मनुष्य सांसारिक आश्रय के बिना केवल भगवान् की भक्ति पर आश्रित होकर भगवान् की सेवा करता है, वह मनुष्य पूर्वोक्त सभी गुणों का अतिक्रमण कर ब्रह्मस्थिति को प्राप्त करने के योग्य हो जाता है।

**आंग्लम्** – And he who serves he with an unswering devotion, he going beyond the *Guṇas*, is fitted for becoming *Brahman*.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

योऽव्यभिचारेण – यः + अव्यभिचारेण (विसर्गसन्धिः)

समतीत्यैतान् – समतीत्य + एतान् (वृद्धिसन्धिः)

(ख) **समासः**

अव्यभिचारेण – न व्यभिचारः अव्यभिचारः (नञ् तत्पुरुषः) तेन

www.thearyasamaj.org



| | | |
|---|---|---|
| भक्तियोगेन | - | भक्तिरेव योगः (कर्मधारयः) तेन |
| ब्रह्मभूयाय | - | ब्रह्मणः भूयम् ब्रह्मभूयम् (षष्ठीतत्पुरुषः) तस्मै |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| व्यभिचारेण | - | वि + अभि + चर् + घञ् |
| भक्तिः | - | भज् + क्तिन् |
| समतीत्य | - | सम् + अति + इ + ल्यप् |

## अभ्यासः - 32

### श्लोकः - 38

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान भरें। Fill in the blanks with appropriate words on the basis of the verse.]

--- --- योऽव्यभिचारेण -------------- --------------।
स ------------ --------------- ------------ कल्पते।।

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोक से पद चुनकर लिखें। Write the words from the verse according to the instructions.]

(क) द्वितीयान्तपदम् - (i) -------- (ii) -------- (iii) --------
(ख) तृतीयान्तपदम् - (i) -------- (ii) --------
(ग) क्रियापदम् - (i) -------- (ii) --------

3. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analytical sentences.]

(i) अव्यभिचारः = **न व्यभिचारः**
(ii) अविद्या = --------------
(iii) अस्पष्टम् = --------------
(iv) अनादिः = **न आदिः**
(v) अनन्तः = --------------
(vi) अनीश्वरः = --------------
(vii) अनल्पः = --------------

www.thearyasamaj.org


| | | | | |
|---|---|---|---|---|
| (viii) भक्तियोगेन | = | **भक्तिरेव** | **योगः** | **तेन** |
| (ix) ज्ञानयोगेन | = | ----------- | ------------ | ------ |
| (x) कर्मयोगेन | = | ----------- | ------------ | ------ |
| (xi) अर्थयोगेन | = | ----------- | ------------ | ------ |
| (xii) ब्रह्मयोगेन | = | ----------- | ------------ | ------ |

4. **प्रस्तुतश्लोकस्य अन्वयं पूरयत–**

[प्रस्तुत श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

यः ---- ---------- भक्तियोगेन ------ सेवते, सः ------- --------- ------ ब्रह्मभूयाय --------।

5. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) यः | (क) अ. पुं. तृ. एक. |
| (ii) च | (ख) क्लृप् – लट् प्रपु. एक. |
| (iii) गुणान् | (ग) अ. नपुं. चतु. एक. |
| (iv) ब्रह्मभूयाय | (घ) अव्ययम् |
| (v) भक्तियोगेन | (ङ) द. (सर्व.) पुं. प्र. एक. |
| (vi) कल्पते | (च) अ. पुं. द्विती. बहु. |

6. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) भक्तियोगेन | (क) भगवान् |
| (ii) ब्रह्मभूयाय | (ख) सेवते |
| (iii) गुणान् | (ग) कल्पते |
| (iv) सेव्यः | (घ) समतीत्य |

7. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि पृथक् पत्रे लिखत–**

[दिये गए शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the words below.]

(क) भूय (ख) सेव् (लट्) (ग) अस्मद् (घ) क्लृप् (लट्) (च) समतीत्य (छ) एतान्

www.thearyasamaj.org


**श्लोकः**

**ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।**
**शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥39॥** (भ.गी. 14.27)

**पदच्छेदः**

ब्रह्मणः हि प्रतिष्ठा अहम् अमृतस्य अव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्य ऐकान्तिकस्य च॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ब्रह्मणः | ब्रह्मन् – न. नपुं. षष्ठी एक. | च | अव्ययम् |
| हि | अव्ययम् | शाश्वतस्य | अ. पुं. षष्ठी एक. विशेषणम् |
| प्रतिष्ठा | आ. स्त्री. प्र. एक. | च | अव्ययम् |
| अहम् | अस्मद् – द. (सर्व.) पुं. प्र. एक. | धर्मस्य | अ. पुं. षष्ठी एक. |
| | | सुखस्य | अ. नपुं. षष्ठी एक. |
| अमृतस्य | अ. नपुं. षष्ठी एक. | ऐकान्तिकस्य | अ. नपुं. षष्ठी एक. विशेषणम् |
| अव्ययस्य | अ. नपुं. षष्ठी एक. विशेषणम् | च | अव्ययम् |

**आकाङ्क्षा**

**अहम् (अस्मि।)**

| | |
|---|---|
| अहं किम् अस्मि? | अहं प्रतिष्ठा अस्मि। |
| अहं कस्य प्रतिष्ठा अस्मि? | अहं ब्रह्मणः प्रतिष्ठा अस्मि। |
| पुनश्च कस्य प्रतिष्ठा अस्मि? | अमृतस्य प्रतिष्ठा अस्मि। |
| कीदृशस्य अमृतस्य प्रतिष्ठा अस्मि? | अव्ययस्य अमृतस्य प्रतिष्ठा अस्मि। |
| पुनश्च कस्य प्रतिष्ठा अस्मि? | धर्मस्य प्रतिष्ठा अस्मि। |
| कीदृशस्य धर्मस्य प्रतिष्ठा अस्मि? | शाश्वतस्य धर्मस्य प्रतिष्ठा अस्मि। |
| पुनश्च कस्य प्रतिष्ठा अस्मि? | सुखस्य प्रतिष्ठा अस्मि। |
| कीदृशस्य सुखस्य प्रतिष्ठा अस्मि? | ऐकान्तिकस्य सुखस्य प्रतिष्ठा अस्मि। |

**अन्वयः**

हि ब्रह्मणः, अव्ययस्य अमृतस्य च शाश्वतस्य धर्मस्य च ऐकान्तिकस्य सुखस्य च प्रतिष्ठा अहम् (एव) अस्मि।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हि | यतः | क्योंकि | Indeed |
| ब्रह्मणः | परमपदस्य | ब्रह्म का | of *Brahman* |
| अव्ययस्य | अविनाशिनः | अविनाशी | the immutable |
| अमृतस्य | अमरतायाः | अमृत का | the immortal |
| शाश्वतस्य | सनातनस्य | सनातन | everlasting |
| धर्मस्य | स्वरूपस्य | धर्म का | of *Dharma* |
| ऐकान्तिकस्य | अक्षयस्य | अक्षय | absolute |
| सुखस्य | आनन्दस्य | सुख का | of bliss |
| प्रतिष्ठा | आश्रयः | आश्रय | the abode |
| अहम् अस्मि | भगवान् भवामि | मैं (भगवान्) हूँ | I am |

**भावार्थः**

**संस्कृतम्** – यतो हि परमपदस्य ब्रह्मणः, अविनाशिनः अमृतस्य, सनातनस्य धर्मस्य अक्षयसुखस्य च आश्रयः भगवान् एव अस्ति।

**हिन्दी** – क्योंकि परमपद रूप ब्रह्म, अविनाशी अमृत, सनातन धर्म और अक्षय सुख का आश्रय केवल भगवान् ही है।

**आंग्लम्** – For I am the abode of *Brahman*, the immortal and the Immutable, the eternal *Dharma* and obsolute Bliss.

**निदर्शनम्**

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| ब्रह्मणो हि | – | ब्रह्मणः + हि (विसर्गसन्धिः) |
| प्रतिष्ठाहम् | – | प्रतिष्ठा + अहम् (दीर्घसन्धिः) |
| अमृतस्याव्ययस्य | – | अमृतस्य + अव्ययस्य (दीर्घसन्धिः) |
| सुखस्यैकान्तिकस्य | – | सुखस्य + ऐकान्तिकस्य (वृद्धिसन्धिः) |

www.thearyasamaj.org


(ख) **कृदन्तः**

| | | |
|---|---|---|
| प्रतिष्ठा | - | प्र + स्था + अङ् + टाप् |
| अमृतस्य | - | अ + मृ + क्त - अमृतम्, तस्य |

(ग) **तद्धितान्तः**

| | | |
|---|---|---|
| शाश्वतस्य | - | शश्वद् भवः शाश्वतः, तस्य<br>शश्वत् + अण् |
| ऐकान्तिकस्य | - | (एकान्तस्य भावः ऐकान्तिकम्) तस्य<br>एकान्तिक + अण् |

(घ) **कारकम्**

| | | |
|---|---|---|
| ब्रह्मणः प्रतिष्ठा | - | कर्तरि षष्ठी |

## अभ्यासः - 33

### श्लोकः - 39

1. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये हुए पदों के प्रातिपदिक लिखें। Write the nominal stem of the given words.]

(i) ब्रह्मणः = ----------

(ii) अहम् = ----------

(iii) शाश्वतस्य = ----------

(iv) प्रतिष्ठा = ----------

(v) सुखस्य = ----------

2. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match the appropriate one.]

| | |
|---|---|
| (i) ब्रह्मणो हि | (क) यण्सन्धिः |
| (ii) प्रतिष्ठाहम् | (ख) वृद्धिसन्धिः |
| (iii) अस्त्येव | (ग) विसर्गसन्धिः |
| (iv) सुखस्यैकान्तिकस्य | (घ) दीर्घसन्धिः |

3. **विश्लेषणानुसारं श्लोके प्रयुक्तं पदं लिखत–**

[विश्लेषण के अनुसार श्लोक में प्रयुक्त पद लिखे। Write the words available in the verse as directed.]

(क) न. नपुं. षष्ठी एक. = ----------

www.thearyasamaj.org



(ख) द. पुं. प्र. एक. = ----------

(ग) अ. पुं. षष्ठी एक. (विशेष्यणम्) = ----------

(घ) अ. पुं. षष्ठी एक. (विशेषणम्) = ----------

(ङ) आ. स्त्री. प्र. एक. = ----------

4. **यथोचितं विशेषणं विशेष्यं वा लिखत–**

[उचित विशेषण या विशेष्य लिखें। Write qualifier or qualificand as required.]

| | **विशेषणम्** | **विशेष्यम्** |
|---|---|---|
| (क) | ------------- | अमृतस्य |
| (ख) | शाश्वतस्य | ------------- |
| (ग) | ऐकान्तिकस्य | ------------- |

5. **शब्दरूपं पूरयत–**

[शब्दरूप पूरा करें। Complete the declension.]

| | | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|---|
| **यथा–** | (क) | **ब्रह्मणः** | **ब्रह्मणोः** | **ब्रह्मणाम्** |
| | (ख) | ------------- | आत्मनोः | ------------- |
| | (ग) | ------------- | ------------- | शर्मणाम् |
| | (घ) | वर्मणः | ------------- | ------------- |

6. **अन्वयं पूरयत–**

[अन्वय पूरा करें। Complete the construction of the verse.]

हि --------- ---------- ---------- ----- --------- ------ ---

--------- ------ --- प्रतिष्ठा ------- ------ अस्मि।

7. **श्लोकानुसारं रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान भरें। Fill in the blanks on the basis of the verse.]

**यथा–** (i) अहम् **ब्रह्मणः** प्रतिष्ठा अस्मि।

(ii) अहम् -------- प्रतिष्ठा अस्मि।

(iii) अहम् -------- प्रतिष्ठा अस्मि।

(iv) अहम् -------- प्रतिष्ठा अस्मि।

www.thearyasamaj.org


8. **समाधत्त–**

[समाधान दें। Answer the questions.]

(i) अस्मिन् श्लोके 'अहम्' इति कस्य कृते प्रयुक्तं पदम्? ------------------------------------

(ii) ब्रह्मणः प्रतिष्ठा कः? ------------------------------------

(iii) भगवान् कीदृशस्य सुखस्य आश्रयः? ------------------------------------

(iv) श्लोके कस्य धर्मस्य चर्चा अस्ति? ------------------------------------

9. **श्लोकस्य भावार्थं स्ववाक्यैः लिखत–**

[श्लोक का भावार्थ अपने वाक्यों में लिखें। Write the meaning of the verse in your own words.]

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

------------------------------------------------------------------------

www.thearyasamaj.org

# पञ्चदशोऽध्यायः

## श्लोकः

**श्री भगवान् उवाच–**

**ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम् ।**
**छन्दांसि यस्य पर्णानि यस्तं वेद स वेदवित् ॥40॥** (भ.गी. 15.1)

## पदच्छेदः

श्री भगवान् उवाच
ऊर्ध्व–मूलम् अधः–शाखम् अश्वत्थम् प्राहुः अव्ययम्।
छन्दांसि यस्य पर्णानि यः तम् वेद सः वेदवित्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| श्री भगवान् | त. पुं. प्र. एक. समस्तम् | यस्य | यद्–द. (सर्व.) पुं. षष्ठी एक. |
| उवाच | ब्रू – कर्तरि लिट् प्रपु. एक. | पर्णानि | अ. नपुं. प्र. बहु. |
| ऊर्ध्वमूलम् | अ. पुं. प्र. एक. समस्तम् | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| अधःशाखम् | अ. पुं. द्विती. एक. समस्तम् | तम् | तद्–द. (सर्व.) पुं. द्विती. एक. |
| अश्वत्थम् | अ. पुं. द्विती. एक. | वेद | विद्–कर्तरि लट् प्रपु. एक. (वैकल्पिकं रूपम्) |
| प्राहुः | प्र + ब्रू–कर्तरि लट् प्रपु. बहु. (वैकल्पिकं रूपम्) | सः | तद्–द. (सर्व.) पुं. प्र. एक. |
| अव्ययम् | अ. पुं. द्विती. एक. समस्तम् | वेदवित् | वेदविद्–द.पुं.प्र.एक. समस्तम् |
| छन्दांसि | छन्दस्–स. नपुं. प्र. बहु. | | |

## आकाङ्क्षा

**प्राहुः।**

| | |
|---|---|
| किं प्राहुः? | अव्ययं प्राहुः। |
| कम् अव्ययं प्राहुः? | अश्वत्थम् अव्ययं प्राहुः। |
| कीदृशम् अश्वत्थम् अव्ययं प्राहुः? | ऊर्ध्वमूलम् अश्वत्थम् अव्ययं प्राहुः। |

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च कीदृशम् अश्वत्थम्? | अधःशाखम् अश्वत्थम्। |
| अश्वत्थरूपस्य अव्ययस्य पर्णानि कानि? | छन्दांसि पर्णानि। |

**वेद।**

| | |
|---|---|
| कं वेद? | तं (अव्ययं) वेद। |
| कः अव्ययं वेद? | यः अव्ययं वेद। |
| यः अव्ययं वेद, सः कः भवति? | वेदवित् भवति। |

## अन्वयः

श्री भगवान् उवाच-

ऊर्ध्वमूलम् अधः शाखम् अश्वत्थम् अव्ययं प्राहुः, यस्य छन्दांसि पर्णानि तं यः वेद, सः वेदवित् (भवति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| श्री भगवान् | भगवान् कृष्णः | भगवान् कृष्ण | Lord *kṛṣṇa* |
| उवाच | जगाद | बोले | said |
| ऊर्ध्वमूलम् | यस्य मूलम् उपरि वर्तते | ऊपर की ओर मूल वाले | rooted above |
| अधःशाखम् | यस्य शाखाः अधः सन्ति | नीचे की ओर शाखाओं वाले | branches belows |
| अश्वत्थम् | बोधिम् | अश्वत्थ वृक्ष को | the *Aśvattha* |
| अव्ययम् | अविनाशिनम् | अव्यय | indestructible |
| प्राहुः | वदन्ति | कहते हैं | speak of |
| यस्य | अश्वत्थस्य | जिसके | of which |
| छन्दांसि | वेदाः | वेद | metres of hymns |
| पर्णानि | पत्राणि | पत्ते | leaves |
| यः | पुरुषः | जो पुरुष | who |
| तं | अव्ययम् | उस अव्यय को | that |
| वेद | जानाति | जानता है | knows |
| सः वेदवित् | सः वेदानां ज्ञाता | वह वेदज्ञ | he is *veda* knower |

www.thearyasamaj.org


## भावार्थः

**संस्कृतम्** – भगवान् कृष्णः अवदत्–यस्य मूलम् ऊर्ध्वदिशि, शाखाश्च अधोदिशि, पर्णानि च छन्दांसि सन्ति, तादृशं संसाररूपम् अश्वत्थम् अव्ययं वदन्ति। तं संसाररूपं वृक्षं यः जानाति, सः समस्तवेदानां ज्ञाता अस्ति।

**हिन्दी** – भगवान् कृष्ण बोले– जिसका मूल ऊपर की ओर तथा शाखाएँ नीचे की ओर हैं, वेद जिसके पत्ते हैं, उस संसार रूपी अश्वत्थ को अव्यय कहते हैं। उस संसार रूपी वृक्ष को जो जान लेता है वही समस्त वेदों का ज्ञाता है।

**निदर्शनम्** – It is said by lord *kṛṣṇa* - an imperishable Aśvattha tree with its root above and branches below. Its leaves are the *vedas,* he who knows it is knower of *vedas.*

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

प्राहुरव्ययम् – प्राहुः + अव्ययम् (विसर्गसन्धिः)

यस्तम् – यः + तम् (विसर्गसन्धिः)

(ख) **समासः**

ऊर्ध्वमूलम् – ऊर्ध्वं (दिशि) मूलं यस्य सः ऊर्ध्वमूलः (बहुव्रीहिः) तम्

अधःशाखम् – अधो: (दिशि) शाखाः यस्य सः अधः शाखः (बहुव्रीहिः) तम्

अव्ययम् – अविद्यमानः व्ययः यस्य सः अव्ययः (बहुव्रीहिः) तम्

वेदवित् – वेदं वेत्ति इति वेदवित् (उपपदतत्पुरुषः)

(ग) **धातोः विशेषप्रयोगः**

प्राहुः – प्र + ब्रू धातोः लटि वैकल्पिकरूपाणि–

**आह आहतुः आहुः (प्रपु)**

वेद – विद् धातोः लटि वैकल्पिकं रूपम्

(घ) **कृदन्तः**

छन्दांसि – छन्द् + असुन् - छन्दस्

पर्णानि – पर्ण् + अच् - पर्ण

(ii) **कोशः**

**अश्वत्थः** – बोधिद्रुमश्चलदलः पिप्पलः कुञ्जराशनः, अश्वत्थे (इत्यमरकोशः)

www.thearyasamaj.org


## अभ्यासः - 34

### श्लोकः - 40

1. **अत्र प्रदत्तानां पदानाम् अन्यवचनयोः रूपाणि लिखत–**

[अधोलिखित पदों के अन्य रूप लिखें। Complete the declansion of the following words.]

| | एक. | द्वि. | बहु. | विभक्तिः |
|---|---|---|---|---|
| यथा– | (क) अव्ययम् | **अव्ययौ** | **अव्ययान्** | **द्वितीया** |
| | (ख) तम् | ---------- | ---------- | द्वितीया |
| | (ग) यस्य | ---------- | ---------- | ------------- |
| | (घ) सः | ---------- | ---------- | ------------- |
| | (ङ) छन्दः | ---------- | ---------- | ------------- |
| | (च) पर्णम् | ---------- | ---------- | ------------- |

2. **अधोलिखितानां प्रश्नानाम् उत्तराणि लिखत–**

[अधोलिखित प्रश्नों के उत्तर लिखें। Answer the questions.]

(क) श्लोके 'ऊर्ध्वमूलम्' इति कस्य विशेषणम्? ----------------------------

(ख) अश्वत्थस्य अपरं विशेषणं किम्? ----------------------------

(ग) अश्वत्थः कः उच्यते? ----------------------------

(घ) अश्वत्थस्य पर्णानि श्लोके कानि उक्तानि? ----------------------------

3. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analytical sentences.]

| | | | | | |
|---|---|---|---|---|---|
| यथा– | (क) वेदवित् | = | **वेदं** | **वेत्ति** | **इति** |
| | (ख) शास्त्रवित् | = | ---------- | ----------- | ---------- |
| | (ग) धर्मवित् | = | ---------- | ----------- | ---------- |
| | (घ) न्यायवित् | = | ---------- | ----------- | ---------- |
| | (ङ) व्याकरणवित् | = | ---------- | ----------- | ---------- |

www.thearyasamaj.org


4. **उचितेन कोष्ठकस्थेन शब्देन रिक्तं स्थानं पूरयत–**

[कोष्ठक में प्रदत्त शब्दों से रिक्त स्थान भरें। Fill in the blanks with the words given in the bracket.]

(क) अश्वत्थस्य मूलम् ------------ अस्ति।
(ख) अश्वत्थम् ------------------ प्राहुः।
(ग) यस्य पर्णानि ----------------- सन्ति।
(घ) यः तम् अव्ययं वेद सः --------- कथ्यते।
(ङ) अश्वत्थवृक्षस्य ---------------- सन्ति।

| |
|---|
| वेदवित् |
| छन्दांसि |
| अधः |
| ऊर्ध्वम् |
| अव्ययम् |

5. **पदपरिचयं लिखत–**

[पदों का परिचय दें। Identify the words.]

यथा– (i) यः — **द. पुं. प्र. एक.**
(ii) अश्वत्थम् --------------------
(iii) वेद --------------------
(iv) वेदवित् --------------------
(v) छन्दांसि --------------------

6. **श्लोकस्य भावार्थं पूरयत–**

[भावार्थ की पूर्ति करें। Complete the meaning of the verse.]

भगवान् कृष्णः ---------------- ---------------- ऊर्ध्वदिशि, -----------
------------ ---------- ---------- -------------- ------------तादृशं
-------------- ------- ---------- वदन्ति। ------- -------------
----------------- यः -------- --- समस्तवेदानां ------------- --------।

7. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) छन्दस् (ख) वेदविद् (ग) तद्

------------------------------------------------------------
------------------------------------------------------------
------------------------------------------------------------
------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**अधश्चोर्ध्वं प्रसृतास्तस्य शाखा गुणप्रवृद्धा विषयप्रवालाः ।**
**अधश्च मूलान्यनुसन्ततानि कर्मानुबन्धीनि मनुष्यलोके ॥41॥** (भ.गी. 15.2)

**पदच्छेदः**

अधः च ऊर्ध्वम् प्रसृताः तस्य शाखाः गुण–प्रवृद्धाः विषय–प्रवालाः।
अधः च मूलानि अनुसन्ततानि कर्म-अनुबन्धीनि मनुष्य–लोके।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अधः | अव्ययम् | विषयप्रवालाः | आ. स्त्री. प्र. बहु. समस्तम्, विशेषणम् |
| च | अव्ययम् | | |
| ऊर्ध्वम् | अव्ययम् | मूलानि | अ. नपुं. प्र. बहु. |
| प्रसृताः | आ. स्त्री. प्र. बहु. विशेषणम् | अनुसन्ततानि | अ. नपुं. प्र. बहु. विशेषणम् |
| तस्य | तद्–द. (सर्व.) पुं.षष्ठी.एक. | कर्मानुबन्धीनि | कर्मानुबन्धिन्–न. नपुं. प्र. बहु. समस्तम् |
| शाखाः | आ. स्त्री. प्र. बहु. | | |
| गुणप्रवृद्धाः | आ. स्त्री. प्र. बहु. समस्तम्, विशेषणम् | मनुष्यलोके | अ. पुं सप्त एक. समस्तम् |

**आकाङ्क्षा**

**प्रसृताः।**

| | |
|---|---|
| काः प्रसृताः? | शाखाः प्रसृताः। |
| कीदृश्यः शाखाः? | विषयप्रवालाः शाखाः। |
| पुनश्च कीदृश्यः शाखाः? | गुणप्रवृद्धाः शाखाः। |
| कस्य शाखाः? | तस्य (संसाररूपवृक्षस्य) शाखाः। |
| तस्य शाखाः कुत्र प्रसृताः? | अधः प्रसृताः। |
| पुनश्च कुत्र प्रसृताः? | ऊर्ध्वं च प्रसृताः। |

**अनुसन्ततानि।**

| | |
|---|---|
| कानि अनुसन्ततानि? | मूलानि अनुसन्ततानि। |
| कीदृशानि मूलानि? | कर्मानुबन्धीनि मूलानि। |

www.thearyasamaj.org


| | |
|---|---|
| मूलानि कुत्र अनुसन्ततानि? | मूलानि अधः अनुसन्ततानि। |
| पुनश्च कुत्र अनुसन्ततानि? | मनुष्यलोके च अनुसन्ततानि। |

**अन्वयः**

तस्य गुणप्रवृद्धाः विषयप्रवालाः शाखाः अधः ऊर्ध्वम् च प्रसृताः, कर्मानुबन्धीनि मूलानि मनुष्यलोके अधः च अनुसन्ततानि।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| तस्य | संसाररूपवृक्षस्य | संसाररूपी वृक्ष के | Its |
| गुणप्रवृद्धाः | गुणैः वृद्धिं गताः | गुणों के द्वारा बढ़ी हुई | nourished by the *Guṇas* |
| विषयप्रवालाः | विषयरूपाङ्कुरयुताः | विषय रूप कोंपलों वाली | sense objects are its buds |
| शाखाः | विटपाः | शाखायें | branches |
| अधः | अधो लोके | अधो लोक में | below |
| ऊर्ध्वम् | ऊर्ध्वलोके | ऊर्ध्व लोक में | above |
| च | अपि च | और | and |
| प्रसृताः | व्याप्ताः | फैली हुई हैं | spread |
| कर्मानुबन्धीनि | कर्मसम्बद्धानि | कर्मों के अनुसार बान्धने वाले | originating action |
| मूलानि | वृक्षमूलानि | मूल | the roots |
| मनुष्यलोके | पृथिव्याम् | मनुष्य लोक में | in the world of men |
| अधः | अधो लोके | अधो लोक में | below |
| च | अपि च | और | and |
| अनुसन्ततानि | प्रसृतानि | फैले हुए हैं | are stretched for |

**भावार्थः**

**संस्कृतम्** – तस्य संसाररूपवृक्षस्य सत्त्व-रजस्तमोगुणैः वृद्धिं गताः सांसारिकविषयरूपैः अङ्कुरैः युताः शाखाः अधो लोके ऊर्ध्वलोके सर्वत्रैव व्याप्ताः सन्ति। भूलोके स्वस्वकर्मसम्बद्धानि मूलानि अपि अधो लोके ऊर्ध्वलोके च सर्वत्र प्रसृतानि सन्ति।

www.thearyasamaj.org



**हिन्दी** – उस संसार रूपी वृक्ष की सत्त्व-रज-तम गुणों से बढ़ी हुई, विषयरूपी किसलयों वाली शाखायें अधः लोक तथा ऊर्ध्वलोक में सर्वत्र ही फैली हुई हैं। मनुष्य लोक में अपने-अपने कर्मों के अनुसार बाँधने वाले मूल भी अधः लोक तथा ऊर्ध्व लोक में सर्वत्र फैले हुए हैं।

**आंग्लम्** – Below and above spread its branches nourished by the *Guṇas*, sense objects are its buds and below in the world of men stretch forth the roots, engendering action.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

अधश्चोर्ध्वम् – अधः + च + ऊर्ध्वम्
(विसर्गसन्धिः) (गुणसन्धिः)

प्रसृतास्तस्य – प्रसृताः + तस्य (विसर्गसन्धिः)

शाखा गुणप्रवृद्धा विषयप्रवालाः – शाखाः + गुणप्रवृद्धाः + विषयप्रवालाः
(विसर्गसन्धिः) (विसर्गसन्धिः)

अधश्च – अधः + च (विसर्गसन्धिः)

मूलान्यनुसन्ततानि – मूलानि + अनुसन्ततानि (यण्सन्धिः)

कर्मानुबन्धीनि – कर्म + अनुबन्धीनि (दीर्घसन्धिः)

**(ख) समासः**

गुणप्रवृद्धाः – गुणैः प्रवृद्धा गुणप्रवृद्धा (तृतीयातत्पुरुषः) ताः

विषयप्रवालाः – विषया एवः प्रवालाः यस्याः सा विषयप्रवाला (बहुव्रीहिः) ताः

कर्मानुबन्धीनि – कर्मणि एव अनुबन्धीनि कर्मानुबन्धीनि (कर्मधारयः)

मनुष्यलोके – मनुष्यानां लोकः मनुष्यलोकः (षष्ठीतत्पुरुषः) तस्मिन्

**(ग) कृदन्तः**

प्रसृताः – प्र + सृ + क्त

प्रवृद्धाः – प्र + वृध् + क्त

प्रवालाः – प्र + वल् + णिच् + अच्

www.thearyasamaj.org


| | | |
|---|---|---|
| अनुसन्ततानि | - | अनु + सम् + तन् + क्त |
| अनुबन्धीनि | - | अनु + बन्ध् + णिनि-अनुबन्धिन् |

## अभ्यासः - 35
## श्लोकः - 41

1. **विग्रहवाक्यं लिखत–**

[विग्रहवाक्य लिखें। Write the analytical sentence.]

यथा– (क) गुणप्रवृद्धः = **गुणेन** **प्रवृद्धः** **(तृतीयातत्पुरुषः)**

(ख) धनप्रवृद्धः = --------- ---------- (---------------)

(ग) अर्थसिद्धः = --------- ---------- (---------------)

(घ) हस्तलिखितः = --------- ---------- (---------------)

(ङ) नखभिन्नः = --------- ---------- (---------------)

(च) कर्मानुबन्धीनि = **कर्मणि** **एव** **अनुबन्धीनि** **(कर्मधारयः)**

(छ) ज्ञानानुबन्धीनि = --------- ---- ------- (---------------)

(ज) वचनानुबन्धीनि = --------- ---- ------- (---------------)

(झ) भावानुबन्धीनि = --------- ---- ------- (---------------)

2. **विसर्गसन्धेः पञ्च-उदाहरणानि लिखत–**

[विसर्ग सन्धि के पाँच उदाहरण लिखें। Write five example of *Visarga sandhi.*]

यथा– (क) **अधश्च** = **अधः** + **च**

(ख) ---------- = ---------- + ----------

(ग) ---------- = ---------- + ----------

(ङ) ---------- = ---------- + ----------

(च) ---------- = ---------- + ----------

3. **श्लोकात् यथानिर्दिष्टानि पदानि लिखत–**

[श्लोक से निर्देशानुसार पद लिखें। Write the words from the verse as directed.]

(क) अव्ययपदम् - (i) ---------- (ii) ---------- (iii) ----------

(ख) कृदन्तः - (i) ---------- (ii) ---------- (iii) ----------

(iv) ---------- (v) ---------- (vi) ----------

(ग) प्रथमान्तपदम् (नपुं.) - (i) ---------- (ii) ---------- (iii) ----------

www.thearyasamaj.org


4. **शब्दरूपं पूरयत–**

[शब्दरूप पूरा करें। Complete the declension.]

| | शब्दाः | एक. | द्वि. | बहु. |
|---|---|---|---|---|
| यथा– | अनुबन्धिन् | **अनुबन्धि** | **अनुबन्धिनी** | **अनुबन्धीनि** |
| | उपयोगिन् | उपयोगि | -------- | उपयोगीनि |
| | स्थायिन् | ------ | स्थायिनी | स्थायीनि |

5. **विशेषणं विशेष्यं वा लिखत–**

[विशेषण अथवा विशेष्य लिखें। Write the qualifier or qualified.]

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| (i) | गुणप्रवृद्धाः विषयप्रवालाः | --------- |
| (ii) | --------------- | मूलानि |

6. **प्रश्नानाम् उत्तरं लिखत–**

[प्रश्नों के उत्तर लिखे। Answer the questions.]

(क) श्लोके 'शाखाः' कस्य उक्ताः? ----------------------------------

(ख) अधः कानि अनुसन्ततानि? ----------------------------------

(ग) 'विषयप्रवालाः' कासां विशेषणम्? ----------------------------------

(घ) शाखाः केः प्रवृद्धाः? ----------------------------------

7. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) प्रसृत (ख) प्रवाल (ग) कर्मन् (घ) ऊर्ध्वम्

--------------------------------------------------------------

--------------------------------------------------------------

--------------------------------------------------------------

--------------------------------------------------------------

--------------------------------------------------------------

--------------------------------------------------------------

--------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च सम्प्रतिष्ठा ।**
**अश्वत्थमेनं सुविरूढमूलमसङ्गशस्त्रेण दृढेन छित्त्वा ॥42॥**
**ततः पदं तत्परिमार्गितव्यं यस्मिन्गता न निवर्तन्ति भूयः ।**
**तमेव चाद्यं पुरुषं प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी ॥43॥** (भ.गी. 15.3-4)

**पदच्छेदः**

न रूपम् अस्य इह तथा उप–लभ्यते न अन्तः न च आदिः न च सम्–प्रतिष्ठा।
अश्वत्थम् एनम् सु–विरूढ–मूलम् असङ्ग–शस्त्रेण दृढेन छित्त्वा।।
ततः पदम् तत् परि–मार्गितव्यम् यस्मिन् गताः न निवर्तन्ति भूयः।
तम् एव च आद्यम् पुरुषम् प्रपद्ये यतः प्रवृत्तिः प्रसृता पुराणी।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| न | अव्ययम् | ततः | तद्धितान्तम् अव्ययम् |
| रूपम् | अ. नपुं. प्र. एक. | पदम् | अ. नपुं. प्र. एक. |
| अस्य | इदम्–म. (सर्व.) पुं.षष्ठी एक. | तत् | तद्–द. (सर्व.) नपुं. प्र. एक. |
| इह | तद्धितान्तम् अव्ययम् | परिमार्गितव्यम् | अ. नपुं. प्र. एक. |
| तथा | तद्धितान्तम् अव्ययम् | यस्मिन् | यद्–द. (सर्व.) नपुं. सप्त. एक. |
| उपलभ्यते | उप + लभ्–कर्मणि | गताः | अ. पुं. प्र. बहु. |
| | लट् प्रपु. एक. | न | अव्ययम् |
| न | अव्ययम् | निवर्तन्ति | त. नपुं. प्र. बहु. |
| अन्तः | अ. पुं. प्र. एक. | भूयः | अव्ययम् |
| न, च | अव्यये | तम् | तद्–द. (सर्व.) पुं. द्विती. एक. |
| आदिः | इ. स्त्री. प्र. एक. | एव, च | अव्यये |
| न, च | अव्यये | आद्यम् | अ. पुं. द्विती. एक. विशेषणम् |
| सम्प्रतिष्ठा | आ. स्त्री प्र. एक. | पुरुषम् | अ. पुं. द्विती. एक. |
| अश्वत्थम् | अ. पुं. द्विती. एक. | प्रपद्ये | प्र + पद्–कर्तरि आत्मनेपदे |
| एनम् | एतद्–द. (सर्व.) | | लट् उपु. एक. |
| | पुं. द्विती. एक. | यतः | तद्धितान्तम् अव्ययम् |
| सुविरूढमूलम् | अ. पुं. द्विती. एक. | प्रवृत्तिः | इ. स्त्री. प्र. एक. |
| | समस्तम् | प्रसृता | आ. स्त्री. प्र. एक. |
| असङ्गशस्त्रेण | अ. नपुं. तृ. एक. समस्तम् | पुराणी | ई. स्त्री. प्र. एक. विशेषणम् |
| दृढेन | अ. नपुं. तृ. एक. विशेषणम् | | |
| छित्त्वा | क्त्वान्तम अव्ययम | | |

www.thearyasamaj.org


## आकाङ्क्षा

**न उपलभ्यते।**

| | |
|---|---|
| किं न उपलभ्यते? | रूपं न उपलभ्यते। |
| कस्य रूपं न उपलभ्यते? | अस्य (संसाररूपवृक्षस्य) रूपं न उपलभ्यते। |
| कुत्र न उपलभ्यते? | इह न उपलभ्यते। |
| कीदृशं रूपं न उपलभ्यते? | तथा (यथा दृश्यते) न उपलभ्यते। |
| अस्य क: न (अस्ति)? | अस्य अन्त: न (अस्ति)। |
| पुनश्च अस्य का न? | अस्य आदि: च न। |
| अपि च अस्य का न (अस्ति)? | अस्य सम्प्रतिष्ठा च न। |

**तत: परिमार्गितव्यम्।**

| | |
|---|---|
| तत: किं परिमार्गितव्यम्? | तत: पदं परिमार्गितव्यम्। |
| किं कृत्वा परिमार्गितव्यम्? | छित्त्वा परिमार्गितव्यम्। |
| कं छित्त्वा? | एनम् अश्वत्थं छित्त्वा। |
| कीदृशम् अश्वत्थम्? | सुविरूढमूलम् अश्वत्थम्। |
| केन छित्त्वा? | असङ्गशस्त्रेण छित्त्वा। |
| कीदृशेन असङ्गशस्त्रेण छित्त्वा? | दृढेन असङ्गशस्त्रेण छित्त्वा। |

**न निवर्तन्ति।**

| | |
|---|---|
| के न निवर्तन्ति? | गता: न निवर्तन्ति। |
| कुत्र गता: न निवर्तन्ति? | यस्मिन् (परमपदे) गता: न निवर्तन्ति। |
| कदा न निवर्तन्ति? | भूय: न निवर्तन्ति। |

**प्रपद्ये।**

| | |
|---|---|
| कं प्रपद्ये? | पुरुषं प्रपद्ये। |
| कीदृशं पुरुषं प्रपद्ये? | तमेव आद्यं पुरुषं प्रपद्ये। |

**प्रसृता।**

| | |
|---|---|
| का प्रसृता? | प्रवृत्ति: प्रसृता। |
| कीदृशी प्रवृत्ति:? | पुराणी प्रवृत्ति:। |
| कुत: प्रसृता? | यत: (परमपदात्) प्रसृता। |

## अन्वय:

अस्य रूपं तथा इह न उपलभ्यते, (अस्य) न अन्त:, न च आदि:, न च सम्प्रतिष्ठा। एनं

www.thearyasamaj.org


सूविरूढमूलम् अश्वत्थम् दृढेन असङ्गशस्त्रेण छित्त्वा ततः तत्पदं परिमार्गितव्यम् यस्मिन् गताः भूयः न निवर्तन्ति। यतः पुराणी प्रवृत्तिः प्रसृता तमेव आद्यं पुरुषं च प्रपद्ये।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अस्य | एतस्य | इसका | Its |
| रूपम् | आकारः | स्वरूप | form |
| तथा | तेन प्रकारेण | वैसा | as such |
| इह | अत्र | यहाँ | here |
| न उपलभ्यते | न मिलति | नहीं मिलता है | is not perceived |
| अन्तः | आभ्यन्तरे | भीतर | end |
| आदिः | प्रारम्भः | आदि | origin |
| सम्प्रतिष्ठा | स्थितिः | स्थिति | foundation |
| एनम् | इमम् | इस | this |
| सुविरूढमूलम् | दृढमूलम् | सुदृढ मूल वाले | firm rooted |
| अश्वत्थम् | अश्वत्थवृक्षम् | अश्वत्थ वृक्ष को | *Aśvattha* |
| दृढेन | सबलेन | मजबूत | strongly |
| असङ्गशस्त्रेण | वैराग्यायुधेन | वैराग्यरूपी शस्त्र से | with the axe of non attachment |
| छित्त्वा | कर्तित्वा | काटकर | having cut asunder |
| ततः | तदनन्तरम् | उसके पश्चात् | then |
| तत्पदम् | परमं पदम् | उस परम पद को | that goal |
| परिमार्गितव्यम् | अन्वेषणीयम् | खोजना चाहिए | should be sought for |
| यस्मिन् गताः | यत् परमपदं प्राप्ताः | जिस पद को प्राप्त करने वाले | whither gone |
| भूयः | पुनः | फिर से | again |
| न निवर्तन्ति | न प्रत्यागच्छन्ति | लौटकर नहीं आते | never return |
| आद्यं पुरुषम् | परमात्मानम् | परमात्मा की | primeval *Puruṣa* |
| प्रपद्ये | शरणं गच्छामि | शरण में हूँ | I seek refuge |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| यतः | यस्मात् पुरुषात् | जिस परमात्मा से | whence |
| पुराणी प्रवृत्तिः | सनातनी सृष्टिः | अनादिकाल से चली आ रही सृष्टि | ancient activity |
| प्रसृता | विस्तारं गता | विस्तार को प्राप्त हुई | streamed forth |

## भावार्थः

**संस्कृतम्** – अस्य संसाररूपस्य वृक्षस्य स्वरूपं पूर्वोक्तप्रकारेण अत्र न मिलति यतोहि तस्य आदिः, अन्तः स्थितिः च न अस्ति। इमम् सुदृढमूलम् अश्वत्थवृक्षं सबलेन वैराग्यनामकेन आयुधेन कर्तित्वा, तदनन्तरं परमपदस्य अन्वेषणं करणीयम्, यत्र गताः मानवाः पुनः न प्रत्यागच्छन्ति। यस्मात् परमात्मनः एषा सनातनी सृष्टिः विस्तारं प्राप्ता तस्य एव पुरुषस्य शरण्यः अहम् अस्मि।

**हिन्दी** – इस संसाररूपी वृक्ष का स्वरूप पूर्वोक्त श्लोक में वर्णित स्वरूप के अनुसार यहाँ नहीं मिलता है, क्योंकि इसका तो न आदि है, न अन्त है, न स्थिति ही है। अतः इस सुदृढ मूल वाले अश्वत्थ वृक्ष को सबल वैराग्यरूपी शस्त्र से काटने के बाद उस परमपद को खोजना चाहिए जहाँ जाकर प्राणी पुनः लौटकर नहीं आते। जिस आदि पुरुष से यह अनादिकाल से चली आ रही सृष्टि विस्तृत हुई है, उसी परम पुरुष की शरण में मैं हूँ।

**आंग्लम्** – Its form is not here perceived as such neither its end nor its origin, nor its existence. Having cut asunder this firm rooted *Aśvattha* with the strong axe of non-attachment. Then that goal should be sought for, going whither, they do not return again. I seek refuge in that primeval *puruṣa* whence streamed forth the eternal activity.

## निदर्शनम्

### (i) व्याकरणम्

#### (क) सन्धिः

अस्येह – अस्य + इह (गुणसन्धिः)

तथोपलभ्यते – तथा + उपलभ्यते (गुणसन्धिः)

नान्तो न – न + अन्तः + न
(न + अन्तः: दीर्घसन्धिः) (अन्तः + न: विसर्गसन्धिः)

www.thearyasamaj.org


| | | |
|---|---|---|
| चादिर्न | – | च + आदिः + न (दीर्घसन्धिः) (विसर्गसन्धिः) |
| चाद्यम् | – | च + आद्यम् (दीर्घसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| सुविरूढमूलम् | – | सुविरूढानि मूलानि यस्य सः सुविरूढमूलः (बहुव्रीहिः) तम् |
| असङ्गशस्त्रेण | – | असङ्गः एव शस्त्रम् असङ्गशस्त्रम् (कर्मधारयः) तेन |
| असङ्गः | – | न सङ्गः असङ्गः (नञ् तत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| सम्प्रतिष्ठा | – | सम् + प्र + स्था + अङ् + टाप् |
| सुविरूढ | – | सु + वि + रुह् + क्त |
| छित्त्वा | – | छिद् + क्त्वा |
| परिमार्गितव्यम् | – | परि + मार्ग् + तव्यत् |
| गताः | – | गम् + क्त |
| प्रवृत्तिः | – | प्र + वृत् + क्तिन् |
| प्रसृता | – | प्र + सृ + क्त |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| तथा | – | तद् + थाल् |
| ततः | – | तद् + तसिल् |
| आद्यम् | – | आदि + यत् |
| पुराणी | – | पुराण + (ङीप्) |
| यतः | – | यद् + तसिल् |

**(ङ) व्युत्पत्तिः**

| | | |
|---|---|---|
| आद्यः | – | आदौ भवः |
| पुराणम् | – | पुरा नवं च (निरुक्तम्) |

www.thearyasamaj.org


## अभ्यासः – 36
## श्लोकः - 42, 43

**1. श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Answer the questions on the basis of the verse.]

(क) अश्वत्थः कस्य प्रतीकम् उक्तम्? ------------------------------

(ख) केन आयुधेन अयम् अश्वत्थः छेत्तव्यः? ------------------------------

(ग) परमात्मनः का विस्तारं प्राप्तवती? ------------------------------

(घ) संसाररूपवृक्षस्य कीदृशं स्वरूपं श्लोके प्रतिपादितम्? ------------------------------
------------------------------

**2. यथानिर्देशं श्लोकाभ्यां पदानि चित्वा लिखत–**

[यथानिर्देश श्लोक से पद चुनकर लिखें। Pick up the words from the verse and write them as per the instruction.]

(क) अव्ययपदानि - (i) -------- (ii) ------- (iii) ------- (iv) --------
(v) -------- (vi) -------

(ख) तिङन्तपदानि - (i) -------- (ii) ------- (iii) -------

(ग) सर्वनामशब्दाः - (i) -------- (ii) ------- (iii) ------- (iv) --------
(v) ---------

(घ) समस्तपदानि - (i) --------- (ii) ---------

**3. प्रकृति–प्रत्ययविभागं कुरुत–**

[प्रकृति तथा प्रत्यय को अलग करें। Split the base and the suffix.]

**यथा–** (क) छित्त्वा = **छिद् + क्त्वा**

(ख) भित्त्वा = ------- + -------

(ग) पठित्वा = ------- + -------

(घ) चलित्वा = ------- + -------

(ङ) क्रीडित्वा = ------- + -------

(च) धावित्वा = ------- + -------

www.thearyasamaj.org


(छ) सेवित्वा = ------- + -------

(ज) लिखित्वा/ लेखित्वा = ------- + -------

4. **प्रकृति–प्रत्यय–विभागं कुरुत–**

[प्रकृति तथा प्रत्यय को अलग करें। Split the base and the suffix.]

| | | | | |
|---|---|---|---|---|
| **यथा–** (क) | परिमार्गितव्यम् | – | परि + मार्गितव्य | **परि–मार्ग् + णिच् + तव्यत्** |
| (ख) | क्रीडितव्यम् | – | क्रीडितव्य | **क्रीड् + तव्यत्** |
| (ग) | चलितव्यम् | – | चलितव्य | ---------------------- |
| (घ) | पठितव्यम् | – | पठितव्य | ---------------------- |
| (ङ) | धावितव्यम् | – | धावितव्य | ---------------------- |
| (च) | सेवितव्यम् | – | सेवितव्य | ---------------------- |
| (छ) | भ्रमितव्यम् | – | भ्रमितव्य | ---------------------- |
| (ज) | लेखितव्यम् | – | लेखितव्य | ---------------------- |

5. **सन्धिं कुरुत–**

[सन्धि करें। Join the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** (i) | अस्य | + | इह | = | **अस्येह** |
| (ii) | तस्य | + | इति | = | ------------ |
| (iii) | महा | + | इन्द्रः | = | ------------ |
| (iv) | सुर | + | ईशः | = | ------------ |
| (v) | गज | + | इन्द्रः | = | ------------ |
| (vi) | तथा | + | उपलभ्यते | = | **तथोपलभ्यते** |
| (vii) | महा | + | ऊर्मिः | = | ------------ |
| (viii) | तदा | + | ऊर्ध्वम् | = | ------------ |
| (ix) | सर्व | + | उपरि | = | ------------ |
| (x) | सूर्य | + | उदयः | = | ------------ |

www.thearyasamaj.org


6. **परमात्मनः विभिन्नैः नामभिः यथोचितं रिक्तस्थानं पूरयत–**

[परमात्मा के विभिन्न नामों से रिक्त स्थानों को भरें। Fill in the blanks with the varient names of *Parmātmā*.]

**यथा–** (i) अहं **कृष्णं** शरणं प्रपद्ये।

(ii) अहं ----------- शरणं प्रपद्ये।

(iii) अहं ----------- शरणं प्रपद्ये।

(iv) अहं ----------- शरणं प्रपद्ये।

7. **कोष्ठकस्थ–धातून् प्रयुज्य यथोदाहरणं रिक्तं स्थानं पूरयत–**

[कोष्ठक में प्रदत्त धातु के प्रयोग से उदाहरण के अनुसार रिक्त स्थान भरें। Fill in the blanks with the roots given in the bracket as shown in the example.]

| | |
|---|---|
| **यथा–** (क) जनैः अश्वत्थस्य रूपं न | **उपलभ्यते (उप+ लभ्)** |
| (ख) बालकैः पुस्तकं | --------- (पठ्) |
| (ग) भक्तैः कृष्णः | --------- (पूज्) |
| (घ) कृष्णेन ज्ञानं | --------- (दा) |
| (ङ) रामेण रावणः | --------- (हन्) |
| (च) त्वया मृगः | --------- (दृश्) |

8. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| **यथा–** (i) **दृढेन** | (क) पदम् |
| (ii) सुविरूढमूलम् | (ख) अश्वत्थः |
| (iii) पुराणी | (ग) **असङ्गशस्त्रेण** |
| (iv) पुरुषम् | (घ) अश्वत्थम् |
| (v) परिमार्गितव्यम् | (ङ) प्रवृत्तिः |
| (vi) अनादिः | (च) आद्यम् |

9. **अधोलिखितपदानां परिचयं लिखत–**

[अधोलिखित पदों का परिचय लिखें। Identify the following words.]

| | पदम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|
| **यथा–** (i) | अन्तः | **पुं.** | **प्रथमा** | **एक.** |
| (ii) | पुरुषम् | ------ | ------ | ------ |

www.thearyasamaj.org


(iii) प्रवृत्तिः ------ ------ ------

(iv) एनम् ------ ------ ------

(v) सम्प्रतिष्ठा ------ ------ ------

(vi) पुराणी ------ ------ ------

**10. अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों का प्रयोग करते हुए कुछ वाक्य बनायें। Construct some sentences using the words given below.]

(क) इह (ख) इदम् (ग) भिद् (क्त्वा) (घ) यतः (ङ) प्रसृत

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**निर्मानमोहा जितसङ्गदोषा अध्यात्मनित्या विनिवृत्तकामाः ।**
**द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञैर्गच्छन्त्यमूढाः पदमव्ययं तत् ॥44॥** (भ.गी. 15.5)

**पदच्छेदः**

निर्-मान-मोहाः जित-सङ्ग-दोषाः अध्यात्म-नित्याः वि-निवृत्त-कामाः।
द्वन्द्वैः विमुक्ताः सुख-दुःख-संज्ञैः गच्छन्ति अमूढाः पदम् अव्ययं तत्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| निर्मानमोहाः | अ. पुं. प्र. बहु. समस्तम् | सुखदुःखसंज्ञैः | अ. नपुं. तृ. बहु. समस्तम् |
| जितसङ्गदोषाः | अ. पुं. प्र. बहु. समस्तम् | गच्छन्ति | गम्- कर्तरि लट् प्रपु. बहु. |
| अध्यात्मनित्याः | अ. पुं. प्र. बहु. समस्तम् | अमूढाः | अ. पुं. प्र. बहु. समस्तम् |
| विनिवृत्तकामाः | अ. पुं. प्र. बहु. समस्तम् | पदम् | अ. नपुं. द्विती. एक. |
| द्वन्द्वैः | अ. नपुं. तृ. बहु. | अव्ययम् | अ. नपुं. द्विती. एक. |
| विमुक्ताः | अ. पुं. प्र. बहु. | तत् | तद्-द. सर्व. नपुं. द्विती. एक. |

**आकाङ्क्षा**

**गच्छन्ति।**

| | |
|---|---|
| कुत्र गच्छन्ति? | पदं गच्छन्ति। |
| कीदृशं पदं गच्छन्ति? | तत् अव्ययं पदं गच्छन्ति। |
| के तत् अव्ययं पदं गच्छन्ति? | अमूढाः तत् अव्ययं पदं गच्छन्ति। |
| कीदृशाः अमूढाः? | निर्मानमोहाः अमूढाः। |
| पुनश्च कीदृशाः अमूढाः? | जितसङ्गदोषाः अमूढाः। |
| पुनश्च कीदृशाः अमूढाः? | अध्यात्मनित्याः अमूढाः। |
| पुनश्च कीदृशाः अमूढाः? | विनिवृत्तकामाः अमूढाः। |
| पुनश्च कीदृशाः? | विमुक्ताः। |
| कैः विमुक्ताः अमूढा अव्ययं पदं गच्छन्ति? | द्वन्द्वैः विमुक्ताः अमूढाः अव्ययं पदं गच्छन्ति। |
| कीदृशैः द्वन्द्वैः विमुक्ताः अमूढाः? | सुखदुःखसंज्ञैः विमुक्ताः अमूढाः। |

www.thearyasamaj.org


**अन्वयः**

निर्मानमोहाः जितसङ्गदोषाः अध्यात्मनित्याः विनिवृत्तकामाः सुखदुःखसंज्ञैः द्वन्द्वैः विमुक्ताः अमूढाः तत् अव्ययं पदं गच्छन्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| निर्मानमोहाः | मोहाभिमानरहिताः | मान और मोह से रहित | Free from pride and delusion |
| जितसङ्गदोषाः | जितेन्द्रियाः | आसक्ति में दोषों को जीत लेने वाले | victorious over the evil of attachment |
| अध्यात्मनित्याः | परमात्मा-चिन्तनतत्पराः | सदा परमात्मा में निरत | dwelling constantly |
| विनिवृत्तकामाः | विशेषेण कामनिवृत्ताः | समस्त कामनाओं से पूर्णतः रहित | desires having completely turned away |
| द्वन्द्वैः विमुक्ताः | प्रियाप्रियरहिताः | द्वन्द्वों से छूटे हुए | from the pairs of opposites |
| सुखदुःखसंज्ञैः | सुखदुःखादिभ्यः | सुख-दुःख नामक (द्वन्द्वों से) | known as pleasure and pain |
| अमूढाः | मोहवर्जिताः | मोहरहित (लोग) | the undeluded |
| तत् | तत् | उस | that |
| अव्ययम् | विनाशधर्मरहितम् | अविनाशी | eternal |
| पदम् | स्थानम् | (परम) स्थान को | goal |
| गच्छन्ति | प्राप्नुवन्ति | प्राप्त करते हैं | reach |

**भावार्थः**

**संस्कृतम्** – ये जनाः अभिमानेन मोहेन च विहीनाः, आसक्तेः दोषाणां जेतारः, सर्वदा परमात्मनि रताः समस्तकामनाभिः रहिताः सूखदुःखनामकैः अनेकैः द्वन्द्वैः च रहिताः (साधकाः) सन्ति। ते एव तत् अविनाशिनं परमपदं प्राप्नुवन्ति।

**हिन्दी** – जो लोग अभिमान व मोह से रहित हैं, आसक्ति से जुड़े दोषों को जीत चुके हैं, सदा परमात्मा में निरत रहते हैं, सभी कामनाओं से छूट चुके हैं, सुख-दुख आदि द्वन्द्वों से (भी) छूट चुके हैं, ऐसे मोहरहित (साधक) उस अविनाशी परम पद को प्राप्त करते हैं।

**आंग्लम्** – Free from pride and delusion with the evil of attachment conquered ever dwelling in the self their desires being completely stilled,

www.thearyasamaj.org


Liberated from the pairs of opposits known as pleasure and pain, the undeluded reach that eternal goal.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| निर्मानमोहा जितसङ्गदोषाः | = | निर्मानमोहाः + जितसङ्गदोषाः(विसर्गसन्धिः) |
| जितसङ्गदोषा अध्यात्मनित्याः | = | जितसङ्गदोषाः + अध्यात्मनित्याः (विसर्गसन्धिः) |
| अध्यात्मदोषा विनिवृत्तकामाः | = | अध्यात्मदोषाः + विनिवृत्तकामाः (विसर्गसन्धिः) |
| द्वन्द्वैर्विमुक्ताः | = | द्वन्द्वैः + विमुक्ताः (विसर्गसन्धिः) |
| सुखदुःखसंज्ञैर्गच्छन्ति | = | सुखदुःखसंज्ञैः + गच्छन्ति (विसर्गसन्धिः) |
| गच्छन्त्यमूढाः | = | गच्छन्ति + अमूढाः (यण्सन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| निर्मानमोहाः | – | मानश्च मोहश्च मानमोहौ (द्वन्द्वः), निर्गतौ मानमोहौ येभ्यः ते निर्मानमोहाः (बहुव्रीहिः) |
| जितसङ्गदोषाः | – | सङ्ग एव दोषाः सङ्गदोषाः (कर्मधारयः) जितः सङ्गदोषाः यैः ते जितसङ्गदोषाः (बहुव्रीहिः) |
| अध्यात्मनित्याः | – | आत्मनि इति अध्यात्मम् (अव्ययीभावः) अध्यात्मं नित्यं येषां ते (बहुव्रीहिः) |
| विनिवृत्तकामाः | – | विनिवृत्तः कामः येषां ते, विनिवृत्तकामाः (बहुव्रीहिः) |
| सुखदुःखसंज्ञैः | – | सुखं च दुःखं च सुखदुःखे (द्वन्द्वः), सुखदुःखे संज्ञे येषां तानि सुखदुःखसंज्ञानि (बहुव्रीहिः) तैः |
| अमूढाः | – | न मूढः अमूढः (नञ्तत्पु.) ते अमूढाः |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| दोषाः | – | दुष् + घञ् |
| जितः | – | जि + क्त |
| विमुक्ताः | – | वि + मुच् + क्त |
| मूढाः | – | मूह् + क्त |

www.thearyasamaj.org


निर्मान - निर् + मन् + घञ्

**अवधेयम्**

**बहुव्रीहिसमासविषये**

## अभ्यासः - 37
## श्लोकः - 44

1. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

निर्मानमोहाः ------------ ----------- ---------- सुखदुःखसंज्ञैः
------ --------- ------ तत् --------- ------ ---------------।

2. **श्लोकनुसारम् उत्तरं लिखत–**

[श्लोक के अनुसार उत्तर लिखें। Answer the questions on the basis of the verse.]

(क) के अव्ययं पदं गच्छन्ति? --------------------------------
(ख) अमूढाः कान् दोषान् जयन्ति? --------------------------------
(ग) 'विनिवृत्तकामः' कस्य विशेषणम् अस्ति? --------------------------------
(घ) श्लोके कयोः द्वन्द्वं कथितम्? --------------------------------

3. **सत्यम् ☑ असत्यम् ☒ वा निर्दिशत–**

[सत्य ☑ या असत्य ☒ बताएँ। Mention the right ☑ or wrong ☒.]

(i) अमूढाः मानरहिताः भवन्ति। ☐
(ii) अमूढे मोहः भवति। ☐
(iii) मूढः अव्ययं पदं गच्छति। ☐
(iv) निर्मानमोहः विनिवृत्तकामः भवति। ☐
(v) सङ्गदोषान् जित्वा अव्ययपदं प्राप्तुं न शक्यते। ☐

4. **श्लोकात् अमूढस्य विशेषणैः रिक्तं स्थानं पूरयत–**

[श्लोक से अमूढ के विशेषणों से रिक्त स्थान भरें। Fill in the blanks with qualifiers of *Amūḍha* from the verse.]

**यथा–** (i) **निर्मानमोहाः** अमूढाः अव्ययं पदं गच्छन्ति।
(ii) -------------- अमूढाः अव्ययं पदं गच्छन्ति।

www.thearyasamaj.org


(iii) -------------- अमूढाः अव्ययं पदं गच्छन्ति।

(iv) -------------- अमूढाः अव्ययं पदं गच्छन्ति।

(v) -------------- अमूढाः अव्ययं पदं गच्छन्ति।

5. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analytical sentence.]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **यथा–** (i) | निर्मानमोहाः | = | **निर्गतौ** | **मानमोहौ** | **यस्मात्** | **सः** | **( बहुव्रीहिः )** |
| (ii) | निर्बलः | = | ----- | ----- | ----- | ----- | (--------) |
| (iii) | निर्धनः | = | ----- | ----- | ----- | ----- | (--------) |
| (iv) | निष्प्राणः | = | ----- | ----- | ----- | ----- | (--------) |
| (v) | निष्पापः | = | ----- | ----- | ----- | ----- | (--------) |

6. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the Analytical sentence.]

(i) जितसङ्गदोषः = ------------------------------------

(ii) अध्यात्मनित्यः = ------------------------------------

(iii) विनिवृत्तकामः = ------------------------------------

(iv) सुखदुःखसंज्ञः = ------------------------------------

(v) अमूढः = ------------------------------------

7. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** (i) | गच्छन्त्यमूढाः | = | **गच्छन्ति** | + | **अमूढाः** |
| (ii) | प्रविशन्त्यत्र | = | ---------- | + | ---------- |
| (iii) | गच्छत्यव्ययम् | = | ---------- | + | ---------- |
| (iv) | पश्यत्येनम् | = | ---------- | + | ---------- |
| (v) | अस्त्येकः | = | ---------- | + | ---------- |

www.thearyasamaj.org


## श्लोकः

**न तद्भासयते सूर्यो न शशाङ्को न पावकः ।**
**यद्गत्वा न निवर्तन्ते तद्धाम परमं मम ॥45॥** (भ.गी. 15.6)

## पदच्छेदः

न तद् भासयते सूर्यः न शशाङ्कः न पावकः।
यद् गत्वा न निवर्तन्ते तद् धाम परमं मम॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| न | अव्ययम् | पावकः | अ. पुं. प्र. एक. |
| तद् | तद्-द.(सर्व.) नपुं. द्विती. एक. | यद् | यद्-द.(सर्व.)नपुं.द्विती.एक. |
| भासयते | भास् - कर्तरि आत्मनेपदे लट् प्रपु. एक. | गत्वा | क्त्वान्तम् अव्ययम् |
| | | न | अव्ययम् |
| सूर्यः | अ. पुं. प्र. एक. | निवर्तन्ते | नि + वृत् कर्तरि आत्मने-पदे लट् प्रपु. बहु. |
| न | अव्ययम् | | |
| शशाङ्कः | अ. पुं. प्र. एक. | धाम | न. नपुं. प्र. एक. |
| न | अव्ययम् | मम | अस्मद्-द.(सर्व.)त्रि.षष्ठी एक. |

## आकाङ्क्षा

**न भासयते।**

| | |
|---|---|
| किं न भासयते? | तद् (परमपदं) न भासयते। |
| कः न भासयते? | सूर्यः न भासयते। |
| अन्यः कः न भासयते? | शशाङ्कः (अपि) न भासयते। |
| पुनः अन्यः कः न भासयते? | पावकः (अपि) न भासयते। |

**न निवर्तन्ते।**

| | |
|---|---|
| किं कृत्वा न निवर्तन्ते? | गत्वा न निवर्तन्ते। |
| कुत्र गत्वा न निवर्तन्ते? | यद् (परमपदं) गत्वा न निवर्तन्ते। |
| किं तद्? | तद् धाम। |
| कीदृशं तद् धाम? | तत् परमं धाम। |
| तत् कस्य परमं धाम (अस्ति)? | तत् मम परमं धाम (अस्ति)। |

www.thearyasamaj.org


**अन्वयः**

यत् धाम सूर्यः न भासयते, न शशाङ्कः (भासयते), न पावकः च (भासयते)। यद् गत्वा न निवर्तन्ते, तत् मम परमं धाम (अस्ति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत् धाम | यत्तेजोरूपम् | जिस परमपद | which supreme abode |
| सूर्यः | भास्करः | सूर्य | the sun |
| न भासयते | न प्रकाशयति | प्रकाशित नहीं करता है | not illumines |
| शशाङ्कः | चन्द्रः | चन्द्र | the moon |
| (न भासयते) | (न प्रकाशयति) | (प्रकाशित नहीं करता है) | (not illumines) |
| पावकः | अग्निः | अग्नि | the fire |
| (न भासयते) | (न प्रकाशयति) | (प्रकाशित नहीं करती है) | (not illumines) |
| यद् | पूर्वोक्तम् (परमपदम्) | परम पद को | to which |
| गत्वा | प्राप्य | पहुँचकर | having gone |
| न निवर्तन्ते | न प्रत्यागच्छन्ति | वापिस (लौटकर) नहीं आते हैं | not return |
| तत् | तद्धाम | वह | that is |
| मम | मदीयं | मेरा | mine |
| परमं धाम | परमस्थानम् | परम धाम | the supreme abode |

**भावार्थः**

**संस्कृतम्** – न सूर्यः, न चन्द्रः, न अग्निर्वा तत् (परमपदं) प्रकाशयितुम् अर्हति, यत् (परमपदं) प्राप्य (जीवाः) पुनः (भूलोकं) न प्रत्यगच्छन्ति, तदेव मम परमं स्थानम् अस्ति।

**हिन्दी** – न तो सूर्य, न चन्द्रमा और न ही अग्नि उस परमपद को प्रकाशित कर सकती है। जिस परम पद को पाकर जीव फिर भूलोक पर वापिस नहीं आते, वह मेरा परम स्थान है।

**आंग्लम्** – Neither the sun nor the moon nor fire illumines that. That is my supreme Abode, reaching which they do not return.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| सूर्यो न | = | सूर्यः + न (विसर्गसन्धिः) |
| शशाङ्को न | = | शशाङ्कः + न (विसर्गसन्धिः) |
| तद्भासयते | = | तत् + भासयते (जश्त्वसन्धिः) |
| यद्गत्वा | = | यत् + गत्वा (जश्त्वसन्धिः) |
| तद्धाम | = | तत् + धाम (जश्त्वसन्धिः) |

(ख) **कृदन्तः**

| | | |
|---|---|---|
| गत्वा | = | गम् + क्त्वा |
| पावकः | = | पू + ण्वुल् |

---

## अभ्यासः - 38

### श्लोकः - 45

1. **विवरणानुसारं श्लोकात् पदानि चित्वा रिक्तस्थाने लिखत–**

[विवरण के अनुसार श्लोक से पद चुनकर रिक्त स्थान में लिखें। Fill in the blanks with the words from the verse as per the analysis.]

**यथा–** (क) अ. पुं. प्र. एक. **सूर्यः**

(ख) क्त्वान्तम् अव्ययम् ---------

(ग) निषेधार्थकम् अव्ययम् ---------

(घ) न. नपुं. प्र. एक. ---------

(ङ) द. पुं. षष्ठी. एक. ---------

(च) द. नपुं. प्र. एक. ---------

2. **श्लोकस्य पदच्छेदं पूरयत–**

[श्लोक का पदच्छेद पूरा करें। Complete the splitting of the word of the verse.]

न तद् ----------- -------- न --------- ---- पावकः।

यद् -------- ------ ------------ तद् ------- परमं मम॥

www.thearyasamaj.org


3. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | | |
|---|---|---|
| **यथा–** | (i) **निवर्तन्ते** | (क) वृध् |
| | (ii) सेवन्ते | (ख) कम्प् |
| | (iii) मोदन्ते | (ग) सेव् |
| | (iv) कम्पन्ते | (घ) याच् |
| | (v) विजयन्ते | (ङ) **नि + वृत्** |
| | (vi) वर्धन्ते | (च) मुद् |
| | (vii) याचन्ते | (छ) वि + जि |

4. **सन्धिं विच्छिद्य लिखत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (क) तद्धाम | = | **तत्** | + | **धाम** |
| | (ख) यद्गत्वा | = | ----- | + | ----- |
| | (ग) महद्धनम् | = | ----- | + | ----- |
| | (घ) तदेव | = | ----- | + | ----- |
| | (ङ) सदाचारः | = | ----- | + | ----- |
| | (च) कृदन्तः | = | ----- | + | ----- |

5. **समाधत्त–**

[समाधान दें। Answer the questions.]

(i) सूर्यः किं न भासयते? ------------------------------------

(ii) परमं धाम गत्वा किं न भवति? ------------------------------------

(iii) श्लोके कस्य परमं धाम उक्तम्? ------------------------------------

6. **अत्र प्रदत्तानां शब्दानां पञ्च-पञ्च पर्यायशब्दान् लिखत–**

[दिए गए शब्दों के पाँच-पाँच पर्याय शब्द लिखें। Write the five alternative words of the given words.]

(क) सूर्यः ------------------------------------------------

(ख) शशाङ्कः ------------------------------------------------

(ग) पावकः ------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**अहं वैश्वानरो भूत्वा प्राणिनां देहमाश्रितः ।**
**प्राणापानसमायुक्तः पचाम्यन्नं चतुर्विधम् ॥46॥** (भ.गी. 15.14)

## पदच्छेदः

अहम् वैश्वानरः भूत्वा प्राणिनाम् देहम् आश्रितः।
प्राण–अपान–समायुक्तः पचामि अन्नम् चतुर्–विधम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अहम् | अस्मद्–द. त्रि. प्र. एक. | आश्रितः | अ. पुं. प्र. एक. |
| वैश्वानरः | अ. पुं. प्र. एक. | प्राणापानसमायुक्तः | अ. पुं. प्र. एक. समस्तम् |
| भूत्वा | क्त्वान्तम् अव्ययम् | पचामि | पच्–कर्तरि लट् उपु. एक. |
| प्राणिनाम् | न. पुं. षष्ठी बहु. | अन्नम् | अ. नपुं. द्विती. एक. |
| देहम् | अ. पुं. द्विती. एक. | चतुर्विधम् | अ. नपुं. द्विती. एक. समस्तम् |

## आकाङ्क्षा

**पचामि।**

| | |
|---|---|
| कः पचामि? | अहं (परमात्मा) पचामि। |
| कीदृशः अहम्? | आश्रितः अहम्। |
| कुत्र आश्रितः? | देहम् आश्रितः। |
| केषां देहम् आश्रितः? | प्राणिनां देहम् आश्रितः। |
| अहं कः भूत्वा पचामि? | वैश्वानरः भूत्वा। |
| कीदृशः वैश्वानरः भूत्वा? | प्राणापानसमायुक्तः वैश्वानरः भूत्वा। |
| अहं वैश्वानरः भूत्वा किं पचामि? | अहं वैश्वानरः भूत्वा अन्नं पचामि। |
| कतिविधम् अन्नम् पचामि? | चतुर्विधम् अन्नं पचामि। |

## अन्वयः

अहं प्राणिनां देहम् आश्रितः प्राणापानसमायुक्तः वैश्वानरः भूत्वा चतुर्विधम् अन्नं पचामि।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अहम् | परमात्मा | मैं (परमात्मा) | I |
| प्राणिनां | देहिनां (जीवानां) | प्राणियों के | of living beings |
| देहम् | शरीरम् | शरीर में | the body |
| आश्रितः | स्थितः | रहता हुआ | abiding |
| प्राणापानसमायुक्तः | प्राण-अपान वायुभ्यां युक्तः | प्राण व अपान से युक्त | associated with *Prāṇa* and *Apāna* |
| वैश्वानरः | जठराग्निः | अग्नि (जठराग्नि) | the fire |
| भूत्वा | सम्भूय | बनकर | having become |
| चतुर्विधम् | चतुर्भेदात्मकम् | चार प्रकार के | four fold |
| अन्नम् | आहारम् | अन्न को | food |
| पचामि | पाचनं करोमि | पचाता हूँ | digest |

**भावार्थः**

**संस्कृतम्** – अहं (परमात्मा) जीवानां शरीरेषु निवसामि। तेषां शरीरेषु प्राणापानवायुभ्यां युक्तः जठराग्निरूपः भवामि। तेन अग्निना अहं (भोज्य-पेय-चोष्य-लेह्यनामकं) चतुर्विधम् अन्नं पचामि।

**हिन्दी** – मैं (परमात्मा) जीवों के शरीर में रहता हूँ। उनके शरीर में प्राण व अपान वायु से युक्त जठराग्नि रूप में रहता हूँ। उस अग्नि से मैं (भोज्य-पेय-चोष्य-लेह्य नामक) चार प्रकार के अन्न को पचाता हूँ।

**आंग्लम्** – Abiding in the body of living beings as *Vaiśvānara* associated with *Prāṇa* and *Apāna*, I digest the four kinds of food.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

वैश्वानरो भूत्वा = वैश्वानरः + भूत्वा (विसर्गसन्धिः)

पचाम्यन्नम् = पचामि + अन्नम् (यण्सन्धिः)

(ख) **समासः**

प्राणापानसमायुक्तः = प्राणश्च अपानश्च प्राणापानौ (द्वन्द्वसमासः) प्राणापानाभ्यां समायुक्तः प्राणापानासमायुक्तः (तृतीयातत्पुरुषः)

www.thearyasamaj.org


(ग) **कृदन्तः**

| | | |
|---|---|---|
| भूत्वा | = | भू + क्त्वा |
| आश्रितः | = | आ + श्रि + क्त - आश्रित |
| समायुक्तः | = | सम् + आ + युज् + क्त - समायुक्त |
| अन्नम् | = | अद् + क्त |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| वैश्वानरः | = | विश्वानर + अण् |
| | | [विश्व + नरः, पूर्वपदस्य दीर्घः] |

## अभ्यासः - 39

## श्लोकः - 46

1. **श्लोकं पठित्वा उत्तर लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Answer the questions on the basis of the verse.]

(i) अहं कः? ------------------------------------

(ii) वैश्वानरः कुत्र आश्रितः? ------------------------------------

(iii) वैश्वानरः कतिविधम् अन्नं पचति? ------------------------------------

(iv) प्राणापानसमायुक्तः कः भवति? ------------------------------------

2. **यथोचितं योजयत–**

[यथोचित मेल करें। Match appropriately.]

| | |
|---|---|
| (i) वैश्वानरः | (क) भगवान् |
| (ii) अहम् | (ख) शरीरम् |
| (iii) प्राणिनाम् | (ग) अग्निः |
| (iv) देहम् | (घ) वायुविशेषः |
| (v) अन्नम् | (ङ) भूतानाम् |
| (vi) अपानः | (च) आहारम् |

3. **प्रकृति-प्रत्यय-विभागं कुरुत–**

[प्रकृति-प्रत्यय का विभाग करें। Split the base and the suffix.]

(i) आश्रितः = **आश्रित** → **आ + श्रि + क्त**

(ii) समायुक्तः = ---------- → ----- -------------------

www.thearyasamaj.org


(iii) प्रसृतः = ---------- → ----------------------------------

(iv) प्रवृत्तः = ---------- → ----------------------------------

(v) सन्तृप्तः = ---------- → ----------------------------------

4. **समासं कुरुत–**

[समास करें। Make the compound.]

| | | | | |
|---|---|---|---|---|
| **यथा–** (क) प्राणापनौ | = | **प्राणाश्च** | **अपानश्च** | **(द्वन्द्वः)** |
| (ख) सुखदु:खे | = | ---------- | ---------- | (---------) |
| (ग) विद्याविद्ये | = | ---------- | ---------- | (---------) |
| (घ) लाभालाभौ | = | ---------- | ---------- | (---------) |
| (ङ) रामलक्ष्मणौ | = | ---------- | ---------- | (---------) |

5. **यथोचितं मेलनं कुरुत–**

[यथोचित मेल करें। Match with the appropriate one.]

| | |
|---|---|
| (i) अहम् | (क) अ. नपुं. द्वि. एक. |
| (ii) भूत्वा | (ख) न. पुं. षष्ठी बहु. |
| (iii) आश्रितः | (ग) द. पुं. प्र. एक. |
| (iv) चतुर्विधम् | (घ) अव्ययम् |
| (v) प्राणिनाम् | (ङ) अ. पुं. प्र. एक. |

6. **'क' स्तम्भं 'ख' स्तम्भेन योजयत–**

['क' स्तम्भ को 'ख' स्तम्भ से मिलाएँ। Match '*ka*' column with '*kha*' Column.]

| **'क'** | **'ख'** |
|---|---|
| (i) वैश्वानरः | (क) समस्तपदम् |
| (ii) चतुर्विधम् | (ख) सर्वनाम |
| (iii) प्राणापानसमायुक्तः | (ग) अन्नस्य विशेषणम् |
| (iv) पचाम्यन्नम् | (घ) अग्नेः नाम |
| (v) अहम् | (ङ) यण्सन्धिः |

www.thearyasamaj.org


7. **अधोनिर्दिष्टानां पदानां प्रकृति-प्रत्ययं लिखत–**

[नीचे दिये गये पदों के प्रकृति और प्रत्यय लिखें। Write the base and the Suffix of given wards.]

**यथा–** 1. भूत्वा – **भू + क्त्वा**

2. कृत्वा – ---------------

3. श्रुत्वा – ---------------

4. आदाय – **आ + दा + ल्यप्**

5. सम्भूय – ---------------

6. प्रविश्य – ---------------

7. विलोक्य – ---------------

www.thearyasamaj.org


**श्लोक:**

**सर्वस्य चाहं हृदि सन्निविष्टो मत्तः स्मृतिर्ज्ञानमपोहनं च ।**
**वेदैश्च सर्वैरहमेव वेद्यो वेदान्तकृद्वेदविदेव चाहम् ॥47॥** (भ.गी.15.15)

**पदच्छेद:**

सर्वस्य च अहम् हृदि सन्निविष्टः मत्तः स्मृतिः ज्ञानम् अपोहनम् च।
वेदैः च सर्वैः अहम् एव वेद्यः वेदान्तकृत् वेद–वित् एव च अहम्।।

**पदपरिचय:**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सर्वस्य | अ. (सर्व.) पुं. षष्ठी एक. | च | अव्ययम् |
| च | अव्ययम् | सर्वैः | अ. पुं. तृ. बहु. |
| अहम् | अस्मद्–द.(सर्व.)पुं. प्र. एक. | अहम् | अस्मद्–द. (सर्व.) पुं.प्र.एक. |
| हृदि | हृदय (हृद्) अ. नपुं. सप्त एक. | एव | अव्ययम् |
| सन्निविष्टः | अ. पुं. प्र. एक. | वेद्यः | अ. पुं. प्र. एक. |
| मत्तः | तद्धितान्तम् अव्ययम् | वेदान्तकृत् | त. पुं. प्र. एक. समस्तम् |
| स्मृतिः | इ. स्त्री. प्र. एक. | वेदवित् | वेदविद्–द्. पुं. प्र. एक. |
| ज्ञानम् | अ. नपुं. प्र. एक. | | समस्तम् |
| अपोहनम् | अ. नपुं. प्र. एक. | एव | अव्ययम् |
| च | अव्ययम् | च | अव्ययम् |
| वेदैः | अ. पुं. तृ. बहु. | अहम् | अस्मद्–द. (सर्व.) पुं.प्र.एक. |

**आकाङ्क्षा**

**(अस्मि)।**

अहं किम्भूतः अस्मि? — अहं सन्निविष्टः अस्मि।

अहं कस्मिन् सन्निविष्टः अस्मि? — अहं हृदि सन्निविष्टः अस्मि।

अहं कस्य हृदि सन्निविष्टः अस्मि? — अहं सर्वस्य हृदि सन्निविष्टः अस्मि।

**(अस्ति)**

किम् अस्ति? — स्मृतिः अस्ति।

पुनश्च किम् अस्ति? — ज्ञानम् अस्ति।

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च किम् अस्ति? | अपोहनं च अस्ति। |
| कस्मात् स्मृतिः, ज्ञानम् अपोहनं च अस्ति? | मत्तः स्मृतिः, ज्ञानम् अपोहनं च अस्ति। |
| **वेद्यः।** | |
| कः वेद्यः? | अहं वेद्यः। |
| कैः अहम् एव वेद्यः? | सर्वैः वेदैः च अहमेव वेद्यः। |
| **( अस्मि )।** | |
| अहं कः अस्मि? | अहं वेदान्तकृत् अस्मि। |
| पुनश्च अहं कः अस्मि? | अहं वेदवित् एव अस्मि। |

## अन्वयः

अहं च सर्वस्य हृदि सन्निविष्टः, मत्तः स्मृतिः, ज्ञानम् अपोहनं च (अस्ति)। सर्वैः वेदैः अहम् एव वेद्यः, अहं वेदान्तकृत् वेदवित् च (अस्मि)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अहम् | परमात्मा | मैं (परमात्मा) | I |
| सर्वस्य | सर्वेषां प्राणिनां | सभी प्राणियों के | of all |
| हृदि | हृदये | हृदय में | in the heart |
| सन्निविष्टः | स्थितः | स्थित हूँ | seated |
| मत्तः | परमात्मनः | मुझ(परमात्मा)से | from me |
| स्मृतिः | स्मरणशक्तिः | स्मृति | memory |
| ज्ञानम् | लौकिक-अलौकिकं च ज्ञानम् | लौकिक और अलौकिक ज्ञान | knowledge |
| अपोहनम् | शङ्कानिवारणम् | सन्देह निवारण | absence |
| सर्वैः वेदैः | सकलाभिः श्रुतिभिः | सभी वेदों के द्वारा | by all *Vedas* |
| अहमेव वेद्यः | परमात्मा एव ज्ञातव्यः | परमात्मा ही जानने योग्य है | only I to be known |
| अहम् | परमात्मा | मैं (परमात्मा) | I |
| वेदान्तकृत् | वेदानां तत्त्वस्य निर्णायकः | वेदों के तत्त्व का निर्णय करने वाला | the author of the *Vedānta* |
| वेदवित् | वेदानां ज्ञाता | वेदों का ज्ञाता | the Knower of *Veda* |

www.thearyasamaj.org


## भावार्थः

**संस्कृतम्** – अहं समस्तजीवानां हृदये स्थितः, अहमेव स्मृतेः, ज्ञानस्य शङ्कानिवारणस्य च शक्तिं धारयामि। सर्वे वेदाः मामेव ज्ञातुं प्रयतन्ते। अहमेव वेदानां तत्त्वं निर्णयामि, वेदानां ज्ञाता अपि अहमेव अस्मि।

**हिन्दी** – मैं सभी जीवों के हृदय में स्थित हूँ; स्मृति, ज्ञान तथा शङ्कानिवारण की शक्ति मुझसे ही है। सभी वेदों का ज्ञेय मैं ही हूँ। मैं ही वेदों के तत्त्व का निर्णायक तथा वेदों का ज्ञाता भी हूँ।

**आंग्लम्** – I am seated in the hearts of all, from me are memory, Knowledge and their loss, I am verily that which has to be known by all the *Vedas*. I am indeed the author of the *Vedānta* as well as the knower of the *Vedas*.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

| | | |
|---|---|---|
| चाहम् | – | च + अहम् (दीर्घसन्धिः) |
| सन्निविष्टो मत्तः | – | सन्निविष्टः + मत्तः (विसर्गसन्धिः) |
| स्मृतिर्ज्ञानम् | – | स्मृतिः + ज्ञानम् (विसर्गसन्धिः) |
| वेदैश्च | – | वेदैः + च (विसर्गसन्धिः) |
| सर्वैरहम् | – | सर्वैः + अहम् (विसर्गसन्धिः) |
| वेद्यो वेदान्तकृत् | – | वेद्यः + वेदान्तकृत् (विसर्गसन्धिः) |
| वेदान्तकृद्वेदविदेव | – | वेदान्तकृत् + वेदवित् + एव (जश्त्वसन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| वेदान्तकृत् | – | वेदान्तं करोति इति वेदान्तकृत् (उपपदतत्पुरुषः) |
| वेदवित् | – | वेदं वेत्ति इति वेदवित् (उपपदतत्पुरुषः) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| सन्निविष्टः | – | सम् + नि + विश् + क्त |
| अपोहनम् | – | अप + ऊह + ल्युट् |
| वेद्यः | – | विद् + ण्यत् |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| मत्तः | – | अस्मद् + तसिल् |

www.thearyasamaj.org


अवधेयम्

विसर्गसन्धेः विषये

## अभ्यासः - 40

### श्लोकः - 47

1. **सम्बद्धं योजयत–**

[सम्बद्ध शब्दों को मिलाएँ। Match the related words.]

| | |
|---|---|
| (i) सन्निविष्टः | (क) वेदैः |
| (ii) मत्तः | (ख) हृदि |
| (iii) वेदवित् | (ग) शङ्कायाः |
| (iv) वेद्यः | (घ) स्मृतिः |
| (v) अपोहनम् | (ङ) अहम् |

2. **शब्दार्थौ मेलयत–**

[शब्द को अर्थ से मिलाएँ। Join the word with its meaning.]

| | |
|---|---|
| (i) वेद्यः | (क) वेदज्ञः |
| (ii) हृदि | (ख) परमात्मा |
| (iii) सन्निविष्टः | (ग) ज्ञातव्यः |
| (iv) वेदवित् | (घ) स्थितः |
| (v) अहम् | (ङ) चित्ते |

3. **प्रश्नोत्तरं यथोचितं योजयत–**

[प्रश्न को उचित उत्तर के साथ जोड़ें। Join the question with its corrcet answer.]

| | |
|---|---|
| (i) परमात्मा कस्य हृदि सन्निविष्टः? | (क) संशयम् |
| (ii) वेदवित् कस्य विशेषणम्? | (ख) परमात्मानम् |
| (iii) सर्वे वेदाः कं विदन्ति? | (ग) परमात्मनः |
| (iv) अपोहनशक्तिः किं नाशयति? | (घ) वेदान्तकृत् |
| (v) वेदानां तत्त्वस्य निर्णायकः कथम् अभिधीयते? | (ङ) सर्वस्य |

www.thearyasamaj.org


4. **अन्वयं योजयत–**

[अन्वय पूरा करें। Complete the construction.]

अहं च ------ ---- सन्निविष्टः, ---- ------- ------- अपोहनं च (अस्ति)। ----- ----- ----- एव ----- ----- --------- वेदवित् ---- ------।

5. **मञ्जूषायां प्रदत्तैः शब्दैः श्लोकस्य भावार्थं प्रकाशयत–**

[मञ्जूषा में प्रदत्त शब्दों से श्लोक के भावार्थ को स्पष्ट करें। Give the meaning of the verse with the words given in the box.]

| | | | |
|---|---|---|---|
| अहम् | सर्वैः<br>सर्वस्य<br>मत्तः | अपोहनं<br>हृदि<br>वेदैः<br>वेदवित् | सन्निविष्टः<br>वेद्यः<br>अस्मि<br>अस्ति |

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

6. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (i) वेद्यः | (क) पठ् + ण्यत् |
| (ii) लेख्यः | (ख) वन्द् + ण्यत् |
| (iii) पाठ्यः | (ग) कृ + ण्यत् |
| (iv) वन्द्यः | (घ) मन् + ण्यत् |
| (v) कार्यः | (ङ) विद् + ण्यत् |
| (vi) मान्यः | (क) लिख् + ण्यत् |

www.thearyasamaj.org


## श्लोकः

**द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।**
**क्षरः सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥48॥** (भ.गी. 15.16)

## पदच्छेदः

द्वौ इमौ पुरुषौ लोके क्षरः च अक्षरः एव च।
क्षरः सर्वाणि भूतानि कूटस्थः अक्षरः उच्यते॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| द्वौ | द्वि–संख्या. पुं. प्र. द्वि. | च | अव्ययम् |
| इमौ | इदम्–म.(सर्व.)पुं. प्र. द्वि. | क्षरः | अ. पुं. प्र. एक. |
| पुरुषौ | अ. पुं. प्र. द्वि. | सर्वाणि | अ. (सर्व.) नपुं. प्र. बहु. |
| लोके | अ. पुं. सप्त एक. | भूतानि | अ. नपुं. प्र. बहु. |
| क्षरः | अ. पुं. प्र. एक. | कूटस्थः | अ. पुं. प्र. एक. समस्तम् |
| च | अव्ययम् | अक्षरः | अ. पुं. प्र. एक. समस्तम् |
| अक्षरः | अ. पुं. प्र. एक. समस्तम् | उच्यते | ब्रू–कर्मणि लट् प्रपु. एक. |
| एव | अव्ययम् | | |

## आकाङ्क्षा

**(स्तः)।**

| | |
|---|---|
| कौ स्तः? | पुरुषौ स्तः। |
| पुरुषसंख्या का? | द्वौ पुरुषौ स्तः। |
| द्वौ पुरुषौ कुत्र स्तः? | द्वौ पुरुषौ लोके स्तः। |
| प्रथमप्रकारकः पुरुषः कः? | क्षरः। |
| द्वितीयः पुरुषः कः? | अक्षरः। |

**उच्यते।**

| | |
|---|---|
| कः उच्यते? | क्षरः उच्यते। |
| कानि क्षरः उच्यते? | भूतानि क्षरः उच्यते। |
| कति भूतानि? | सर्वाणि भूतानि। |

www.thearyasamaj.org



| | |
|---|---|
| अपरः पुरुषः कः? | अपरः पुरुषः अक्षरः। |
| कः अक्षरः उच्यते? | कूटस्थः अक्षरः उच्यते। |

**अन्वयः**

लोके क्षरः च अक्षरः च एव, इमौ द्वौ पुरुषौ (स्तः)। सर्वाणि भूतानि क्षरः, कूटस्थः अक्षरः उच्यते।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| लोके | संसारे | संसार में | In the world |
| क्षरः | नश्वरः | नाशवान् | the perishable |
| अक्षरः | अविनाशी | अविनाशी | the imperishable |
| एव च | अपि च | तथा | even |
| इमौ | एतौ | ये (दो) | these |
| द्वौ पुरुषौ | द्विसंख्याकौ प्राणिनौ | दो प्रकार के पुरुष | two *Puruṣas* |
| (स्तः) | (वर्तेते) | हैं | are |
| सर्वाणि भूतानि | समस्तजीवानां शरीराणि | सभी जीवों के शरीर | in all beings |
| क्षरः | नश्वरः | नाशवान् | the perishable |
| कूटस्थः | अन्तःस्थितः जीवात्मा | अन्तःकरण में स्थित जीवात्मा | the immutable |
| अक्षरः | अविनाशी | अविनाशी | the imperishable |
| उच्यते | कथ्यते | कहा जाता है | is said |

**भावार्थः**

**संस्कृतम्** – अस्मिन् संसारे नाशवान्, अविनाशी च एतौ द्विविधौ पुरुषौ स्तः। सर्वेषां प्राणिनां शरीराणि नश्वराणि (पुरुषः) भवन्ति। अन्तःस्थितः जीवात्मा च अविनाशी पुरुषः कथ्यते।

**हिन्दी** – इस संसार में नाशवान तथा अविनाशी ये दो प्रकार के पुरुष हैं। सभी प्राणियों के शरीर क्षर अर्थात् नाशवान पुरुष तथा उनमें विद्यमान जीवात्मा अक्षर अर्थात् अविनाशी पुरुष कहा जाता है।

**आंग्लम्** – There are two *Puruṣas* in the world the perishable and Imperishable. All beings are the perishable and the *Kūtastha* is called imperishable.

www.thearyasamaj.org


## निदर्शनम्

(i) व्याकरणम्

**(क) सन्धिः**

द्वाविमौ – द्वौ + इमौ (अयादिसन्धिः)

क्षरश्चाक्षर एव – क्षरः + च + अक्षरः + एव

(क्षरः + च – विसर्ग सन्धिः) (च + अक्षरः – दीर्घ सन्धिः) (अक्षरः + एव – विसर्गसन्धिः)

कूटस्थोऽक्षर उच्यते – कूटस्थः + अक्षरः + उच्यते (विसर्गसन्धिः)

**(ख) समासः**

अक्षरः – न क्षरः अक्षरः (नञ्तत्पुरुषः)

कूटस्थः – कूटे तिष्ठति इति कूटस्थः (उपपदतत्पुरुषः)

**(ग) कृदन्तः**

लोके – लोक् + घञ् – लोक

क्षरः – क्षर् + अच्

**(घ) कर्मणि प्रयोगः**

कूटस्थः अक्षरः उच्यते।

| अवधेयम् |
|---|
| विशेष्य-विशेषणसन्दर्भे |

## अभ्यासः - 41

### श्लोकः - 48

1. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Answer the questions on the basis of the verse.]

(क) लोके कियन्तः पुरुषाः सन्ति? ----------------------------------

(ख) तत्र एकस्य पुरुषस्य का संज्ञा? ----------------------------------

www.thearyasamaj.org


(ग) अपरस्य पुरुषस्य संज्ञा का? ----------------------------

(घ) सर्वाणि भूतानि कस्मिन् पुरुषे अन्तर्भवन्ति? ----------------------------

(ङ) अक्षरः कः उच्यते? ----------------------------

2. **मञ्जूषातः शब्दान् स्वीकृत्य रिक्तं स्थानं पूरयत–**

[मञ्जूषा से शब्द लेकर रिक्त स्थान भरें। Fill in the blanks with the words given in the box.]

| प्राणिनः, क्षरः, लोके, आत्मा, पुरुषौ, उच्यते, अपरः |
|---|

अस्मिन् ------ द्वौ ------ स्तः। प्रथमः ----- ------ अक्षरः उच्यते। सर्वे ---- क्षरः, प्राणिषु स्थितः ----- च अक्षरः ------।

3. **यथोदाहरणं कोष्ठकस्थ पदस्य उचितरूपेण वाक्यं लिखत–**

[उदाहरण के अनुसार कोष्ठकस्थ पद के द्वारा उचित रूप से वाक्य लिखें। Fill in the blanks with words given in the braket.]

(i) कूटस्थः **अक्षरः** **उच्यते**। (अक्षर)

(ii) बृहस्पतिः ------------ ------------। (देवगुरु)

(iii) शुक्राचार्यः ------------ ------------। (दैत्यगुरु)

(iv) प्राणी ------------ ------------। (क्षर)

(v) आत्मा ------------ ------------। (अक्षर)

4. **यथोचितं योजयत–**

[यथोचित जोड़े। Match appropriately.]

| | |
|---|---|
| (i) इमौ | (क) क्षर् + अच् |
| (ii) क्षरः | (ख) क्रियापदम् |
| (iii) सर्वाणि | (ग) नञ् तत्पुरुषः |
| (iv) अक्षरः | (घ) संख्यावाचकः |
| (v) उच्यते | (ङ) सर्व – अ. सर्व. नपुं. प्र. बहु. |
| (vi) द्वौ | (च) इदम् – म. सर्व. पुं. प्र. द्वि. |

www.thearyasamaj.org


5. **सन्धिविच्छेदं कुरुत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

**यथा–** (क) द्वाविमौ = **द्वौ** + **इमौ**

(ख) रामाविति = ----------- + -----------

(ग) वागर्थाविव = ----------- + -----------

(घ) पुत्रावपि = ----------- + -----------

(ङ) आदावागत्य = ----------- + -----------

6. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पद चुनकर लिखें। Write the words from the verse as directed.]

(क) प्रथमान्तम् असमस्तम् - (i) ----------- (ii) ----------- (iii) -----------
(iv) ----------- (v) ----------- (vi) -----------

(ख) प्रथमान्तं समस्तम् - (i) ----------- (ii) -----------

(ग) अव्ययपदम् - (i) ----------- (ii) -----------

(घ) क्रियापदम् - (i) -----------

www.thearyasamaj.org


**श्लोकः**

**उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।**
**यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥49॥** (भ.गी. 15.17)

**पदच्छेदः**

उत्तमः पुरुषः तु अन्यः परम-आत्मा इति उत्-आ-हृतः।
यः लोक-त्रयम् आविश्य बिभर्ति अव्ययः ईश्वरः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| उत्तमः | अ. पुं. प्र. एक. विशेषणम् | उदाहृतः | अ. पुं. प्र. एक. |
| पुरुषः | अ. पुं. प्र. एक. | यः | यद्–द. (सर्व.) पुं. प्र. एक. |
| तु | अव्ययम् | लोकत्रयम् | अ. नपुं. द्विती. एक. समस्तम् |
| अन्यः | अन्य–अ. (सर्व.) पुं.प्र.एक. | आविश्य | ल्यबन्तम् अव्ययम् |
| परमात्मा | परमात्मन्–न. पुं. प्र. एक. समस्तम् | बिभर्ति | भृ–कर्तरि लट् प्रपु. एक. |
| | | अव्ययः | अ. पुं. प्र. एक. विशेषणम् |
| इति | अव्ययम् | ईश्वरः | अ. पुं. प्र. एक. |

**आकाङ्क्षा**

**उदाहृतः।**

किमिति उदाहृतः? — परमात्मा इति उदाहृतः।

कः परमात्मा इति उदाहृतः? — पुरुषः परमात्मा इति उदाहृतः।

कीदृशः पुरुषः — उत्तमः पुरुषः।

यः परमात्मा इति उदाहृतः स उत्तमः पुरुषः कः? — स उत्तमः पुरुषः अन्यः (एव)।

**(सः) बिभर्ति।**

(सः) कः बिभर्ति? — यः [परमात्मा इति उदाहृत सः] ईश्वरः बिभर्ति।

(सः) कीदृशः ईश्वरः? — अव्ययः ईश्वरः।

किं कृत्वा बिभर्ति? — आविश्य बिभर्ति।

किम् आविश्य बिभर्ति? — लोकत्रयम् आविश्य बिभर्ति।

www.thearyasamaj.org


**अन्वयः**

उत्तमः पुरुषः तु अन्यः यः परमात्मा इति उदाहृतः। (स एव) अव्ययः ईश्वरः लोकत्रयम् आविश्य बिभर्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| उत्तमः | श्रेष्ठः | श्रेष्ठ | The supreme |
| पुरुषः तु | नरस्तु | पुरुष तो | *Puruṣa* |
| अन्यः | अपरः एव | दूसरा | another |
| यः परमात्मा | यः भगवान् | जो ईश्वर | the highest self |
| इति उदाहृतः | इति कथितः | कहा गया है | thus called |
| (स एव) | स परमात्मा एव | वही परमात्मा | that's highest self |
| अव्ययः | अविनाशी | अविनाशी | indestructible |
| ईश्वरः | स्वामी | स्वामी | Lord |
| लोकत्रयम् | त्रिभुवनम् | तीनों लोकों में | the three worlds |
| आविश्य | प्रविश्य | प्रविष्ट होकर | pervading |
| बिभर्ति | पोषयति | पोषण करता है | sustains |

**भावार्थः**

**संस्कृतम्** – श्रेष्ठः नरः तु अपरः एव भवति, यः ईश्वरः उच्यते स एव अविनाशी ईश्वरः त्रीन् अपि लोकान् प्रविश्य तान् पोषयति।

**हिन्दी** – श्रेष्ठ पुरुष तो और ही है जिसे परमात्मा कहा जाता है। वही अविनाशी परमात्मा तीनों लोकों में प्रविष्ट होकर उनका भरण-पोषण करता है।

**आंग्लम्** – The supreme *puruṣa* is called the highest self the indestructible Lord who prevades and sustains the three worlds.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

पुरुषस्त्वन्यः — पुरुषः + तु + अन्यः

(पुरुषः + तु → विसर्गसन्धिः) (तु + अन्यः → यण्सन्धिः)

www.thearyasamaj.org


| | | |
|---|---|---|
| परमात्मेत्युदाहृतः | – | परमात्मा + इति + उदाहृतः (गुणसन्धिः) (यण्सन्धिः) |
| यो लोकत्रयम् | – | यः + लोकत्रयम् (विसर्गसन्धिः) |
| बिभर्त्यव्यय ईश्वरः | – | बिभर्ति + अव्ययः + ईश्वरः (यण्सन्धिः) (विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| परमात्मा | – | परमश्चासौ आत्मा परमात्मा (कर्मधारयः) |
| लोकत्रयम् | – | लोकानां त्रयम् (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| उदाहृतः | – | उत् + आ + हृ + क्त |
| आविश्य | – | आ + विश् + ल्यप् |
| लोकः | – | लोक् + घञ् |

**अवधेयम्**

**'भृञ्' धातोः लट्रूपाणि**

| | | | |
|---|---|---|---|
| बिभर्ति | बिभृतः | बिभ्रति | प्रपु. |
| बिभर्षि | बिभृथः | बिभृथ | मपु. |
| बिभर्मि | बिभृवः | बिभृमः | उपु. |

## अभ्यासः - 42

### श्लोकः - 49

1. **श्लोकस्थानां प्रथमाविभक्त्यन्तपदानाम् एकत्र सङ्ग्रहं कुरुत, तेषां मूलशब्दं (प्रातिपदिकं) च निर्दिशत–**

[श्लोक के प्रथमा विभक्त्यन्त पदों को एकत्र करें और उनके मूल शब्द (प्रातिपदिक) का निर्देश करें। Write together the words ending in nominative case-ending in the verse and point out their nominal stem.]

**यथा–** **(i)** **उत्तमः** **उत्तम** (ii) ---------- ----------

(iii) ---------- ---------- (iv) ---------- ----------

www.thearyasamaj.org


---------- ---------- ---------- ----------

---------- ---------- ---------- ----------

2. **अधोलिखितपदानां परिचयं लिखत–**

[अधोलिखित पदों का परिचय लिखें। Recognise the following words.]

**यथा–** (क) तु = **अव्ययम्**

(ख) उदाहृतः = --------------------------

(ग) आविश्य = --------------------------

(घ) बिभर्ति = --------------------------

(ङ) लोकत्रयम् = --------------------------

(च) परमात्मा = --------------------------

3. **श्लोकानुसारम् उत्तरं लिखत–**

[श्लोक के आधार पर उत्तर लिखें। Write the answer on the basis of the verse.]

(क) कः परमात्मा इति उदाहृतः? --------------------------

(ख) परमात्मा कीदृशः पुरुषः? --------------------------

(ग) परमात्मा किम् आविशति? --------------------------

(घ) अव्ययः कस्य विशेषणम्? --------------------------

(ङ) ईश्वरः सर्वान् किं करोति? --------------------------

4. **प्रयोगान् बहुवचने परिवर्तयत–**

[प्रयोगों को बहुवचन में बदलें। Change the singular into plural.]

**यथा–** (क) अन्यः = **अन्ये**

(ख) यः = --------------------

(ग) सः = --------------------

(घ) सर्वस्य = **सर्वेषाम्**

(ङ) अन्यस्य = --------------------

(च) यस्य = --------------------

(छ) तस्य = --------------------

(ज) उत्तमः = --------------------

(झ) पुरुषः = --------------------

(ञ) परमात्मा = --------------------

www.thearyasamaj.org



5. **ल्यबन्तरूपं लिखत–**

[ल्यबन्त रूप लिखें। Write the words ending in *Lyap* suffix.]

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| **यथा–** | (क) | आ | + विश् | + | ल्यप् | = | **आविश्य** |
| | (ख) | आ | + दिश् | + | ल्यप् | = | ---------- |
| | (ग) | उप | + दिश् | + | ल्यप् | = | ---------- |
| | (घ) | प्र | + विश् | + | ल्यप् | = | ---------- |
| | (ङ) | आ | + गम् | + | ल्यप् | = | **आगत्य** |
| | (च) | वि | + जि | + | ल्यप् | = | ---------- |
| | (छ) | सम् | + स्तु | + | ल्यप् | = | ---------- |
| | (ज) | आ | + नी | + | ल्यप् | = | **आनीय** |
| | (झ) | आ | + दा | + | ल्यप् | = | ---------- |
| | (ञ) | प्र | + दा | + | ल्यप् | = | ---------- |
| | (ट) | निर् | + मा | + | ल्यप् | = | ---------- |
| | (ठ) | सम् | + भू | + | ल्यप् | = | ---------- |
| | (ड) | प्र | + नम् | + | ल्यप् | = | ---------- |
| | (ढ) | सम् | + यम् | + | ल्यप् | = | ---------- |
| | (न) | आ | + लिख् | + | ल्यप् | = | ---------- |

6. **सन्धिविच्छेदं कुरुत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | (i) | इत्युदाहृतः | = | **इति** | + | **उदाहृतः** |
| | (ii) | देव्युवाच | = | **देवी** | + | --------- |
| | (iii) | यद्येवम् | = | ---------- | + | --------- |
| | (iv) | बिभर्त्यव्ययः | = | ---------- | + | --------- |
| | (v) | त्वन्यः | = | ---------- | + | --------- |
| | (vi) | वध्वादेशः | = | ---------- | + | --------- |

www.thearyasamaj.org

# षोडशोऽध्यायः

## श्लोकः

श्री भगवानुवाच
अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।
दानं दमश्च यज्ञश्च स्वाध्यायस्तप आर्जवम् ॥50॥

अहिंसा सत्यमक्रोधस्त्यागः शान्तिरपैशुनम् ।
दया भूतेष्वलोलुप्त्वं मार्दवं ह्रीरचापलम् ॥51॥

तेजः क्षमा धृतिः शौचमद्रोहो नातिमानिता ।
भवन्ति सम्पदं दैवीमभिजातस्य भारत ॥52॥ (भ.गी. 16.1, 2, 3)

## पदच्छेदः

श्री-भगवान् उवाच

अभयम् सत्त्व-संशुद्धिः ज्ञान-योग-व्यवस्थितिः।
दानम् दमः च यज्ञः च स्व-अध्यायः तपः आर्जवम्॥

अहिंसा सत्यम् अक्रोधः त्यागः शान्तिः अपैशुनम्।
दया भूतेषु अलोलुप्त्वम् मार्दवम् ह्रीः अचापलम्॥

तेजः क्षमा धृतिः शौचम् अद्रोहः नाति-मानिता।
भवन्ति सम्पदम् दैवीम् अभिजातस्य भारत॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| श्री-भगवान् | त. पुं. प्र. एक. | अपैशुनम् | अ. नपुं. प्र. एक. |
| उवाच | ब्रू-धातुः परस्मैपदे लिट् प्रपु. एक. (क्रिया) | दया | आ. स्त्री. प्र. एक. |
| | | भूतेषु | अ. नपुं. सप्त. बहु. |
| अभयम् | अ. नपुं. प्र. एक. | अलोलुप्त्वम् | अ. नपुं. प्र. एक. समस्तम् |
| सत्त्वसंशुद्धिः | इ. स्त्री. प्र. एक. समस्तम् | मार्दवम् | अ. नपुं. प्र. एक. |
| ज्ञानयोग-व्यवस्थितिः | इ. स्त्री. प्र. एक. समस्तम् | ह्रीः | ई. स्त्री. प्र. एक. |
| | | अचापलम् | अ. नपुं. प्र. एक. |
| दानम् | अ. नपुं. प्र. एक. | तेजः | स. नपुं. प्र. एक. |
| दमः | अ. पुं. प्र. एक. | क्षमा | आ. स्त्री. प्र. एक. |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| च | अव्ययम् | धृतिः | इ. स्त्री. प्र. एक. |
| यज्ञः | अ. पुं. प्र. एक. | शौचम् | अ. नपुं. प्र. एक. |
| च | अव्ययम् | अद्रोहः | अ. पुं. प्र. एक. समस्तम् |
| स्वाध्यायः | अ. पुं. प्र. एक. | नातिमानिता | आ. स्त्री. प्र. एक. |
| तपः | स. नपुं. प्र. एक. | भवन्ति | भू धातुः परस्मैपदे लट् प्रपु. बहु. (क्रिया) |
| आर्जवम् | अ. नपुं. प्र. एक. | सम्पदम् | द. स्त्री. द्विती. एक. |
| अहिंसा | आ. स्त्री. प्र. एक. | दैवीम् | ई. स्त्री. द्विती. एक. (विशेषणम्) |
| सत्यम् | अ. नपुं. प्र. एक. | अभिजातस्य | अ. पुं. ष. एक. |
| अक्रोधः | अ. पुं. प्र. एक. समस्तम् | भारत | अ. पुं. सम्बो. एक. |
| त्यागः | अ. पुं. प्र. एक. | | |
| शान्तिः | इ. स्त्री. प्र. एक. | | |

## आकाङ्क्षा

**उवाच।**

| | |
|---|---|
| कः उवाच | श्रीभगवान् उवाच। |
| (कम् उवाच) | अर्जुनम् उवाच। |

**(लक्षणानि) भवन्ति।**

| | |
|---|---|
| कस्य भवन्ति? | अभिजातस्य भवन्ति। |
| काम् अभिजातस्य भवन्ति? | सम्पदम् अभिजातस्य भवन्ति। |
| कीदृशीं सम्पदम् अभिजातस्य भवन्ति? | दैवीं सम्पदम् अभिजातस्य भवन्ति। |
| हे भारत! दैवीं सम्पदम् अभिजातस्य किं किं लक्षणम्? | अभयम्। |
| पुनः किं लक्षणम्? | सत्त्वसंशुद्धिः। |
| पुनश्च किम्? | ज्ञानयोगव्यवस्थितिः। |
| पुनश्च किम्? | दानम्। |
| पुनश्च किम्? | दमः। |
| पुनश्च किम्? | यज्ञः। |
| पुनश्च किम्? | स्वाध्यायः। |

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च किम्? | तपः आर्जवं च। |
| पुनश्च किम्? | अहिंसा, सत्यम्, अक्रोधः। |
| पुनश्च किम्? | त्यागः, शान्तिः अपैशुनम्। |
| पुनश्च किम? | दया। |
| दया केषु? | भूतेषु दया। |
| पुनश्च किं किम्? | अलोलुप्त्वं, मार्दवं, ह्रीः। |
| पुनश्च किं किम्? | अचापलम्, तेजः, क्षमा। |
| पुनश्च किं किम्? | धृतिः, शौचम्, अद्रोहः। |
| पुनश्च किं किम्? | न अतिमानिता। |

**अन्वयः**

भारत! अभयं, सत्त्वसंशुद्धिः, ज्ञानयोगव्यवस्थितिः, दानं दमः च यज्ञः च स्वाध्यायः, तपः, आर्जवम्, अहिंसा, सत्यम्, अक्रोधः, त्यागः, शान्तिः, अपैशुनम्, भूतेषु दया, अलोलुप्त्वं, मार्दवं, ह्रीः, अचापलं, तेजः, क्षमा, धृतिः, शौचम्, अद्रोहः, नातिमानिता (एतानि) दैवीं सम्पदम् अभिजातस्य (लक्षणानि) भवन्ति।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| भारत! | अर्जुन! | अर्जुन! | Arjuna! |
| अभयम् | निर्भयम् | भय का अभाव | fearlessness |
| सत्त्वसंशुद्धिः | शुद्धान्तःकरणम् | निर्मल हृदय | purity of the heart |
| ज्ञानयोगव्यव-स्थितिः | ज्ञानयोगयोः दृढा अवस्थितिः | ज्ञान के लिये योग में दृढता की स्थिति | Stead fastness in knowledge and *Yoga* |
| दानम् | समर्पणम् | दान | charity |
| दमः च | बहिरिन्द्रियनिग्रहः | इन्द्रियों का नियन्त्रण | control of the senses |
| यज्ञः च | यागः च | यज्ञ | sacrifice |
| स्वाध्यायः | वेदाध्ययनम् | वेद का अध्ययन | study of *Vedas* and *śastras.* |
| तपः | तपस्या | तपस्या | austerity |
| आर्जवम् | सरलता | सरलता | straightforwardness |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| अहिंसा | प्राणिनां पीडावर्जनं | हिंसा न करना | non-violence |
| सत्यम् | सत्यभाषणं सत्यनिष्ठा च | सत्यनिष्ठा | truth |
| अक्रोध: | क्रोधाभाव: | क्रोध न करना | absence of anger |
| त्याग: | उत्सर्ग: | त्याग | renunciation |
| शान्ति: | शम: | शान्ति | peacefulness |
| अपैशुनम् | पिशुनताया: अभाव: (पररन्ध्रप्रकटीकरणं पैशुनम्) | चुगली न करना | absence of crooked-ness |
| भूतेषु दया | दु:खितेषु प्राणिषु करुणा | प्राणियों में दया | compassion to beings |
| अलोलुप्त्वम् | (सांसारिकविषयेषु) लोभस्य अभाव: | (सांसारिक विषयों में) लालच न करना | uncovetousness |
| मार्दवम् | अक्रौर्यम् | अन्त:करण की कोमलता | gentleness |
| ह्री: | लज्जा (अकार्ये) | अकरणीय कार्य में लज्जा | modesty |
| अचापलम् | असति प्रयोजने वाक्पाणि पादादीनामव्यापारयितृत्वम् | चपलता का अभाव | absence of fickleness |
| तेज: | प्रभाव: | प्रभाव | vigour |
| क्षमा | सहिष्णुता | सहनशीलता | forgiveness |
| धृति: | धैर्यम् | धीरता | fortitude |
| शौचम् | पावनता | पवित्रता | purity |
| अद्रोह: | परजिघांसाभाव: | दुर्भावना, शत्रुभाव का अभाव | absence of hatred |
| नातिमानिता | आत्मन: पूज्यातिशय-भावना-भाव: | मान की भावना को न चाहना | not toomuch of pride |
| दैवीं सम्पदम् | दिव्यां सम्पत्तिं | दिव्य सम्पदा को | divine state |
| अभिजातस्य | प्राप्तस्य मनुष्यस्य | प्राप्त हुए मनुष्य के | of the born |
| भवन्ति | सम्भवन्ति (लक्षणानि) | (लक्षण) होते हैं | belong |

www.thearyasamaj.org



### भावार्थः

**संस्कृतम्** – भगवान् कृष्णः अवदत्-हे अर्जुन! दिव्यसम्पदां प्राप्तस्य मनुष्यस्य लक्षणेषु निर्भयता, अन्तःकरणस्य शुद्धता, ज्ञानयोगयोः दृढस्थितिः, सात्त्विकः उत्सर्गः, इन्द्रियाणां नियमनं, यज्ञः, स्वाध्यायः, कर्तव्यसम्पादनाय कष्टसहनात्मकं तपः, मनसः वाचश्च सरलता, अहिंसा, सत्यवादिता, क्रोधाभावः, त्यागः, शान्तिः, पिशुनतायाः अभावः, प्राणिषु दया, लोभाभावः, अन्तःकरणस्य कोमलता, अकार्ये लज्जा, चञ्चलतायाः अभावः, तेजस्विता, क्षमा, धैर्यं, पावनता, वैरस्य अभावः, मानं प्रतिलिप्सायाः अभावः – एतानि प्रमुखानि लक्षणानि सन्ति।

**हिन्दी** – भगवान् कृष्ण बोले-हे अर्जुन! दिव्य सम्पदा को प्राप्त हुए मनुष्य के लक्षण हैं-उसमें निडरता, अन्तःकरण की शुद्धता, ज्ञान की प्राप्ति के लिये समता रूपी योग में दृढ़ स्थिति, सात्त्विक दान, इन्द्रिय नियमन, यज्ञ, स्वाध्याय, कर्तव्यपूर्ति के लिए कष्ट सहने वाला तप, मन व वाणी की सरलता, अहिंसा, सत्यवादिता, क्रोध न करना, इच्छाओं का त्याग, शान्ति, चुगलखोरी न करना, प्राणियों पर करुणा, विषयों में लिप्सा न रखना, कोमलता, अकार्य में लज्जा, चञ्चलता का अभाव, तेजस्विता, क्षमा, धैर्य, पावनता, वैरभावना का अभाव व अतिमान के प्रति अनासक्ति रखना।

**आंग्लम्** – Fearlessness, purity of heart, steadfastness in knowledge and *yoga* almsgiving control of the senses, *yajña*, study of scriptures, austerity and straightforwardness. Non injury, truth, absence of anger, renunciation serenity absence of calumny, compassion to beings, uncovetousness, gentleness, modesty, absence of fickleness. Vigour, forgiveness, fortitude, purity, absence of hatred, absence of pride, these belong to one born for a divine state, O *Bhārata*.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

सत्त्वसंशुद्धिर्ज्ञान-योगव्यवस्थितिः = सत्त्वसंशुद्धिः + ज्ञानयोगव्यवस्थितिः (विसर्गसन्धिः)

दमश्च = दमः + च (विसर्गसन्धिः)

यज्ञश्च = यज्ञः + च (विसर्गसन्धिः)

स्वाध्यायस्तप आर्जवम् = स्वाध्यायः + तपः + आर्जवम् (विसर्गसन्धिः)

अक्रोधस्त्यागः = अक्रोधः + त्यागः (विसर्गसन्धिः)

www.thearyasamaj.org


| | | |
|---|---|---|
| शान्तिरपैशुनम् | = | शान्तिः + अपैशुनम् (विसर्गसन्धिः) |
| भूतेष्वलोलुप्त्वम् | = | भूतेषु + अलोलुप्त्वम् (यण्सन्धिः) |
| ह्रीरचापलम् | = | ह्रीः + अचापलम् (विसर्गसन्धिः) |
| नातिमानिता | = | न + अतिमानिता (दीर्घसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| अभयम् | = | न भयम् (नञ् तत्पुरुषः) |
| सत्त्वसंशुद्धिः | = | सत्त्वस्य संशुद्धिः (षष्ठीतत्पुरुषः) |
| ज्ञानयोगव्यव-स्थितिः | = | ज्ञानं च योगश्चःज्ञानयोगौ, (द्वन्द्वः) ज्ञानयोगयोः व्यवस्थितिः (षष्ठीतत्पुरुषः) |
| अक्रोधः | = | न क्रोधः (नञ् तत्पुरुषः) |
| अपैशुनम् | = | न पैशुनम् (नञ् तत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| अभिजातस्य | = | अभि + जन् + क्त अभिजातः तस्य अभिजातस्य |
| अतिमानिता | = | अति + मन् - अतिमानिन् + तल् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| आर्जवम् | = | ऋजोः भावः (अण् प्रत्ययः) |
| पैशुनम् | = | पिशुनस्य भावः (अण् प्रत्ययः) |
| लोलुप्त्वम् | = | लोलुपस्य भावः (त्व-प्रत्ययः) [तस्य भावस्त्वतलौ] |
| चापलम् | = | चपलस्य भावः (अण् प्रत्ययः) |
| मार्दवम् | = | मृदोः भावः (अण् प्रत्ययः) |
| शौचम् | = | शुचेः भावः (अण् प्रत्ययः) |
| दैवीम् | = | देवस्य भावः कर्म वा दैवम् (अण् प्रत्ययः) दैव + ङीप् - देवी |
| अतिमानिता | = | अतिमानिनः भावः (तल् प्रत्ययः) |
| सत्यम् | = | सत् + यत् (सत्सु भवम्) |

www.thearyasamaj.org



(ङ) **सुबन्तः**

ह्रीः = स्त्रीलिङ्गे ह्री शब्दात् प्रथमा एकवचने विसर्गस्य लोपो न भवति। एकाक्षरशब्दत्वात्

**अवधेयम्**

**भावार्थकप्रत्ययाः- अण्, त्व, तल्**

## अभ्यासः - 43

### श्लोकः - 50, 51, 52

1. **श्लोकानाम् उचितपदैः रिक्तस्थानानि पूरयत–**

[श्लोकों के उचित पदों से रिक्त स्थानों की पूर्ति कीजिए। Fill in the blanks with appropriate words of the verses.]

अभयं ----------------------------------------।
दानं ---------- यज्ञश्च -------------आर्जवम्।।
अहिंसा ----------------------- शान्तिरपैशुनम्।
दया ---------------- ---------- ह्रीरचापलम्।।
तेजः ---------- धृतिः ----------- नातिमानिता।
भवन्ति ------------ दैवीमभिजातस्य ---------।।

2. **रिक्तस्थाने यथोचितं समस्तपदं विग्रहवाक्यं वा पूरयत, समासनिर्देशनं च कुरुत–**

[उचित समस्त-पद या विग्रह-वाक्य से रिक्त स्थान की पूर्ति करें तथा समास निर्देश करें। Fill in the blanks with either compound word or analytical sentence and write the compound name.]

| | समस्तपदम् | विग्रहवाक्यम् | समासः |
|---|---|---|---|
| **यथा–** | (i) **अक्रोधः** | **न क्रोधः** | **नञ् तत्पुरुषः** |
| | (ii) अहिंसा | ------------------ | ------------- |
| | (iii) ------------- | न धर्मः | ------------- |
| | (iv) अपैशुनम् | ------------------ | ------------- |
| | (v) ------------- | न कालः | ------------- |
| | (vi) अज्ञातः | ------------------ | ------------- |
| | (vii) अभयम् | ------------------ | ------------- |

www.thearyasamaj.org


| | | |
|---|---|---|
| (viii) ---------- | न द्रोहः | ------------ |
| (ix) असुरः | ---------------- | ------------ |
| (x) ------------ | न लोलुप्त्वम् | ------------ |

3. **अधोलिखितानि पदानि उचितेन अर्थेन योजयत–**

[निम्नलिखित पदों को उचित अर्थ से जोड़िए। Match appropriatly to the following words.]

| | |
|---|---|
| (i) अभयम् | (क) सरलता |
| (ii) सत्त्वसंशुद्धिः | (ख) पठनम् |
| (iii) दमः | (ग) पिशुनतायाः अभावः |
| (iv) यज्ञः | (घ) भयहीनम् |
| (v) स्वाध्यायः | (ङ) लोभहीनता |
| (vi) आर्जवम् | (च) अन्तःकरणस्य पवित्रता |
| (vii) अपैशुनम् | (छ) दमनम् |
| (viii) अलोलुप्त्वम् | (ज) यागः |
| (ix) मार्दत्वम् | (झ) अतिमानेच्छा |
| (x) ह्रीः | (ञ) कोमलत्वम् |
| (xi) अचापलम् | (ट) पवित्रता |
| (xii) धृतिः | (ठ) प्राणिषु |
| (xiii) शौचम् | (ड) लज्जा |
| (xiv) भूतेषु | (ढ) अचाञ्चल्यम् |
| (xv) अतिमानिता | (ण) धैर्यम् |

4. **यथोदाहरणं सन्धिं सन्धिविच्छेदं वा कुरुत–**

[उदाहरण के अनुसार सन्धि या सन्धिविच्छेद कीजिए। Join or disjoin the *Sandhi* as shown in the example.]

**(क)**

| | | | | | |
|---|---|---|---|---|---|
| यथा– (i) | **यज्ञश्च** | = | **यज्ञः** | + | **च** |
| (ii) | स्वाध्यायस्तपः | = | ---------- | + | ---------- |
| (iii) | दमश्च | = | ---------- | + | ---------- |
| (iv) | कश्चौरः | = | ---------- | + | ---------- |

www.thearyasamaj.org


| | | | | | |
|---|---|---|---|---|---|
| (v) | तपश्चर्या | = | **तपः** | + | **चर्या** |
| (vi) | शिरस्तापः | = | ---------- | + | ---------- |
| (vii) | ---------- | = | भूमिः | + | च |
| (viii) | ---------- | = | मनः | + | चिन्ता |
| (ix) | विदुषस्तर्कः | = | ---------- | + | ---------- |
| (x) | ---------- | = | सुधीः | + | तत्र |

**(ख)**

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (i) | **शान्तिरपैशुनम्** | = | **शान्तिः** | + | **अपैशुनम्** |
| | (ii) | मतिरस्ति | = | ---------- | + | ---------- |
| | (iii) | ---------- | = | वृत्तिः | + | अस्पष्टा |
| | (iv) | ---------- | = | ग्लानिः | + | अभवत् |
| | (v) | भ्रान्तिरहो | = | ---------- | + | ---------- |

**(ग)**

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (i) | **भूतेष्वलोलुप्त्वम्** | = | **भूतेषु** | + | **अलोलुप्त्वम्** |
| | (ii) | गुणिष्वनुरागः | = | ---------- | + | अनुरागः |
| | (iii) | ---------- | = | जनेषु | + | अवश्यम् |
| | (iv) | क्रियास्वभिज्ञः | = | ---------- | + | अभिज्ञः |
| | (v) | ---------- | = | गृहेषु | + | अत्र |
| | (vi) | तास्वनुपमा | = | तासु | + | ---------- |

5. **दैवीं सम्पदम् अभिजातस्य कानिचन दश लक्षणानि लिखत–**

[दैवी सम्पद को प्राप्त मनुष्य के कोई दस लक्षण लिखें। Write any ten characteristics related to the person with '*Daivī Sampad*'.]

| | | | |
|---|---|---|---|
| यथा– (i) | **दमः** | (vi) | ---------- |
| (ii) | ---------- | (vii) | ---------- |
| (iii) | ---------- | (viii) | ---------- |
| (iv) | ---------- | (ix) | ---------- |
| (v) | ---------- | (x) | ---------- |

www.thearyasamaj.org


6. **पदानि उचितेन विश्लेषणेन योजयत–**

[पदों को उचित विवरण से जोड़े। Match the words with appropriate analysis.]

| | |
|---|---|
| (i) उवाच | (क) इ. स्त्री. प्र. एक. |
| (ii) सत्त्वसंशुद्धिः | (ख) अ. पुं. षष्ठी एक. |
| (iii) दानम् | (ग) ब्रू–लिट् प्रपु. एक. |
| (iv) भूतेषु | (घ) अव्ययम् |
| (v) तपः | (ङ) अ. नपुं. प्र. एक. |
| (vi) भारत | (च) अ. पुं. प्र. एक. |
| (vii) अक्रोधः | (छ) अ. नपुं. प्र. एक. समस्तम् |
| (viii) अलोलुप्त्वम् | (ज) अ. पुं. सम्बो. एक. |
| (ix) न | (झ) स. नपुं. प्र. एक. |
| (x) अभिजातस्य | (ञ) अ. नपुं. सप्त. बहु. |

7. **अधोलिखितेषु शब्देषु तद्धितान्तं कृदन्तं वा सूचयत–**

[अधोलिखित शब्दों में तद्धितान्त या कृदन्त सूचित करें। Recognise *Taddhitānta* or *Kṛdanta* of the following words.]

यथा– (क) चापलम् = **तद्धितान्तः**

(ख) त्यागः = ---------------

(ग) शौचम् = ---------------

(घ) शान्तिः = ---------------

(ङ) अक्रोधः = ---------------

(च) आर्जवम् = ---------------

(छ) अलोलुप्त्वम् = ---------------

(ज) अभिजातस्य = ---------------

(झ) दानम् = ---------------

(ञ) मार्दवम् = ---------------

www.thearyasamaj.org



## श्लोकः

**दम्भो दर्पोऽभिमानश्च क्रोधः पारुष्यमेव च ।**
**अज्ञानं चाभिजातस्य पार्थ सम्पदमासुरीम् ॥53॥** (भ.गी. 16.4)

## पदच्छेदः

दम्भः दर्पः अभि-मानः च क्रोधः पारुष्यम् एव च।
अज्ञानम् च अभिजातस्य पार्थ सम्पदम् आसुरीम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| दम्भः | अ. पुं. प्र. एक. | अज्ञानम् | अ. नपुं. प्र. एक. |
| दर्पः | अ. पुं. प्र. एक. | च | अव्ययम् |
| अभिमानः | अ. पुं. प्र. एक. | अभिजातस्य | अ. पुं. षष्ठी एक. |
| च | अव्ययम् (समुच्चये) | पार्थ | अ. पुं. सम्बो. एक. |
| क्रोधः | अ. पुं. प्र. एक. | सम्पदम् | द. स्त्री. द्विती. एक. |
| पारुष्यम् | अ. नपुं. प्र. एक. | आसुरीम् | ई. स्त्री. द्विती. एक. |
| एव | अव्ययम् (समुच्चये) | | (विशेषणम्) |
| च | अव्ययम् | | |

## आकाङ्क्षा

**(लक्षणानि भवन्ति।)**

| | |
|---|---|
| एतानि कस्य (लक्षणानि भवन्ति)? | अभिजातस्य। |
| हे पार्थ! एतानि काम् अभिजातस्य लक्षणानि? | सम्पदम् अभिजातस्य। |
| कीदृशीं सम्पदम् अभिजातस्य? | आसुरीं सम्पदम् अभिजातस्य। |
| आसुरीं सम्पदम् अभिजातस्य किं लक्षणम्? | दम्भः। |
| अपरं लक्षणं किम्? | दर्पः। |
| अन्यत् किम्? | अभिमानः। |
| पुनः अपरं किम्? | क्रोधः। |
| पुनश्च किम्? | पारुष्यम्। |
| पुनश्च किम्? | अज्ञानम्। |

www.thearyasamaj.org


## अन्वयः

पार्थ! आसुरीं सम्पदम् अभिजातस्य दम्भः, दर्पः अभिमानः च क्रोधः, पारुष्यम् एव च अज्ञानं (एतानि लक्षणानि भवन्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| पार्थ! | अर्जुन! | अर्जुन! | *O Arjuna!* |
| आसुरीं | राक्षसीं | राक्षसी | demoniacal |
| सम्पदम् | सम्पत्तिम् | सम्पदा को | state |
| अभिजातस्य | प्राप्तस्य मनुष्यस्य | प्राप्त हुए मनुष्य के | of the born |
| दम्भः | आत्मश्लाघा | आत्मप्रशंसा | hyprocrisy |
| दर्पः | अहङ्कारः [बाह्यवस्तुभ्यः स्वस्मिन् दृश्यमानः] | घमण्ड | arrogance |
| अभिमानः च | गर्वः [विद्याबुद्ध्यादि आन्तरिकभावैः स्वस्मिन् दृश्यमानः] | गर्व | self-conciet |
| क्रोधः | कोपः | गुस्सा | wrath |
| पारुष्यम् एव च | कठोरता | कठोरता | harshness |
| अज्ञानम् | अविवेकः | विवेकहीनता | ignorance |
| भवन्ति | सम्भवन्ति | होते हैं | born |

## भावार्थः

**संस्कृतम्** – हे अर्जुन! राक्षसीं सम्पत्तिं प्राप्तस्य मनुष्यस्य लक्षणेषु आत्मश्लाघा, अहङ्कारः, गर्वः, कोपः, कठोरता, विवेकहीनतादीनि प्रमुखानि लक्षणानि भवन्ति।

**हिन्दी** – हे अर्जुन! जो व्यक्ति राक्षसी सम्पत्ति को प्राप्त करता है, उसमें आत्मप्रशंसा, अहङ्कार, घमण्ड, क्रोध, कठोरता और विवेकहीनता आदि लक्षण आ जाते हैं।

**अंग्रेजी** – Ostentation arrogance and self conceit, anger and also harshness and ignorance belong to one who is born O *pārtha!* for a demoniac state.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

दम्भो दर्पोऽभिमानश्च = दम्भः + दर्पः + अभिमानः + च

(विसर्गसन्धिः)

चाभिजातस्य = च + अभिजातस्य (दीर्घसन्धिः)

(ख) **तद्धितान्तः**

पारुष्यम् = परुषस्य भावः (ष्यञ् प्रत्ययः)

आसुरीम् = असुरस्य भावः आसुरम् (अण् प्रत्ययः)
आसुरशब्दात् स्त्रीत्वविवक्षायां ङीप् प्रत्ययः

पार्थ! = पृथायाः अपत्यम् (अण् प्रत्ययः)

**अवधेयम्**

**स्त्री-प्रत्ययः - ङीप्**

---

## अभ्यासः - 44

## श्लोकः - 53

1. **यथोचितं योजयत**

[उचित मेल बनाएँ। Match with the appropriate one.]

| | |
|---|---|
| (क) दम्भः | (i) कठोरता |
| (ख) पारुष्यम् | (ii) प्राप्तस्य |
| (ग) अभिजातस्य | (iii) सम्पत्तिम् |
| (घ) पार्थ | (iv) आत्मश्लाघा |
| (ङ) सम्पदम् | (v) अर्जुन |

2. **उत्तरं लिखत–**

[उत्तर लिखें। Answer the questions.]

(क) श्लोके आसुरी सम्पत् कतिसंख्याका कथिता? ------------------------------

(ख) पार्थ कः सम्बोधयति? ------------------------------

www.thearyasamaj.org


(ग) श्लोके कति कृदन्तशब्दाः सन्ति? ----------------------------

(घ) 'दर्पोऽभिमानः' इत्यत्र कः सन्धिः? ----------------------------

3. **एषां पदानां प्रत्येकं चतुरः समानार्थक-शब्दान् लिखत–**

[इन शब्दों में से प्रत्येक का चार-चार समानार्थक शब्द लिखें। Write four Synonyms of each word given below.]

(क) पारुष्यम् = ----------- ----------- ----------- -----------

(ख) पार्थ = ----------- ----------- ----------- -----------

(ग) अभिमानः = ----------- ----------- ----------- -----------

(घ) सम्पद् = ----------- ----------- ----------- -----------

4. **उदाहरणानुसारम् उचितं रूपं लिखत–**

[उदाहरण के आधार पर उचित रूप लिखें। Write appropriate word as per example.]

**यथा–** (क) असुर = **आसुरी**

(ख) इन्द्र = --------

(ग) विष्णु = --------

(घ) शम्भु = --------

(ङ) पुत्र = --------

5. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान भरें। Fill in the blanks as shown in the example.]

**यथा–** (क) परुष + ष्यञ् = **पारुष्यम्**

(ख) बहुल + ष्यञ् = --------------------

(ग) तरुण + ष्यञ् = --------------------

(घ) चञ्चल + ष्यञ् = --------------------

(ङ) चपल + ष्यञ् = --------------------

(च) सफल + ष्यञ् = --------------------

(छ) सम + ष्यञ् = --------------------

6. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the verse.]

**यथा–** (i) **क्रोधः** **आसुरीं सम्पदम्** अभिजातस्य लक्षणम्।

(ii) दर्पः -------- ------------ अभिजातस्य लक्षणम्।

www.thearyasamaj.org


(iii) ------------ आसुरीं सम्पदम् अभिजातस्य लक्षणम्।

(iv) ------------ आसुरीं सम्पदम् अभिजातस्य लक्षणम्।

(v) अज्ञानम् -------------------अभिजातस्य लक्षणम्।

**7. अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गए शब्दों के प्रयोग से कुछ वाक्य लिखें।। Write some sentences using the words given below.]

(क) अभिजातः (ख) सम्पद् (ग) दर्पः (घ) दम्भः

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

www.thearyasamaj.org



## श्लोकः

**द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।**
**दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥54॥** (भ.गी. 16.6)

## पदच्छेदः

द्वौ भूत–सर्गौ लोके अस्मिन् दैवः आसुरः एव च।
दैवः विस्तरशः प्रोक्तः आसुरम् पार्थ मे शृणु॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| द्वौ | द्वि (संख्यावाचकम्) पुं. प्र. द्वि. विशेषणम् | दैवः | अ. पुं. प्र. एक. |
| | | विस्तरशः | अव्ययम् |
| भूतसर्गौ | अ. पुं. प्र. द्वि. | प्रोक्तः | अ. पुं. प्र. एक. क्तान्तम् |
| लोके | अ. पुं. सप्त. एक. | आसुरम् | अ. पुं. द्वि. एक. |
| अस्मिन् | इदम्–म.(सर्व.)पुं. सप्त. एक. | पार्थ | अ. पुं. सम्बो. एक. |
| दैवः | अ. पुं. प्र. एक. विशेषणम् | मे | अस्मद्–द.(सर्व.)त्रि.षष्ठी एक. |
| आसुरः | अ. पुं. प्र. एक. विशेषणम् | शृणु | श्रु–परस्मैपदे लोट् मपु. एक. (क्रिया) |
| एव | अव्ययम् | | |
| च | अव्ययम् (समुच्चयार्थे) | | |

## आकाङ्क्षा

(स्तः।)

| | |
|---|---|
| कौ स्तः। | भूतसर्गौ स्तः। |
| कियन्तौ भूतसर्गौ स्तः? | द्वौ भूतसर्गौ स्तः। |
| कुत्र स्तः? | अस्मिन् लोके। |
| प्रथमः भूतसर्गः कः? | दैवः। |
| अपरः भूतसर्गः कः? | आसुरः एव। |

www.thearyasamaj.org



प्रोक्तः।

क: प्रोक्तः? दैवः प्रोक्तः।

कथं प्रोक्तः? विस्तरशः प्रोक्तः।

शृणु।

अत्र किं सम्बोधनम्? पार्थ इति।

किं शृणु? आसुरं शृणु।

कस्मात् शृणु? मे (वचनात्) शृणु।

**अन्वयः**

अस्मिन् लोके द्वौ भूतसर्गौ दैवः आसुरः एव च (स्तः)। (तत्र) दैवः विस्तरशः प्रोक्तः। हे पार्थ (सम्प्रति) आसुरं मे (वचनात्) शृणु।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अस्मिन् लोके | एतस्मिन् संसारे | इस संसार में | In this world |
| द्वौ | द्विसंख्याकौ उभयविधौ | दो प्रकार के | two type of |
| भूतसर्गौ | प्राणिनां सृष्टी | प्राणियों की सृष्टि | creations of world |
| दैवः | दैवसम्पदायुतः | दैवी सम्पत्ति वाली | having divine treasure |
| आसुरः | आसुरसम्पदायुतः | आसुरी सम्पत्ति | having demoniacal treasure |
| विस्तरशः | विस्तरेण | विस्तार से | extensively |
| प्रोक्तः | कथितः | बतला दिया है | described |
| पार्थ | अर्जुन! | हे अर्जुन! | Arjuna! |
| आसुरं | आसुरसम्पत्तियुतं | आसुरी सम्पत्ति वाली | demoniacal |
| मे (वचनात्) | मम (वचनात्) | मेरे (वचन से) | from me (Word) |
| शृणु | आकर्णय | सृष्टि के विषय में सुनो | listen |

**भावार्थः**

**संस्कृतम्** – अस्मिन् जगति द्विविधे प्राणिनां सृष्टी स्तः। एका दैवी सृष्टिः, यत्र दैवीसम्पदायुताः प्राणिनः, अपरा च आसुरी सृष्टिः, यत्र आसुरीसम्पदायुताः प्राणिनः सन्ति। दैवीसृष्टिः पूर्वमेव विस्तरेण निरूपिता। हे अर्जुन! सम्प्रति त्वं मम वचनात् उच्यमानं विस्तरशः शृणु।

www.thearyasamaj.org



**हिन्दी** – इस संसार में दैवसम्पत्ति युक्त तथा आसुरी सम्पत्ति युक्त दो प्रकार के प्राणियों की सृष्टि है। दैवी सृष्टि के विषय में पहले ही विस्तार से बतला दिया है। हे अर्जुन! अब तुम मुझसे आसुरी सृष्टि के विषय में सुनो।

**आंग्लम्** – In this world there are two (types of) creation of beings-the divine and the demoniacal. The divine has been spoken of elaborately. Listen about the demoniacal from me, O son of *Pārtha*.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

लोकेऽस्मिन् = लोके + अस्मिन् (पूर्वरूपसन्धिः)

दैव आसुर एव = दैवः + आसुरः + एव (विसर्गसन्धिः)

दैवो विस्तरशः = दैवः + विस्तरशः (विसर्गसन्धिः)

प्रोक्त आसुरम् = प्रोक्तः + आसुरम् (विसर्गसन्धिः)

(ख) **समासः**

भूतसर्गौ = भूतानां सर्गः भूतसर्गः (षष्ठीतत्पुरुषः) तौ भूतसर्गौ

(ग) **कृदन्तः**

प्रोक्तः = प्र + ब्रू + क्त

(घ) **तद्धितान्तः**

विस्तरशः = विस्तर + शस्

---

## अभ्यासः - 45

### श्लोकः - 54

1. **सन्धिविच्छेदं सन्धिं वा यथानिर्देशं कुरुत–**

[यथानिर्देश सन्धि-विच्छेद या सन्धि करें। Disjoin or join the *Sandhi* as required.]

| | | | | |
|---|---|---|---|---|
| (क) लोकेऽस्मिन् | = | -------- | + | -------- |
| (ख) रामेऽपि | = | -------- | + | -------- |
| (ग) ----------- | = | वर्तते | + | अधुना |
| (घ) ----------- | = | समये | + | अतिक्रान्ते |
| (ङ) हरेऽव | = | -------- | + | -------- |

www.thearyasamaj.org



2. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों का प्रातिपदिक लिखें। Write the nominal stem of given words.]

(क) लोके = ------------

(ख) द्वौ = ------------

(ग) प्रोक्तः = ------------

(घ) मे = ------------

(ङ) अस्मिन् = ------------

3. **उचितमेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) अस्मिन् | (i) अर्जुन |
| (ख) द्वौ | (ii) लोके |
| (ग) प्रोक्तः | (iii) भूतसर्गौ |
| (घ) पार्थ | (vi) भूतसर्गः |
| (ङ) दैवः | (v) विस्तरशः |

4. **प्रश्नोत्तरं यथोचितं योजयत–**

[प्रश्नों को उचित उत्तर से जोड़ें। Join the question with appropriate answer.]

| | |
|---|---|
| (क) प्रथमः भूतसर्गः कः? | (i) आसुरः |
| (ख) द्वितीयः भूतसर्गः कः? | (ii) भूतानाम् |
| (ग) कः अर्जुनं श्रावयति? | (iii) दैवः |
| (घ) श्लोके अर्जुनस्य सम्बोधनं किम्? | (iv) कृष्णः |
| (ङ) द्विविधः सर्गः केषां प्रोक्तः? | (v) पार्थ |

5. **यथोचितं योजयत–**

[सही विवरण से जोड़े। Match with appropriate analysis.]

| | |
|---|---|
| (i) प्रोक्तः | (क) संख्या शब्दः |
| (ii) शृणु | (ख) तद्धितान्तम् अव्ययम् |
| (iii) आसुरः | (ग) क्तान्तं रूपम् |
| (iv) विस्तरशः | (घ) कर्तरि लोट् मपु. एक. |
| (v) द्वौ | (ङ) असुरस्य अयम् |

www.thearyasamaj.org



6. **यथोदाहरणं वाक्यानि परिवर्तयत–**

[उदाहरण के अनुसार वाक्यों को बदलें। Change the sentences as shown in the example.]

**यथा–** (क) कृष्णेन दैवः भूतसर्गः प्रोक्तः। = **कृष्णः दैवं भूतसर्गं प्रोक्तवान्।**

(ख) कृष्णेन आसुरः भूतसर्गः प्रोक्तः। = --------- आसुरं ------------------।

(ग) पार्थेन दैवः भूतसर्गः श्रुतः। = ---------------------------------।

(घ) पार्थेन आसुरः भूतसर्गः श्रुतः। = ---------------------------------।

(ङ) गीतया आसुरः भूतसर्गः उक्तः। = ---------------------------- उक्तवती।

(च) भक्तेन ईश्वरः अर्चितः। = ---------------------------------।

(छ) शिष्यैः वेदाः पठिताः। = शिष्याः -------------------- पठितवन्तः।

(ज) आचार्यैः शिष्याः उपदिष्टाः। = ---------------------------------।

(झ) लक्ष्म्या विष्णुः सेवितः। = ---------------------------------।

(ञ) सीतया रामः परिणीतः। = ---------------------------------।

www.thearyasamaj.org



**श्लोकः**

**आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।**
**ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ॥55॥** (भ.गी. 16.12)

**पदच्छेदः**

आशा-पाश-शतैः बद्धाः काम-क्रोध-परायणाः।
ईहन्ते काम-भोग-अर्थम् अन्यायेन अर्थ-सञ्चयान्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| आशापाशशतैः | अ. नपुं. तृ. बहु. समस्तम् | कामभोगार्थम् | अ. नपुं. द्विती. एक. समस्तम् |
| बद्धाः | अ. पुं. प्र. बहु. | | |
| कामक्रोधपरायणाः | अ. पुं. प्र. बहु. समस्तम् | अन्यायेन | अ. पुं. तृ. एक. |
| ईहन्ते | ईह् - कर्तरि आत्मनेपदे लट् प्र. पु. बहु. | अर्थसञ्चयान् | अ. पुं. द्विती. बहु. |

**आकाङ्क्षा**

**(मानवाः) ईहन्ते।**

| | |
|---|---|
| कीदृशाः (मानवाः) ईहन्ते? | बद्धाः मानवाः ईहन्ते। |
| कैः बद्धाः (मानवाः)? | आशापाशशतैः बद्धाः। |
| पुनश्च कीदृशाः? | कामक्रोधपरायणाः मानवाः। |
| कान् ईहन्ते? | अर्थसञ्चयान् ईहन्ते। |
| केन प्रकारेण ईहन्ते? | अन्यायेन ईहन्ते। |
| अर्थसञ्चयान् किमर्थम् ईहन्ते? | कामभोगार्थम् अर्थसञ्चयान् ईहन्ते। |

**अन्वयः**

आशापाशशतैः बद्धाः कामक्रोधपरायणाः (मानवाः) अन्यायेन अर्थसञ्चयान् कामभोगार्थम् ईहन्ते।

www.thearyasamaj.org



## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| आशापाशशतैः | आशारूपिभिः शतैः पाशैः | आशा के सैकड़ों पाशों के | By hundreds of shackles in the form of hope |
| बद्धाः | नियन्त्रितास्सन्तः | बन्धे हुए | bound |
| कामक्रोध-परायणाः | कामस्य क्रोधस्य च वशीभूताः | काम और क्रोध के वशीभूत | giving themselves wholly to passion and anger |
| अन्यायेन | अनुचितमार्गेण | अनुचित मार्ग से | through improper means |
| अर्थसञ्चयान् | धनसङ्ग्रहम् | धन संग्रह | to amass wealth |
| कामभोगार्थम् | कामभोगप्रयोजनाय | काम भोग प्रयोजन के लिये | for the enjoyment of desirable objects |
| ईहन्ते | चेष्टन्ते | पाने की चेष्टा करते रहते हैं | they endeavour |

## भावार्थः

**संस्कृतम्** – आशायाः शतशः पाशैः निबद्धाः कामस्य क्रोधस्य च वशीभूताः मानवाः स्वीयकामनानां भोगाय अनुचितसाधनानि उपयुज्य अपि धनसंग्रहं कर्तुं चेष्टन्ते।

**हिन्दी** – आशा के सैकड़ों फन्दों में फँसे हुए काम और क्रोध के वशीभूत मानव अपनी कामनाओं के उपभोग के लिए अनुचित तरीकों से धन संग्रह करने की चेष्टा करते रहते हैं।

**आंग्लम्** – Bound by hundred of shackles in the form of hope, giving themselves wholly to passion and anger, they endeavour to amass wealth through foul means for the enjoyment of desirable objects.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

आशापाशशतैर्बद्धाः – आशापाशशतैः + बद्धाः (विसर्गसन्धिः)

अन्यायेनार्थसञ्चयान् – अन्यायेन + अर्थसञ्चयान् (दीर्घसन्धिः)

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| आशापाशशतैः | – | आशा एव पाशः आशापाशः (कर्मधारयः) आशापाशानां शतम् (षष्ठीतत्पुरुषः) तैः |
| कामक्रोधपरायणाः | – | कामश्च क्रोधश्च कामक्रोधौ (द्वन्द्वः) कामक्रोधौ परम् अयनं येषां ते (बहुव्रीहिः) |
| कामभोगार्थम् | – | कामानां भोगः कामभोगः (षष्ठीतत्पुरुषः) कामभोगाय इदम् कामभोगार्थम् (चतुर्थीतत्पुरुषः) |
| अर्थसञ्चयान् | – | अर्थस्य सञ्चयः अर्थसञ्चयः (षष्ठीतत्पुरुषः) तान् |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| बद्धाः | – | बन्ध् + क्त |

**अवधेयम्**

षष्ठीतत्पुरुषः

---

## अभ्यासः - 46

### श्लोकः - 55

1. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोकों से पद चुनकर लिखें। Write the words from verse as per the instruction.]

(क) तृतीयान्तपदम् - (i) ------------ (ii) ------------

(ख) प्रथमान्तपदम् - (i) ------------ (ii) ------------

(ग) क्रियापदम् - (i) ------------

2. **उचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) कामक्रोधपरायणाः | (i) धनसङ्ग्रहान् |
| (ख) आशापाशशतैः | (ii) कामयन्ते |
| (ग) अर्थसञ्चयान् | (iii) अ. नपुं. तृ. बहु. |
| (घ) ईहन्ते | (iv) अ. पुं. प्र. बहु. |

www.thearyasamaj.org


3. **प्रश्नानाम् उत्तरं प्रदत्त–**

[प्रश्नों के उत्तर दें। Answer the questions.]

(क) कामक्रोधपरायणाः कान् वाञ्छन्ति? ----------------------------------

(ख) कामक्रोधपरायणाः केन प्रकारेण धनादिसङ्ग्रहान् कामयन्ते? ----------------------------------

(ग) का पाशतुल्या अस्ति? ----------------------------------

(घ) मानवाः कया बद्धाः भवन्ति? ----------------------------------

4. **यथोदाहरणं विभक्तिरूपं लिखत–**

[उदाहरण के अनुसार विभक्ति रूप लिखें। Write the declension as per example.]

| | | | **एक.** | **द्वि.** | **बहु.** | **विभक्तिः** |
|---|---|---|---|---|---|---|
| **यथा–** | (क) आशा | = | **आशया** | **आशाभ्याम्** | **आशाभिः** | **तृतीया** |
| | (ख) बालिका | = | --------- | --------- | --------- | --------- |
| | (ग) पत्रिका | = | --------- | --------- | --------- | --------- |
| | (घ) गीता | = | --------- | --------- | --------- | --------- |
| | (ङ) वनलता | = | --------- | --------- | --------- | --------- |
| | (च) इच्छा | = | --------- | --------- | --------- | --------- |
| | (छ) सेवा | = | --------- | --------- | --------- | --------- |

5. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

(i) भोगाय = **भोगार्थम्**

(ii) धनाय = -------

(iii) दानाय = -------

(iv) विनाशाय = -------

(v) रक्षणाय = -------

(vi) भ्रमणाय = -------

(vii) गमनाय = -------

www.thearyasamaj.org


6. **रिक्तस्थानं पूरयत–**

[रिक्तस्थान की पूर्ति करें। Fill in the blanks.]

| | | | |
|---|---|---|---|
| **यथा–** | (क) आशारूपिभिः शतैः पाशैः | = | **आशापाशशतैः** |
| | (ख) उच्छ्वासरूपिभिः शतैः व्यजनैः | = | ---------------- |
| | (ग) नेत्ररूपिभिः शतैः कमलैः | = | ---------------- |
| | (घ) पर्णरूपिभिः शतैः हस्तैः | = | ---------------- |
| | (ङ) कमलरूपिभिः शतैः आननैः | = | ---------------- |

7. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as shown in the example.]

| | | | | |
|---|---|---|---|---|
| **यथा–** (क) | अर्थस्य सञ्चयः | **अर्थसञ्चयः** | तान् | **अर्थसञ्चयान्** |
| (ख) | धनस्य सञ्चयः | ------------- | तान् | ---------- |
| (ग) | काष्ठस्य सञ्चयः | ------------- | तान् | ---------- |
| (घ) | रत्नस्य सञ्चयः | ------------- | तान् | ---------- |
| (ङ) | सुवर्णस्य सञ्चयः | ------------- | तान् | ---------- |

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों के कुछ वाक्य बनायें। Construct some sentences using the words given below.]

(क) ईह् (कर्तरि लट्) (ख) बन्ध् (क्त प्रत्यये) (ग) सञ्चय (घ) भोगार्थ

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**इदमद्य मया लब्धमिमं प्राप्स्ये मनोरथम् ।**
**इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥56॥** (भ.गी. 16.13)

**पदच्छेदः**

इदम् अद्य मया लब्धम् इमं प्राप्स्ये मनो-रथम्।
इदम् अस्ति इदम् अपि मे भविष्यति पुनः धनम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| इदम् | इदम्-म. (सर्व.)नपुं. प्र. एक. | इदम् | इदम्-म. (सर्व.) नपुं. प्र. एक. |
| अद्य | अव्ययम् | अस्ति | अस् कर्तरि लट् प्रपु. एक. |
| मया | अस्मद्-द. (सर्व.) तृ. एक. | इदम् | इदम्-म. (सर्व.) नपुं. प्र. एक. |
| लब्धम् | अ. नपुं. प्र. एक. | अपि | अव्ययम् |
| इमं | इदम्-म. (सर्व.) पुं. द्विती. एक. | मे | अस्मद्-द.(सर्व) पुं. षष्ठी एक. |
| प्राप्स्ये | प्र + आप् कर्तरि आत्मनेपदे लृट् उपु. एक. | भविष्यति | भू-कर्तरि लृट् प्रपु. एक. |
| | | पुनः | अव्ययम् |
| मनोरथम् | अ. पुं. द्विती. एक. समस्तम् | धनम् | अ. नपुं. प्र. एक. |

**आकाङ्क्षा**

**लब्धम्।**

| | |
|---|---|
| किं लब्धम्? | इदं (वस्तु) लब्धम्। |
| केन लब्धम्? | मया लब्धम्। |
| कदा लब्धम्? | अद्य लब्धम्। |

**प्राप्स्ये।**

| | |
|---|---|
| कं प्राप्स्ये? | इमं मनोरथं प्राप्स्ये। |

**अस्ति।**

| | |
|---|---|
| किम् अस्ति? | इदं (वस्तु) अस्ति। |

www.thearyasamaj.org


भविष्यति।

किं भविष्यति? इदमपि धनं भविष्यति।

इदं धनं पुनः कस्य भविष्यति? इदं धनं पुनः मे भविष्यति।

## अन्वयः

मया अद्य इदम् लब्धम् इमम् मनोरथम् प्राप्स्ये इदम् अस्ति पुनः मे इदम् अपि धनम् भविष्यति ('इति अज्ञानमोहिताः वदन्ति' इति अग्रिमश्लोकद्वयस्थविषयेण सह अन्वयः।)

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| मया | मानवेन | मेरे द्वारा | By me |
| अद्य | इदानीं | इस समय | today |
| इदम् | एतद्वस्तु | यह वस्तु | this |
| लब्धम् | प्राप्तम् | प्राप्त है | has been gained |
| इमम् | एनम् | इस | this |
| मनोरथम् | कामनां | इच्छा को | desired object |
| प्राप्स्ये | लप्स्ये | प्राप्त करुँगा | I shall acquire |
| इदम् | एतद् धनम् | यह धन | this wealth |
| अस्ति | वर्तते | है | is |
| पुनः | मुहुः | फिर | again |
| मे | मम | मेरा | to me |
| इदमपि | एतद् अपि | यह भी | this also |
| धनं | सम्पद् | धन | wealth |
| भविष्यति | सम्भविष्यति | हो जायेगा | shall become |

## भावार्थः

**संस्कृतम्** – एतद् धनं मया इदानीं प्राप्तम्, इमां कामनां अग्रे लप्स्ये। इदं धनं सम्प्रति मम पार्श्वे अस्ति, अन्यद् धनं पुनः मम पार्श्वे आयास्यति (इति अज्ञानमोहितैः कथ्यते)

**हिन्दी** – यह धन मैंने आज प्राप्त किया, इस कामना को आगे पूरा करूँगा। अभी मेरे पास इतना धन है और भी धन फिर मेरे पास हो जायेगा (ऐसा अज्ञान से मोहित लोग कहते हैं।)

www.thearyasamaj.org



**आंग्लम्** – This has been gained by me today; I shall acquire this desired object. This is in hand; again, this wealth also will come to me (that says Ajñanmohita)

## निदर्शनम्

**(i) व्याकरणम्**

**( क ) सन्धिः**

| | | |
|---|---|---|
| मनोरथम् | – | मनः + रथम् (विसर्गसन्धिः) |
| अस्तीदम् | – | अस्ति + इदम् (दीर्घसन्धिः) |
| पुनर्धनम् | – | पुनः + धनम् (विसर्गसन्धिः) |

**( ख ) समासः**

| | | |
|---|---|---|
| मनोरथम् | – | मनसः रथम् (षष्ठीतत्पुरुषः) |

**( ग ) कृदन्त**

| | | |
|---|---|---|
| लब्धम् | – | लभ् + क्त |

---

## अभ्यासः – 47

### श्लोकः – 56

1. **श्लोकानुसारम् उचितपदेन रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words on the basis of the verse.]

इदमद्य ---------- ---------- प्राप्स्ये --------------।
इदमस्तीदमपि ------- --------------- ------------॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[यथानिर्देश श्लोक से पद चुनकर लिखें। Write the words from the verse as per instruction.]

(क) अव्ययपदम् - (i) ------------- (ii) ------------ (iii) ----------
(ख) प्रथमान्तम् - (i) ------------- (ii) ------------ (iii) ----------
(ग) क्रियापदम् - (i) ------------- (ii) ------------

www.thearyasamaj.org



3. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write the analytical sentences.]

(क) मनोरथः = ------------ -----------

(ख) मनोयोगः = ------------ -----------

(ग) मनोवृत्तिः = ------------ -----------

(घ) मनोरोगः = ------------ -----------

(ङ) मनोमालिन्यम् = ------------ -----------

(च) मनःकामना = ------------ -----------

4. **श्लोकानुसारं विभक्तिनिर्देशं कुरुत–**

[श्लोक के अनुसार विभक्ति निर्देश करें। Write the name of declension on the basis of the verse.]

**यथा–** (क) इदम् = **प्रथमाविभक्तिः**

(ख) इमम् = --------------

(ग) मया = --------------

(घ) मनोरथम् = --------------

(ङ) मे = --------------

(च) धनम् = --------------

5. **सन्धिं कुरुत–**

[सन्धि करें। Join euphonically.]

**यथा–** (क) पुनः + धनम् = **पुनर्धनम्**

(ख) पुनः + गच्छति = ------------------

(ग) पुनः + ददाति = ------------------

(घ) पुनः + मे = ------------------

(ङ) पुनः + अपि = **पुनरपि**

(च) पुनः + अस्ति = ------------------

(छ) पुनः + अवलोकनम् = ------------------

(ज) पुनः + आवृत्तिः = ------------------

www.thearyasamaj.org



6. **उचितरूपं रिक्तस्थाने लिखत–**

[सही रूप रिक्त स्थान में लिखें। Write the appropriate form in the blank space.]

| | | | | |
|---|---|---|---|---|
| **यथा–** | (i) | मया | **लब्धम्** | (लभ् + क्त) |
| | (ii) | मया | ---------- | (गम् + क्त) |
| | (iii) | मया | ---------- | (प्र + आप् + क्त) |
| | (iv) | मया | ---------- | (दा + क्त) |
| | (v) | मया | ---------- | (श्रु + क्त) |

7. **यथोदाहरणं क्रियापदं लिखत–**

[उदाहरण के अनुसार क्रियापद लिखें। Write the verbal word as per example.]

| | | | **एक.** | **द्वि.** | **बहु.** | |
|---|---|---|---|---|---|---|
| **यथा–** | (क) प्र + आप् | = | **प्राप्स्ये** | **प्राप्स्यावहे** | **प्राप्स्यामहे** | **(लृट् उपु.)** |
| | (ख) आप् | = | ---------- | ---------- | ---------- | (--------) |
| | (ग) याच् | = | ---------- | याचिष्यावहे | ---------- | (--------) |
| | (घ) शक् | = | ---------- | ---------- | शक्ष्यामहे | (--------) |

8. **उचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) मया | (i) धनम् |
| (ख) भविष्यति | (ii) लब्धम् |
| (ग) प्राप्स्ये | (iii) अस्ति |
| (घ) इदम् | (iv) मनोरथम् |

9. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि पृथक् पत्रे लिखत–**

[यहाँ दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the words given below.]

(i) इदम् (नपुं.) (प्रथमा) (ii) इदम् (पुं.) (प्रथमा) (iii) प्र + आप् (कर्तरि आत्मनेपदे लृट्) (iv) पुनः (v) अस्मद् (तृतीया)

www.thearyasamaj.org



**श्लोकः**

**असौ मया हतश्शत्रुर्हनिष्ये चापरानपि ।**
**ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ॥57॥** (भ.गी. 16.14)

**पदच्छेदः**

असौ मया हतः शत्रुः हनिष्ये च अपरान् अपि।
ईश्वरः अहम् अहम् भोगी सिद्धः अहम् बलवान् सुखी॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| असौ | अदस्-स.(सर्व.) पुं. प्र. एक. | अपि | अव्ययम् |
| मया | अस्मद्-द. (सर्व.) तृ. एक. | ईश्वरः | अ. पुं. प्र. एक. |
| हतः | अ. पुं. प्र. एक. | अहम् | अस्मद्-द. (सर्व.) प्र. एक. |
| शत्रुः | उ. पुं. प्र. एक. | अहम् | अस्मद्-द. (सर्व.) प्र. एक. |
| हनिष्ये | हन्-धातुः कर्तरि आत्मनेपदे लृट् उपु. एक. | भोगी | भोगिन्-न. पुं. प्र. एक. |
| | | सिद्धः | अ. पुं. प्र. एक. |
| च | अव्ययम् | अहम् | अस्मद्-द.(सर्व.) प्र. एक. |
| अपरान् | अ. (सर्व.) पुं. द्विती. बहु. | बलवान् | बलवत्-त. पुं. प्र. एक. |
| | | सुखी | सुखिन्-न. पुं. प्र. एक. |

**आकाङ्क्षा**

**हतः।**

क: हत:? — असौ हत:।

असौ क:? — असौ शत्रु:।

केन हत:? — मया हत:।

**(अहं) हनिष्ये।**

कान् अपि हनिष्ये? — अपरान् (शत्रून्) अपि हनिष्ये।

**अस्मि।**

अहं कीदृशः अस्मि? — अहम् ईश्वरः अस्मि।

पुनश्च अहं कीदृश:? — अहं भोगी।

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च कीदृशः? | अहं सिद्धः। |
| पुनश्च कीदृशः? | अहं बलवान्। |
| पुनश्च कीदृशः? | अहं सुखी। |

**अन्वयः**

असौ शत्रुः मया हतः अपरान् अपि हनिष्ये च। अहम् ईश्वरः, अहं भोगी, अहं सिद्धः, बलवान् सुखी (च अस्मि।) ('इति अज्ञानमोहिताः वदन्ति' इति अग्रिमश्लोकस्थविषयेण सह अन्वयः।)

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| असौ | एषः | यह | That |
| शत्रुः | रिपुः | शत्रु | enemy |
| मया | मद्द्वारा | मेरे द्वारा | by me |
| हतः | मारितः | मारा गया | killed |
| अपरान् | अन्यान् | दूसरों | others |
| अपि | अपि | भी | also |
| हनिष्ये च | मारयिष्यामि च | मारूँगा | I shall kill |
| अहं | अहम् | मैं | my self |
| ईश्वरः | सर्वसमर्थः | सर्वसमर्थ | Almighty |
| अहं | अहम् | मैं | my self |
| भोगी | सम्पन्नः | भोगयुक्तः | enjoyer |
| अहं | अहम् | मैं | myself |
| सिद्धः | सर्वं साधयितुं समर्थः [अष्टसिद्धियुतः] | सब साधित करने में सक्षम | well established |
| बलवान् | शक्तिमान् | बली | strong |
| सुखी | सुखवान् | सुखी | happy |

**भावार्थः**

**संस्कृतम्** – अहम् अमुं शत्रुं मारितवान्, अन्यान् शत्रून् अपि मारयिष्यामि। अहं सर्वसमर्थः, भोगसामग्रीयुक्तः, सर्वं साधयितुं समर्थः, शक्तिशाली, प्रसन्नः, सुविधासम्पन्नः च अस्मि (इति अज्ञानमोहितैः कथ्यते।)

www.thearyasamaj.org


**हिन्दी** – मैंने इस शत्रु को मार डाला, और अब दूसरे शत्रुओं को भी मार डालूँगा। मैं सर्वसमर्थ, सभी भोगसामग्रियों से युक्त, सब कुछ साधने वाला, शक्तिशाली, प्रसन्न व सुविधायुक्त हूँ (ऐसा अज्ञानमोहित कहते हैं।)

**आंग्लम्** – That enemy has been killed by me and I shall kill others as well. I am the lord, I am the enjoyer, I am well established, mighty and happy (that say Ajñanamohita.)

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

| | | |
|---|---|---|
| शत्रुर्हनिष्ये | – | शत्रुः + हनिष्ये (विसर्गसन्धिः) |
| चापरान् | – | च + अपरान् (दीर्घसन्धिः) |
| ईश्वरोऽहम् | – | ईश्वरः + अहम् (विसर्गसन्धिः) |
| सिद्धोऽहम् | – | सिद्धः + अहम् (विसर्गसन्धिः) |

**(ख) कृदन्तः**

| | | |
|---|---|---|
| हतः | – | हन् + क्त |
| सिद्धः | – | सिध् + क्त |

**(ग) तद्धितान्तः**

| | | |
|---|---|---|
| भोगी | – | भोग + इनि |
| बलवान् | – | बल + मतुप् |
| सुखी | – | सुख + इनि |

**(घ) पर्यायवाचिनः**

| | | |
|---|---|---|
| ईश्वरः | – | प्रभुः, ईशः, परमात्मा, शास्ता, नियन्ता, |
| शत्रुः | – | अरि, रिपुः, वैरी, द्विट् |

**अवधेयम्**

मतुबर्थकप्रत्यये

---

## अभ्यासः – 48

### श्लोकः – 57

1. **सन्धिं कुरुत–**

[सन्धि करें। Make the euphonic combination.]

**यथा–** (क) ईश्वरः + अहम् = **ईश्वरोऽहम्**

(ख) सिद्धः + अहम् = ---------------

www.thearyasamaj.org


(ग) कः + अहम् = ---------------

(घ) रामः + अपि = ---------------

(ङ) देशः + अस्ति = ---------------

(च) अमरः + अजरः = ---------------

2. **एकपदं लिखत–**

[एकपद लिखें। Write short form of the words given below.]

| | | | इनि | मतुप् |
|---|---|---|---|---|
| यथा– | (क) भोगः अस्य अस्ति | = | **भोगी** | **भोगवान्** |
| | (ख) रोगः अस्य अस्ति | = | --------- | --------- |
| | (ग) सुखम् अस्य अस्ति | = | --------- | --------- |
| | (घ) बलम् अस्य अस्ति | = | --------- | --------- |
| | (ङ) धनम् अस्य अस्ति | = | --------- | --------- |
| | (च) रूपम् अस्य अस्ति | = | --------- | --------- |
| | (छ) गुणः अस्य अस्ति | = | --------- | --------- |
| | (ज) योगः अस्य अस्ति | = | --------- | --------- |

3. **उपसर्गं योजयित्वा शब्दनिर्माणं कुरुत–**

[उपसर्ग जोड़कर शब्द निर्माण करें। Build the words by enjoining the prefixes.]

यथा– (क) सु + खम् = **सुखम्**

(ख) दुर् + खम् = ---------------

(ग) सु + लभम् = ---------------

(घ) दुर् + लभम् = ---------------

(ङ) सु + गमम् = ---------------

(च) दुर् + गमम् = ---------------

(छ) सु + जनः = ---------------

(ज) दुर् + जनः = ---------------

(झ) सु + बुद्धिः = ---------------

(ञ) दुर् + बुद्धिः = ---------------

www.thearyasamaj.org


4. **श्लोकानुसारम् 'अहम्' पदस्य विशेषणपदैः रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार 'अहम्' पद के विशेषण पदों से रिक्त स्थान की पूर्ति करें। Fill in the blanks with qualifiers of '*Aham*'.]

**यथा–** (क) अहम् **ईश्वरः** अस्मि।

(ख) अहम् ------------------ अस्मि।

(ग) अहम् ------------------ अस्मि।

(घ) अहम् ------------------ अस्मि।

(ङ) अहम् ------------------ अस्मि।

5. **उचितमेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) असौ | (i) ईश्वरेण |
| (ख) ईश्वरः | (ii) अयम् |
| (ग) शत्रुः | (iii) अन्यान् |
| (घ) हतः | (iv) परमात्मा |
| (ङ) मया | (v) अरिः |
| (च) अपरान् | (vi) मारितः |

6. **कोष्ठकस्थेन उचितक्रियापदेन रिक्तस्थानं पूरयत–**

[कोष्ठकस्थ उचित क्रियापद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with the words given in the Table.]

(क) अहं शत्रुं ------------------।

(ख) अहं धनं ------------------।

(ग) अहं भोजनं ------------------।

(घ) अहं भिक्षुकाय वस्त्रं -----------।

(ङ) अहं भिक्षां ------------------।

| |
|---|
| याचिष्ये |
| दास्ये |
| हनिष्ये |
| प्राप्स्ये |
| करिष्ये |

7. **अन्वयं पूरयत–**

[अन्वय की पूर्ति करें। Complete the construction.]

असौ शत्रुः ----- -----, अपरान् च अपि --------- ----। अहम् ----------, अहम् ---------, ---- -----, ---------- ---------, (च अस्मि।)

www.thearyasamaj.org


**श्लोक:**

**आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।**
**यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता: ॥58॥** (भ.गी. 16.15)

**पदच्छेद:**

आढ्य: अभि–जनवान् अस्मि क: अन्य: अस्ति सदृश: मया।
यक्ष्ये दास्यामि मोदिष्ये इति अज्ञान–वि–मोहिता:॥

**पदपरिचय:**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| आढ्य: | अ. पुं. प्र. एक. | यक्ष्ये | यज्–कर्तरि आत्मनेपदे |
| अभिजनवान् | अभिजनवत्-त. पुं. प्र. एक. | | लृट् उपु. एक. |
| अस्मि | अस्–कर्तरि लट् प्रपु. एक. | दास्यामि | दा–कर्तरि लृट् उपु. एक. |
| क: | किम्–म. (सर्व.) पुं. प्र. एक. | मोदिष्ये | मुद्–कर्तरि आत्मनेपदे |
| अन्य: | अन्य–अ. (सर्व.) पुं. प्र. एक. | | लृट् उपु. एक. |
| अस्ति | अस्–कर्तरि लट् प्रपु. एक. | इति | अव्ययम् |
| सदृश: | अ. पुं. प्र. एक. | अज्ञानविमोहिता: | अ. पुं. प्र. बहु. समस्तम् |
| मया | अस्मद्–द.(सर्व.)त्रि. तृ. एक. | | |

**आकाङ्क्षा**

**(वदन्ति।)**

| | |
|---|---|
| के (वदन्ति)? | अज्ञानविमोहिता: (वदन्ति)। |
| अज्ञानविमोहिता: किम् इति (वदन्ति)? | अस्मि इति। |
| कीदृश: अस्मि इति? | आढ्य: अस्मि इति। |
| पुनश्च कीदृश: अस्मि इति? | अभिजनवान् अस्मि इति। |
| अज्ञानविमोहिता: पुन: किम् इति (वदन्ति)? | अस्ति इति। |
| क: अस्ति इति? | अन्य: क: अस्ति? इति। |
| केन सदृश: अन्य: क: अस्ति इति? | मया सदृश: अन्य: क: अस्ति इति। |
| अज्ञानविमोहिता: पुनश्च किम् इति वदन्ति? | यक्ष्ये इति। |
| पुनश्च किम् इति (वदन्ति)? | दास्यामि इति। |
| पुनश्च किम् इति (वदन्ति)? | मोदिष्ये इति। |

www.thearyasamaj.org


**अन्वयः**

(अहम्) आढ्यः, अभिजनवान् अस्मि। मया सदृशः अन्यः कः अस्ति। यक्ष्ये, दास्यामि, मोदिष्ये–इति अज्ञानविमोहिताः (वदन्ति)।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| आढ्यः | धनी | धनवान | Rich |
| अभिजनवान् | बहुजनयुतः | कई लोगों से युक्त | well |
| अस्मि | वर्ते | हूँ | I am |
| मया सदृशः | मत्समः | मेरे समान | equal to me |
| अन्यः कः | अपरः कः | दूसरा कौन | who else |
| अस्ति | वर्तते | है | is |
| यक्ष्ये | यजनं करिष्ये | यज्ञ करूँगा | will sacrifice |
| दास्यामि | दानं करिष्यामि | दान करूँगा | will give |
| मोदिष्ये | आमोदं करिष्यामि | मौज–मस्ती करूँगा | will rejoice |
| इति | एवं | इस प्रकार | thus |
| अज्ञानविमोहिताः | अज्ञानमूढाः | अज्ञान से मूढ हुए | deluded by ignorance |

**भावार्थः**

**संस्कृतम्** – अहं धनवान्, बहुजनयुतः अस्मि। मत्समानः अन्यः अस्मिन् जगति न वर्तते। अहं यज्ञान् करिष्यामि, आमोदं करिष्यामि इति अज्ञानेन विमूढाः गर्वेण वदन्ति।

**हिन्दी** – मैं धनवान् हूँ, बहुत से लोग मेरे पास हैं। मेरे समान इस संसार में दूसरा कोई नहीं है। मैं यज्ञ करूँगा, दान करूँगा, मौज-मस्ती करूँगा– इस प्रकार अज्ञान से मोहित लोग गर्व से बोलते हैं।

**आंग्लम्** – I am rich and well born, who else is equal to me? I will sacrifice. I will give alms. I will rejoice thus deluded by ignorance.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

आढ्योऽभिजनवान् – आढ्यः + अभिजनवान् (विसर्गसन्धिः)

कोऽन्योऽस्ति – कः + अन्यः + अस्ति (विसर्गसन्धिः)

सदृशो मया – सदृशः + मया (विसर्गसन्धिः)

मोदिष्य इत्यज्ञानाविमोहिताः – मोदिष्ये + इति + अज्ञानविमोहिताः (अयादिसन्धिः यलोपसन्धिश्च) (यण्सन्धिः)

(ख) **समासः**

अज्ञानविमोहिताः – न ज्ञानम् अज्ञानम् (नञ्तत्पुरुषः)
अज्ञानेन विमोहितः अज्ञानविमोहितः (तृतीयातत्पुरुषः) ते

(ग) **कृदन्तः**

आढ्यः – आ + ध्यै + क (धकारस्य ढकारः)

सदृशः – समानं दर्शनम् अस्य, दृश + कञ् [समानस्य सादेशः]

विमोहिताः – वि + मुह् + क्त

(घ) **तद्धितान्तः**

अभिजनवान् – अभि + जन + मतुप्

(ङ) **कारकम्**

तुल्यार्थे तृतीया – मया सदृशः

**अवधेयम्**

**तुल्यार्थे तृतीया**

www.thearyasamaj.org


## अभ्यासः - 49

### श्लोकः - 58

1. **प्रश्नानाम् उत्तरं प्रदत्त–**

[प्रश्नों के उत्तर दें। Answer the questions.]

(क) अन्यः केन सदृशः नास्ति? ------------------------------

(ख) 'अहं दास्यामि' इति कीदृशः जनः वदति? ------------------------------

(ग) 'आढ्यः' इत्यस्य कः अर्थः? ------------------------------

2. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write the analytical sentence.]

यथा– (क) अज्ञानविमोहितः = **अज्ञानेन विमोहितः**

(ख) कामविमोहितः = ---------- ----------

(ग) सौन्दर्यविमोहितः = ---------- ----------

(घ) ऐश्वर्यविमोहितः = ---------- ----------

(ङ) रूपविमोहितः = ---------- ----------

(च) मायाविमोहितः = ---------- ----------

3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi.*]

**(क)**

यथा– (i) आढ्योऽभिजनवान् = **आढ्य + अभिजनवान्**

(ii) कोऽन्यः = ---------- + ------------------

(iii) अन्योऽस्ति = ---------- + ------------------

(iv) धन्योऽयम् = ---------- + ------------------

**(ख)**

यथा– (i) इत्यज्ञानविमोहिताः = **इति + अज्ञानविमोहिताः**

(ii) इत्यभिजनवान् = ---------- + ------------------

(iii) भवत्येव = ---------- + ------------------

(iv) हसत्येषः = ---------- + ------------------

(v) यद्यपि = ---------- + ------------------

www.thearyasamaj.org



4. **उचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) आढ्यः | (i) एवम् |
| (ख) सदृशः | (ii) धनी |
| (ग) यक्ष्ये | (iii) अविद्या |
| (घ) इति | (iv) तुल्यः |
| (ङ) अज्ञानम् | (v) यजनं करिष्ये |

5. **उचितं मेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) अभिजनवान् | (i) तिङन्तः |
| (ख) विमोहितः | (ii) सर्वनाम |
| (ग) मोदिष्ये | (iii) तद्धितान्तः |
| (घ) कः | (iv) अव्ययम् |
| (ङ) इति | (v) कृदन्तः |

6. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate word as per example.]

**यथा–** (क) सः **मया** (अस्मद्) सदृशः अस्ति।

(ख) अर्जुनः -------- (इन्द्र) सदृशः अस्ति।

(ग) सा -------- (सीता) सदृशी अस्ति।

(घ) गुरुः -------- (देव) सदृशः अस्ति।

(ङ) गुरुपत्नी -------- (मातृ) सदृशी अस्ति।

(च) गुरुः -------- (पितृ) सदृशः अस्ति।

7. **रिक्तस्थानं यथोदाहरणं पूरयत–**

[रिक्त स्थान की पूर्ति उदाहरण के अनुसार करें। Fill in the blanks as per example.]

**यथा–** (क) मुद् आत्मनेपदे लृट् उपु. एक. = **मोदिष्ये**

(ख) हन् आत्मनेपदे लृट् उपु. एक. = ----------

(ग) दा आत्मनेपदे लृट् उपु. द्वि. = ----------

www.thearyasamaj.org



(घ) यज् आत्मनेपदे लृट् उपु. बहु. = ----------

(ङ) प्र + आप् आत्मनेपदे लृट् उपु. एक. = ----------

8. **श्लोकात् क्रियापदानां संग्रहं कृत्वा कतिचन वाक्यानि लिखत–**

[श्लोक से क्रियापदों का संग्रह कर कुछ वाक्य लिखें। Write the sentences with the verbs of verse.]

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

----------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।**
**कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥59॥** (भ.गी. 16.21)

**पदच्छेदः**

त्रि-विधम् नरकस्य इदम् द्वारम् नाशनम् आत्मनः।
कामः क्रोधः तथा लोभः तस्मात् एतत् त्रयम् त्यजेत्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| त्रिविधम् | अ. नपुं. प्र. एक. समस्तम् | तथा | तद्धितान्तम् अव्ययम् |
| नरकस्य | अ. पुं. षष्ठी एक. | लोभः | अ. पुं. प्र. एक. |
| इदम् | इदम्–म.(सर्व.)नपुं. प्र. एक. | तस्मात् | तद्–द. (सर्व.) |
| द्वारम् | अ. नपुं. प्र. एक. | | नपुं. पं. एक. |
| नाशनम् | अ. नपुं. प्र. एक. | एतत् | एतद्–द. (सर्व.) |
| आत्मनः | आत्मन्–न. पुं. षष्ठी. एक. | | नपुं. द्विती. एक. |
| कामः | अ. पुं. प्र. एक. | त्रयम् | अ. नपुं. द्विती. एक. |
| क्रोधः | अ. पुं. प्र. एक. | त्यजेत् | त्यज्–कर्तरि विधि. प्रपु. एक. |

**आकाङ्क्षा**

**अस्ति।**

| | |
|---|---|
| किम् अस्ति? | नाशनम् अस्ति। |
| किम् नाशनम् अस्ति? | द्वारं नाशनम् अस्ति। |
| किं द्वारं नाशनम् अस्ति? | इदं द्वारं नाशनम् अस्ति। |
| कस्य इदं द्वारं नाशनम् अस्ति? | नरकस्य इदं द्वारं नाशनम् अस्ति। |
| नरकस्य इदं द्वारं कतिविधम्? | त्रिविधम्। |
| त्रिविधं द्वारं किं किम्? | कामः, क्रोधः लोभः इति इदं नरकस्य त्रिविधं द्वारम्। |
| नरकस्य इदं त्रिविधं द्वारं कस्य नाशनम् अस्ति? | नरकस्य इदं त्रिविधं द्वारं आत्मनः नाशनम् अस्ति। |
| तस्मात् किं कुर्यात्? | तस्मात् त्रयं त्यजेत्। |
| तस्मात् किं तत् त्रयं त्यजेत्? | तस्मात् एतत् त्रयं (कामः, क्रोधः, लोभः इत्येतत् त्रयं) त्यजेत्। |
| किमर्थं त्यजेत्? | तस्मात् (आत्मनः नाशकारणात्) त्यजेत्। |

www.thearyasamaj.org



**अन्वयः**

कामः, क्रोधः तथा लोभः—इदं त्रिविधं नरकस्य द्वारम् आत्मनः नाशनम् (अस्ति)। तस्मात् एतत्त्रयं त्यजेत्।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| कामः | इच्छा | कामना | Lust |
| क्रोधः | कोप | गुस्सा | anger |
| तथा | एवं | और | also |
| लोभः | लिप्सा | लालच | greed |
| इदं त्रिविधम् | एतत् त्रिप्रकारकं | ये तीन प्रकार | this triple |
| नरकस्य | अधोलोकस्य | नरक के | of hell |
| द्वारम् | कपाटः | दरवाजा | gate |
| आत्मनः | जीवात्मनः | जीवात्मा के | of the self |
| नाशनम् | विनाशकम् | नाश करने वाला | destructive |
| तस्मात् | एतस्मात् कारणात् | इसलिये | therefore |
| एतत्त्रयं | इमानि त्रीणि | ये तीनों | These three |
| त्यजेत् | मुञ्चेत् | छोड़ दे | should a bandon |

**भावार्थः**

**संस्कृतम्** – कामः (आशा), कोपः, लोभश्च – इत्येतानि नरकस्य त्रीणि द्वाराणि जीवात्मानं नाशयन्ति। अतः मनुष्यः कामं कोपं, लोभं च परित्यजेत्।

**हिन्दी** – कामना (आशा) क्रोध तथा लालच – ये नरक के तीन द्वार कहे गये हैं; जो जीवात्मा को नष्ट कर देते हैं। इसलिये मनुष्य को इन कामना, क्रोध और लोभों का त्याग कर देना चाहिए।

**आंग्लम्** – Triple is this gate of hell destructive of the self - lust, anger and greed. Therefore should one abandon these three.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

नरकस्येदम् – नरकस्य + इदम् (गुणसन्धिः)

क्रोधस्तथा – क्रोधः + तथा (विसर्गसन्धिः)

लोभस्तस्मादेतत्त्रयम् – लोभः + तस्मात् + एतत्त्रयम्

(विसर्गसन्धिः) (जश्त्वसन्धिः)

(ख) **समासः**

त्रिविधम् – त्रयः विधाः यस्य तत् (बहुव्रीहिः)

(ग) **कृदन्तः**

नरकस्य – नृ + वुन् = नरकः

नाशनम् – नश् + णिच् + ल्युट्

कामः – कम् + घञ्

लोभः – लुभ् + घञ्

आत्मनः – अत + मनिन् = आत्मन्

(घ) **तद्धितान्तः**

तथा – तत् + थाल् (प्रकारार्थे)

त्रयम् – त्रि + ड्रिः = त्रिः

(ङ) **कारकम्**

कर्मणि षष्ठी – आत्मनः नाशनम्

(च) **व्युत्पत्तिः**

नरकम् – नृणाति क्लेशं नयति इति नरकम्।

www.thearyasamaj.org


## अभ्यासः - 50

### श्लोकः - 59

1. **श्लोकस्य पदच्छेदं कुरुत–**

[श्लोक का पदच्छेद करें। Split the words of the verse.]

-----------------------------------------------------------

-----------------------------------------------------------

2. **कोष्ठके प्रदत्तैः पदैः वाक्यानि रचयत–**

[कोष्ठक में प्रदत्त पदों से वाक्य बनाएँ। Make sentence with the words given in the box.]

| | | | |
|---|---|---|---|
| कामः<br>क्रोधः<br>लोभः | नरकस्य<br>आत्मनः | द्वारम्<br>नाशनम् | अस्ति |

**यथा–** (क) **कामः नरकस्य द्वारम् अस्ति।**

(ख) -----------------------------------------------------------

(ग) -----------------------------------------------------------

(घ) **कामः आत्मनः नाशनम् अस्ति।**

(ङ) -----------------------------------------------------------

(च) -----------------------------------------------------------

3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

(क) नरकस्येदम् = **नरकस्य** + **इदम्**

(ख) तस्येदम् = ------------ + ------------

(ग) ममेदम् = ------------ + ------------

(घ) महेन्द्रः = ------------ + ------------

(ङ) गजेन्द्रः = ------------ + ------------

(च) सुरेशः = ------------ + ------------

(छ) दिनेशः = ------------ + ------------

(ज) राकेशः = ------------ + ------------

www.thearyasamaj.org


4. **उत्तरं लिखत–**

[उत्तर लिखें। Answer the questions.]

(क) नरकस्य द्वारं कतिविधम्? --------------------------------

(ख) मानवः नरकस्य द्वारं किं कुर्यात्? --------------------------------

(ग) क्रोधः कस्य नाशनम्? --------------------------------

(घ) नरकस्य द्वाराणि कानि सन्ति? --------------------------------

5. **उचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) कामः | (i) ल्युट् |
| (ख) आत्मनः | (ii) थाल् |
| (ग) नाशनम् | (iii) घञ् |
| (घ) नरकस्य | (iv) मनिण् |
| (ङ) तथा | (v) वुन् |

6. **उचितपदेन योजयत–**

[सही पद से मिलायें। Match with appropriate word.]

| | |
|---|---|
| (क) क्रोधः | (i) इच्छा |
| (ख) त्यजेत् | (ii) एतत् |
| (ग) कामः | (iii) कोपः |
| (घ) इदम् | (iv) विनाशकम् |
| (ङ) नाशनम् | (v) मुञ्चेत् |

www.thearyasamaj.org


**श्लोकः**

**यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।**
**न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥60॥** (भ.गी. 16.23)

**पदच्छेदः**

यः शास्त्र-विधिम् उत्-सृज्य वर्तते काम-कारतः।
न सः सिद्धिम् अवाप्नोति न सुखम् न पराम् गतिम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यः | यद्–द. (सर्व.) पुं. प्र. एक. | सिद्धिम् | इ. स्त्री. द्विती. एक. |
| शास्त्रविधिम् | इ. पुं. द्विती. एक. समस्तम् | अवाप्नोति | अव + आप्–कर्तरि |
| उत्सृज्य | ल्यबन्तम् अव्ययम् | | लट् प्रपु. एक. |
| वर्तते | वृत्–कर्तरि आत्मनेपदे | न | अव्ययम् |
| | लट् प्रपु. एक. | सुखम् | अ. नपुं. द्विती. एक. |
| कामकारतः | तद्धितान्तम् अव्ययम् | न | अव्ययम् |
| न | अव्ययम् | पराम् | परा–आ. (सर्व.) |
| सः | तद्–द. (सर्व) | | स्त्री. द्विती. एक. |
| | पुं. प्र. एक. | गतिम् | इ. स्त्री. द्विती. एक. |

**आकाङ्क्षा**

**वर्तते।**

क: वर्तते? — यः वर्तते।

यः किं कृत्वा वर्तते? — यः उत्सृज्य वर्तते।

किम् उत्सृज्य वर्तते? — शास्त्रविधिम् उत्सृज्य वर्तते।

शास्त्रविधिम् उत्सृज्य कथं वर्तते? — शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते।

**न अवाप्नोति।**

कः न अवाप्नोति? — सः (यः शास्त्रविधिमुत्सृज्य कामकारतः वर्तते सः) न अवाप्नोति।

किं न अवाप्नोति? — सिद्धिं न अवाप्नोति।

पुनश्च किं न अवाप्नोति? — सुखं न अवाप्नोति।

www.thearyasamaj.org



पुनश्च किं न अवाप्नोति? गतिं न अवाप्नोति।
कीदृशीं गतिम् न अवाप्नोति? परां गतिं न अवाप्नोति।

## अन्वयः

यः शास्त्रविधिम् उत्सृज्य कामकारतः वर्तते, सः न सिद्धिम्, न सुखं, न परां गतिम् अवाप्नोति।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यः | मनुष्यः | जो मनुष्य | The person who |
| शास्त्रविधिम् | शास्त्रोक्तं विधानं | शास्त्रोक्त विधि को | the ordinance of the scripturs |
| उत्सृज्य | विहाय | छोड़कर | having left |
| कामकारतः | कामाचारेण | अपनी मनमर्जी से | under the impulse of desire |
| वर्तते | प्रवर्तते | आचरण करता है | acts |
| सः | पूर्वोक्तः मनुष्यः | वह मनुष्य | he |
| सिद्धिम् | (अन्तःकरणशुद्धिरूपां) सिद्धिम् | (अन्तःकरण की शुद्धिरूप) सिद्धि को | perfection |
| सुखं | सुखम् | सुख को | happiness |
| परां गतिम् | परमं पदं (स्वर्गं मोक्षं वा) | परम पद को | supreme |
| न अवाप्नोति | न लभते | नहीं प्राप्त करता है | not achieve the goal |

## भावार्थः

**संस्कृतम्** – यः मनुष्यः शास्त्रेषु वर्णितविधिनिषेधाख्यमुत्सृज्य स्वच्छन्दतया आचरणं करोति, सः मनुष्यः न अन्तःकरणस्य शुद्धिरूपिणीं सिद्धिं, सुखं, परमं पदं वा प्राप्नोति।

**हिन्दी** – जो मनुष्य शास्त्र द्वारा प्रतिपादित विधि को छोड़कर अपनी मनमर्जी से आचरण करता है, उसे न तो अन्तःकरण की शुद्धिरूप सिद्धि, न ही सुख और न परम पद प्राप्त होता है।

**आंग्लम्** – He who casting aside the ordinances of the scriptures acts on the impulse of desire attains not perfection nor happiness nor the supreme goal.

www.thearyasamaj.org



## निदर्शनम्

(i) व्याकरणम्

**(क) सन्धिः**

| | | |
|---|---|---|
| स सिद्धिम् | – | सः + सिद्धिम् (विसर्गसन्धिः) |

**(ख) समासः**

| | | |
|---|---|---|
| शास्त्रविधिम् | – | शास्त्रेण विधिः (तृतीयातत्पुरुषः) तम् |
| कामकारः | – | कामं करोति इति कामकारः (उपपदतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| शास्त्र | – | शास् + ष्ट्रन् |
| उत्सृज्य | – | उत् + सृज् + ल्यप् |
| सिद्धिम् | – | सिध् + क्तिन् = सिद्धि |
| गतिम् | – | गम् + क्तिन् = गति |
| सुखम् | – | सुख् + अच् = सुख |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| कामकारतः | – | कामकार + तस् |

**(ङ) व्युत्पत्तिः**

| | | |
|---|---|---|
| शास्त्रम् | – | शिष्यते अनेन इति शास्त्रम् |

---

## अभ्यासः - 51

### श्लोकः - 60

1. **श्लोकस्थ–स्त्रीलिङ्गपदानां विश्लेषणं कुरुत–**

[श्लोकस्थ स्त्रीलिङ्ग पदों का विश्लेषण करें। Write the analysis of the feminist words in the verse.]

--------------- ----------------------------------------

--------------- ----------------------------------------

--------------- ----------------------------------------

www.thearyasamaj.org



2. **अन्वयं पूरयत–**

[अन्वय की पूर्ति करें। Complete the construction.]

यः -------------- -------- -------------- वर्तते, सः ---- ----------, न -----------, ---- परां --------- अवाप्नोति।

3. **प्रकृति-प्रत्ययं च पृथक्कुरुत–**

[प्रकृति-प्रत्यय का विश्लेषण करें। Split the base and the suffix.]

**यथा–** (क) उत्सृज्य = **उत् + सृज् + ल्यप्**

(ख) निहत्य = ---------------------------

(ग) प्रविश्य = ---------------------------

(घ) प्रस्तुत्य = ---------------------------

(ङ) सम्प्रदाय = ---------------------------

4. **उचितं योजयत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) उत्सृज्य | (i) सिद्धिम् |
| (ख) वर्तते | (ii) शास्त्रविधिम् |
| (ग) अवाप्नोति | (iii) कामकारतः |

5. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the verse.]

(क) शास्त्रविधेः उत्सर्जकः ------------------ न अवाप्नोति।

(ख) शास्त्रविधेः उत्सर्जकः ------------------ न अवाप्नोति।

(ग) शास्त्रविधेः उत्सर्जकः ------------------ न अवाप्नोति।

6. **निर्देशानुसारं पूर्णं पदं लिखत–**

[निर्देश के अनुसार पूर्ण पद लिखें। Write the complete word as per direction.]

**यथा–** (क) क्तिन्नन्तं पदद्वयम् - **सिद्धिम्, गतिम्**

(ख) ल्यबन्तम् अव्ययपदम् - ----------------------------

(ग) तसिलन्तम् अव्ययपदम् - ----------------------------

(घ) द. (सर्व.) पुं. प्र. एक. (पदद्वयम्) - ------------- -------------

(ङ) इ. पुं. द्विती. एक. (समस्तपदम्) - ----------------------------

www.thearyasamaj.org



7. **सन्धिं कुरुत**

[सन्धि करें। Join the *Sandhi*.]

**यथा–** (क) सः + सिद्धिम् = **स सिद्धिम्**

(ख) सः + गच्छति = ------------------

(ग) सः + हसति = ------------------

(घ) सः + वदति = ------------------

(ङ) सः + चलति = ------------------

(च) सः + आगच्छति = ------------------

(छ) सः + एव = ------------------

(ज) सः + इति = ------------------

(झ) सः + बालः = ------------------

**यथा–** (क) सः + अस्ति = **सोऽस्ति**

(ख) सः + अपि = ------------------

(ग) सः + अगच्छत् = ------------------

(घ) सः + अधुना = ------------------

(ङ) सः + अमरः = ------------------

(च) सः + अनन्तः = ------------------

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गए शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the words given below.]

(क) उत् + सृज् (ल्यप्) (ख) वृत् (कर्तरि लट्) (ग) पर (घ) तद् (पुं.)

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।**
**ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥61॥** (भ.गी. 16.24)

## पदच्छेदः

तस्मात् शास्त्रम् प्रमाणम् ते कार्य-अकार्य-व्यवस्थितौ।
ज्ञात्वा शास्त्र-विधान-उक्तम् कर्म कर्तुम् इह अर्हसि॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| तस्मात् | तद्–द. (सर्व) नपुं. पं. एक. | ज्ञात्वा | क्त्वान्तम् अव्ययम् |
| शास्त्रम् | अ. नपुं. प्र. एक. | शास्त्रविधानोक्तम् | अ. नपुं. द्विती. एक. |
| प्रमाणम् | अ. नपुं. प्र. एक. | | समस्तम् |
| ते | युष्मद्–द. (सर्व.) त्रि. | कर्म | कर्मन्–न. नपुं. द्विती. एक. |
| | षष्ठी.एक.(वैकल्पिकं रूपम्) | कर्तुम् | तुमुन्नन्तम् अव्ययम् |
| कार्याकार्य- | इ. स्त्री. सप्त. एक. | इह | तद्धितान्तम् अव्ययम् |
| व्यवस्थितौ | समस्तम् | अर्हसि | अर्ह्–कर्तरि लट् मपु. एक. |

## आकाङ्क्षा

**प्रमाणम् ( भवति )।**

| | |
|---|---|
| किं प्रमाणम् (भवति)? | शास्त्रं प्रमाणं (भवति)। |
| कुत्र शास्त्रं प्रमाणम्? | इह शास्त्रं प्रमाणम्। |
| इह कुत्र शास्त्रं प्रमाणम्? | इह कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणम्। |
| कस्य (कृते) कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणम्? | ते कार्याकार्यव्यवस्थितौ शास्त्र प्रमाणं भवति। |
| तस्मात् किम् अर्हसि? | तस्मात् कर्तुम् अर्हसि। |
| तस्मात् किं कर्तुम् अर्हसि? | तस्मात् कर्म कुर्तम् अर्हसि। |
| किं कृत्वा कर्म कर्तुम् अर्हसि? | ज्ञात्वा कर्म कर्तुम् अर्हसि। |
| कीदृशं कर्म ज्ञात्वा कर्तुम् अर्हसि? | शास्त्रविधानोक्तं कर्म ज्ञात्वा कर्तुम् अर्हसि। |

www.thearyasamaj.org



## अन्वयः

तस्मात् ते इह कार्याकार्यव्यवस्थितौ शास्त्रं प्रमाणं (भवति), शास्त्रविधानोक्तं कर्म ज्ञात्वा कर्तुम् अर्हसि।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| तस्मात् | तस्मात् कारणात् | इसलिए | Therefore |
| ते | तव | तुम्हारे लिये | they |
| इह | लोके | संसार में | here |
| कार्याकार्य-व्यवस्थितौ | कर्तव्य-अकर्तव्यव्यव-स्थायाम् | कर्तव्य व अकर्तव्य की व्यवस्था में | what ought to be done what ought not to be done |
| शास्त्रम् | शास्त्रम् | शास्त्र को | *Śāstra* |
| प्रमाणं भवति | ज्ञानसाधनं भवति | प्रमाण होता है | authority |
| शास्त्रविधा-नोक्तम् | शास्त्रेषु बोधित-विध्यनुसारम् | शास्त्रीय विधि के अनुसार | said in the ordi-nance of the *Śāstra* |
| कर्म | नियतं कर्तव्यं | नियत कर्तव्य को | action |
| ज्ञात्वा | अवबुध्य | समझकर | having known |
| कर्तुम् अर्हसि | अनुष्ठातुं प्रभवसि | सम्पादित करने योग्य हैं | shouldst |

## भावार्थः

**संस्कृतम्** – शास्त्रविधिमुत्सृज्य लोके स्वेच्छया कर्माणि न कर्तव्यानि, किं कर्तव्यम्? किमकर्तव्यम्? इति संशये, शास्त्रबोधितनिर्णयानुसारेण कर्माणि कर्तुं शक्नोषि।

**हिन्दी** – शास्त्र विधि के त्याग के कारण असिद्धि होती है, अतः कर्तव्य व अकर्तव्य की व्यवस्था में तुम्हारे लिये शास्त्रीय नियम ही प्रमाण हैं–ऐसा समझकर तुम इस संसार में शास्त्रीय विधि के अनुसार नियत कर्तव्यों को कर सकते हो।

**आंग्लम्** – Having known what is said in the ordinance of the scriptures you should act here. Therefore let the scriptures by your authourity in deciding what ought to be done and what ought not to be done.

www.thearyasamaj.org



## निदर्शनम्

**(i) व्याकरणम्**

**( क ) सन्धिः**

| | | |
|---|---|---|
| तस्माच्छास्त्रम् | – | तस्मात् + शास्त्रम् (श्चुत्वसन्धिः) |
| शास्त्रविधानोक्तम् | – | शास्त्रविधान + उक्तम् (गुणसन्धिः) |
| इहार्हसि | – | इह + अर्हसि (दीर्घसन्धिः) |

**( ख ) समासः**

| | | |
|---|---|---|
| कार्याकार्यव्यवस्थितौ | – | न कार्यम् अकार्यम् (नञ् तत्पुरुषः)<br>कार्यं च अकार्यं च कार्याकार्ये (द्वन्द्वः)<br>कार्याकार्ययोः व्यवस्थितिः (षष्ठीतत्पुरुषः) तस्याम् |
| शास्त्रविधानोक्तम् | – | शास्त्रेण विधानम् शास्त्रविधानम् (तृतीयातत्पुरुषः)<br>शास्त्रविधानेन उक्तम् (तृतीयातत्पुरुषः) |

**( ग ) कृदन्तः**

| | | |
|---|---|---|
| प्रमाणम् | – | प्र + मा + ल्युट् |
| कार्य | – | कृ + ण्यत् |
| व्यवस्थितौ | – | वि + अव + स्था + क्तिन्–व्यवस्थितिः |
| ज्ञात्वा | – | ज्ञा + क्त्वा |
| विधान | – | वि + धा + ल्युट् |
| उक्तम् | – | (ब्रू) + क्त |
| कर्तुम् | – | कृ + तुमुन् |

---

## अभ्यासः - 52

### श्लोकः - 61

**1. यथान्वयं रिक्तस्थानं पूरयत–**

[अन्वय के अनुसार रिक्त स्थान भरें। Fill in the blanks as per the construction of the verse.]

तस्मात् ------ --------------- शास्त्रं ------------ ------, इह

----------------------------- ------ ज्ञात्वा कर्तुम् --------।

www.thearyasamaj.org



2. **उत्तरं प्रदत्त–**

[उत्तर दें। Answer the questions.]

(क) श्लोके प्रमाणं किम् उक्तम्? ------------------------------

(ख) शास्त्रं कुत्र प्रमाणम्? ------------------------------

(ग) कीदृशं कर्म कर्तुं योग्यम्? ------------------------------

(घ) किं ज्ञात्वा कर्म करणीयम्? ------------------------------

3. **सत्यम् ☑ असत्यं ☒ वा लिखत–**

[सत्य ☑ या असत्य ☒ लिखें। Write true ☑ or false ☒.]

(क) शास्त्रं केवलं कार्यव्यवस्थितौ प्रमाणं भवति। ☐

(ख) अकार्यस्य व्यवस्थितिः स्वबुद्ध्या करणीया। ☐

(ग) सर्वैः शास्त्रविधानोक्तं कर्म करणीयम्। ☐

(घ) अकार्यव्यवस्थितौ अपि शास्त्रं प्रमाणं भवति। ☐

4. **उचितेन पदेन योजयत–**

[उचित पद से मिलाएँ। Match with the appropriate word.]

| | |
|---|---|
| (क) ज्ञात्वा | (i) साक्ष्यम् |
| (ख) इह | (ii) प्रभवसि |
| (ग) कर्म | (iii) अवबुध्य |
| (घ) प्रमाणम् | (iv) लोके |
| (ङ) अर्हसि | (v) कर्तव्यम् |

5. **निम्नलिखत-धातूनां त्रिषु लिङ्गेषु क्तप्रत्ययान्तं रूपं लिखत–**

[निम्नलिखित धातुओं का तीनों लिङ्गों में क्तप्रत्ययान्त रूप लिखें। Write the forms ending in *Kta* in all the three genders of the following words.]

| | | | पुं. | स्त्री. | नपुं. |
|---|---|---|---|---|---|
| यथा– | (क) ब्रू | - | **उक्तः** | **उक्ता** | **उक्तम्** |
| | (ख) स्था | - | ------------ | ------------ | ------------ |
| | (ग) ज्ञा | - | ------------ | ------------ | ------------ |
| | (घ) भू | - | ------------ | ------------ | ------------ |
| | (ङ) तप् | - | ------------ | ------------ | ------------ |
| | (च) युज् | - | ------------ | ------------ | ------------ |

www.thearyasamaj.org


(छ) अनु + इ - ------------ ------------ ------------

(ज) कृ - ------------ ------------ ------------

(झ) हृ - ------------ ------------ ------------

(ञ) दृश् - ------------ ------------ ------------

6. **समस्तपदानां सन्धिविच्छेदं कृत्वा विग्रहं लिखत–**

[समस्त पदों के सन्धि विच्छेद करके विग्रह लिखें। Disjoin the *Sandhi* of the compound word and write the analytical sentence.]

[A]

**यथा–** (क) कार्याकार्ये - **कार्य + अकार्ये** **कार्यं च अकार्यं च**

(ख) लाभालाभौ - ------------------ ------------------------

(ग) जयाजयौ - ------------------ ------------------------

(घ) सुखासुखे - ------------------ ------------------------

[B]

**यथा–** (क) विधानोक्तम् - **विधान + उक्तम्** **विधानेन उक्तम्**

(ख) रागोक्तम् - ------------------ ------------------------

(ग) प्रसादोक्तम् - ------------------ ------------------------

(घ) प्रमादोक्तम् - ------------------ ------------------------

www.thearyasamaj.org

# सप्तदशोऽध्यायः

**श्लोकः**

**अशास्त्रविहितं घोरं तप्यन्ते ये तपो जनाः ।**
**दम्भाहङ्कारसंयुक्ताः कामरागबलान्विताः ॥62॥**
**कर्शयन्तः शरीरस्थं भूतग्राममचेतसः ।**
**मां चैवान्तश्शरीरस्थं तान्विद्ध्यासुरनिश्चयान् ॥63॥** (भ.गी. 17.5, 6)

**पदच्छेदः**

अ–शास्त्र–विहितम् घोरम् तप्यन्ते ये तपः जनाः।
दम्भ-अहङ्कार-संयुक्ताः काम-राग-बलान्विताः॥
कर्शयन्तः शरीरस्थम् भूत-ग्रामम् अ-चेतसः।
माम् च एव अन्तःशरीरस्थम् तान् विद्धि आसुर-निश्चयान्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अशास्त्रविहितम् | अ. नपुं. द्विती. एक. समस्तम् | भूतग्रामम् | अ. पुं. द्विती. एक. समस्तम् |
| घोरम् | अ. नपुं. द्विती. एक. | अचेतसः | अचेतस्–स.पुं.प्र.बहु. समस्तम् |
| तप्यन्ते | तप्–कर्तरि आत्मनेपदे लट् प्रपु. बहु. | माम् | अस्मद्–द. (सर्व.) त्रि. द्विती. एक. |
| ये | यद्–द. (सर्व.) पुं. प्र. बहु. | च | अव्ययम् |
| तपः | तपस्–स. नपुं. द्विती. एक. | एव | अव्ययम् |
| जनाः | अ. पुं. प्र. बहु. | अन्तःशरीरस्थम् | अ. पुं. द्विती. एक. समस्तम् |
| दम्भाहङ्कारसंयुक्ताः | अ. पुं. प्र. बहु. समस्तम् | तान् | तद्–द.(सर्व.) पुं. द्विती. बहु. |
| कामरागबलान्विताः | अ. पुं. प्र. बहु. समस्तम् | विद्धि | विद्–कर्तरि लोट् मपु. एक. |
| कर्शयन्तः | कर्शयत्–त. पुं. प्र. बहु. | आसुरनिश्चयान् | अ. पुं. द्विती. बहु. |
| शरीरस्थम् | अ.पुं. द्विती. एक. समस्तम् | | |

**आकाङ्क्षा**

**विद्धि।**

| | |
|---|---|
| कान् विद्धि? | तान् विद्धि। |
| तान् कथम्भूतान् विद्धि? | तान् आसुरनिश्चयान् विद्धि। |
| कान् तान् आसुरनिश्चयान् विद्धि? | ये तप्यन्ते। |

www.thearyasamaj.org


| | |
|---|---|
| ये के? | ये जनाः। |
| पुनश्च के जनाः? | ये दम्भाहङ्कारसंयुक्ताः। |
| पुनश्च के जनाः? | ये कामरागबलान्विताः। |
| पुनश्च के जनाः? | ये अचेतसः। |
| ये जनाः किं तप्यन्ते? | ये जनाः तपः तप्यन्ते। |
| कीदृशं तपः तप्यन्ते? | घोरं तपः तप्यन्ते। |
| पुनश्च कीदृशं तपः तप्यन्ते? | अशास्त्रविहितं तपः तप्यन्ते। |
| किं कुर्वन्तः तपः तप्यन्ते? | कर्शयन्तः। |
| कम् कर्शयन्तः? | भूतग्रामं कर्शयन्तः। |
| कुत्रस्थं भूतग्रामं कर्शयन्तः? | शरीरस्थं भूतग्रामं कर्शयन्तः। |
| कं चैव कर्शयन्तः? | मां चैव कर्शयन्तः? |
| कुत्रस्थं मां चैव कर्शयन्तः ये जनाः तपः तप्यन्ते? | अन्तःशरीरस्थं मां कर्शयन्तः ये जनाः तपः तप्यन्ते। |

**अन्वयः**

ये जनाः दम्भाहङ्कारसंयुक्ताः, कामरागबलान्विताः, अचेतसः शरीरस्थं भूतग्रामम्, अन्तःशरीरस्थं मां चैव कर्शयन्तः, अशास्त्रविहितं घोरं तपः तप्यन्ते, तान् आसुरनिश्चयान् विद्धि।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| ये जनाः | ये पुरुषाः | जो लोग | those persons |
| दम्भाहङ्कार-संयुक्ताः | आडम्बरेण-अहं भावेन च युक्ताः | आडम्बर व घमण्ड से युक्त | given to ostentation and pride |
| कामराग-बलान्विताः | भोगेन, आसक्त्या-हठेन च युक्ताः | भोग, आसक्ति व हठ से युक्त | impelled by the strength of lust and attachment |
| अचेतसः | अविवेकिनः | चित्तविहीन (चेतनाशून्य) | being non-discriminating |
| शरीरस्थम् | देहस्थितम् | देह में स्थित | in the body |
| भूतग्रामम् | पञ्चभूतानां समूहम् | पाँचों भूतों को | all elements |
| अन्तःशरीरस्थम् | अन्तःकरणे स्थितम् | अन्तःकरण में स्थित | who dwells in the body |

www.thearyasamaj.org


| | | | |
|---|---|---|---|
| माम् चैव | परमात्मानं माम् अपि | मुझ परमात्मा को भी | even me |
| कर्शयन्तः | कृशं कुर्वन्तः | कृश करते हुए | torturing |
| अशास्त्रविहितं | शास्त्रविधिरहितं | शास्त्रविधि के विपरीत | not enjoined by the scripture |
| घोरम् | भीषणम् | भीषण | terrific |
| तपः तप्यन्ते | तपः कुर्वन्ति | तपस्या करते हैं | practice of austerity |
| तान् | जनान् | उन लोगों को | them |
| आसुरनिश्चयान् | आसुरीसम्पदायुक्तान् | आसुरी सम्पदा से युक्त | to be of demoniac resolve |
| विद्धि | जानीहि | समझो | know |

## भावार्थः

**संस्कृतम्** – ये पुरुषाः आडम्बरेण अहम्भावेन च युक्ताः सन्ति, ये भोगैः, आसक्त्या हठेन च युक्ताः सन्ति, ये चेतनाशून्याः सन्तः देहस्थितानि पञ्चभूतानि, अन्तःकरणे च स्थितं परमात्मानम् अपि कृशं कुर्वन्तः शास्त्रविधिरहितां घोरां तपस्यां कुर्वन्ति, ते पुरुषाः आसुरीसम्पदायुक्ताः भवन्ति।

**हिन्दी** – जो लोग आडम्बर तथा अहम्भाव से युक्त हैं, जो भोगों, आसक्ति तथा हठ से युक्त हैं, जो चेतनाशून्य होकर देह में स्थित पाँचों भूतों को तथा अन्तःकरण में स्थित परमात्मा को भी कृश करने वाले हैं, वे लोग आसुरी सम्पदा से युक्त होते हैं।

**आंग्लम्** – Those men who practise violent austerities not enjoined by the scriptures given to hypocrisy and egoism impelled by the force of lust and attachment fools that they are torture their bodily organs and me too who dwell with in the body know that they are *Āusurika* in their resolve.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

तपो जनाः – तपः + जनाः (विसर्गसन्धिः)

चैवान्तःशरीरस्थम् – च + एव + अन्तःशरीरस्थम्

(च + एव: वृद्धिसन्धिः) (एव + अन्तःशरीरस्थम्: दीर्घसन्धिः)

www.thearyasamaj.org



| | | |
|---|---|---|
| विद्ध्यासुरनिश्चयान् | – | विद्धि + आसुरनिश्चयान् (यण्सन्धिः) |

**( ख ) समासः**

| | | |
|---|---|---|
| अशास्त्रविहितम् | – | शास्त्रे विहितम् शास्त्रविहितम् (सप्तमीतत्पुरुषः) न शास्त्रविहितम् (नञ् तत्पुरुषः) |
| दम्भाहङ्कारसंयुक्ताः | – | दम्भश्च अहङ्कारश्च दम्भाहङ्कारौ (द्वन्द्वः) दम्भाहङ्काराभ्यां संयुक्तः दम्भाहङ्कारसंयुक्तः (तृतीयातत्पुरुषः) ते |
| कामरागबलान्विताः | – | कामश्च रागश्च कामरागौ (द्वन्द्वः) कामरागाभ्यां (कृतं) बलम् = कामरागबलम्, कामरागबलेन अन्वितः कामरागबलान्वितः (तृतीयातत्पुरुषः) ते |
| शरीरस्थम् | – | शरीरे तिष्ठति इति शरीरस्थः (उपपदतत्पुरुषः) तम् |
| भूतग्रामम् | – | भूतानां ग्रामः भूतग्रामः (षष्ठीतत्पुरुषः) तम् |
| अचेतसः | – | अविद्यमानं चेतः यस्य सः, अचेताः (बहुव्रीहिः) ते |
| अन्तःशरीरस्थम् | – | अन्तश्शरीरे तिष्ठति, अन्तश्शरीरस्थः (उपपदसमासः) तम् |
| आसुरनिश्चयान् | – | आसुरः निश्चयः येषां ते, आसुरनिश्चयाः (बहुव्रीहिः)तान् |

**( ग ) कृदन्तः**

| | | |
|---|---|---|
| अशास्त्र | – | अ–शस् + ष्ट्रन् |
| विहितम् | – | वि + धा + क्त |
| घोरम् | – | घुर् + अच् - घोर |
| तपः | – | तप् + असुन् - तपस् |
| जनाः | – | जन् + अच् - जन |
| संयुक्ताः | – | सम् + युज् + क्त |
| काम | – | कम् + घञ् |
| बल | – | बल् + अच् |
| अन्विताः | – | अनु + इ + क्त |
| कर्शयन्तः | – | कृश् + णिच् + शतृ - कर्शयत् |
| ग्राम | – | ग्रस् + मन् |

www.thearyasamaj.org



निश्चयान् - निस् + चि + अप्

**(घ) तद्धितान्तः**

आसुर - असुर + अण्

**अवधेयम्**

**तृतीयातत्पुरुषविषये**

## अभ्यासः - 53

### श्लोकः - 62, 63

1. **श्लोकस्थं विशेषण-विशेष्यभावं सूचयत–**

[श्लोकस्थ विशेषण-विशेष्यभाव सम्बन्ध बताएँ। Point out the relationship between the qualifier and qualified words from the verses.]

-------------------- --------------------

-------------------- --------------------

-------------------- --------------------

-------------------- --------------------

-------------------- --------------------

2. **शब्दार्थयोः मेलनं कुरुत–**

[शब्दार्थ को जोड़ें। Match with the word meaning.]

| | |
|---|---|
| (क) घोरम् | (i) चित्तविहीनाः |
| (ख) कर्शयन्तः | (ii) भूतसमूहम् |
| (ग) अचेतसः | (iii) भीषणम् |
| (घ) विद्धि | (iv) कृशं कुर्वन्तः |
| (ङ) भूतग्रामम् | (v) जानीहि |

www.thearyasamaj.org



3. **निर्देशानुसारं श्लोकात् पदानि चिनुत–**

[निर्देश के अनुसार श्लोक से पद चुनें। Compile the words from the verse.]

| | | | |
|---|---|---|---|
| **यथा–** | (क) अ. नपुं. द्विती. एक. समस्तम् | – | **अशास्त्रविहितम्** |
| | (ख) अ. नपुं. द्विती. एक. असमस्तम् | – | --------------- |
| | (ग) त. पुं. प्र. बहु. | – | --------------- |
| | (घ) विद्–कर्तरि लोट् मपु. एक. | – | --------------- |
| | (ङ) द. (सर्व.) पुं. द्विती. एक. | – | --------------- |
| | (च) अ. पुं. द्विती. बहु. | – | --------------- |

4. **विग्रहवाक्यं लिखत–**

[विग्रह वाक्य लिखें। Write the analytical sentences.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** | (क) अहङ्कारसंयुक्ताः | = | **अहङ्कारेण** | **संयुक्तः** | **ते** |
| | (ख) दम्भसंयुक्ताः | = | --------- | --------- | --------- |
| | (ग) मोहसंयुक्ताः | = | --------- | --------- | --------- |
| | (घ) क्रोधसंयुक्ताः | = | --------- | --------- | --------- |
| | (ङ) भ्रमसंयुक्ताः | = | --------- | --------- | --------- |
| | (च) बलान्विताः | = | **बलेन** | **अन्वितः** | **ते** |
| | (छ) रागान्विताः | = | --------- | --------- | --------- |
| | (ज) कामान्विताः | = | --------- | --------- | --------- |
| | (झ) रोगान्विताः | = | --------- | --------- | --------- |
| | (ञ) भोगान्विताः | = | --------- | --------- | --------- |

5. **श्लोकम् आधृत्य उत्तरं लिखत–**

[श्लोक के आधार पर उत्तर दें। Answer on the basis of the verse.]

(i) श्लोके 'अशास्त्रविहितम्' कस्य विशेषणम्? ------------------------

(ii) अशास्त्रविहितं तपः कीदृशाः जनाः तप्यन्ते? ------------------------

(iii) 'अचेतसः' इति कस्य विशेषणम्? ------------------------

(iv) अचेतसः कं कर्शयन्ति? ------------------------

(v) अन्तःशरीरे कः तिष्ठति? ------------------------

www.thearyasamaj.org



6. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| | | | | | | | **एक.** | **बहु.** |
| **यथा–** | (क) | **कृश्** | + **णिच्** + | **शतृ (पुं.)** | - | | **कर्शयन्** | **कर्शयन्तः** |
| | (ख) | कृष् | + णिच् + | शतृ (पुं.) | - | | --------- | --------- |
| | (ग) | --- | + --- + | ----- | - | | दर्शयन् | दर्शयन्तः |
| | (घ) | पठ् | + णिच् + | ------ | - | | पाठयन् | --------- |
| | (ङ) | चल् | + णिच् + | शतृ (पुं.) | - | | --------- | --------- |
| | (च) | पा | + णिच् + | शतृ (पुं.) | - | | --------- | पाययन्तः |
| | (छ) | दा | + --- + | ------- | - | | दापयन् | --------- |

7. **वाक्यानि रचयत–**

[वाक्य बनाएँ। Make Sentences.]

| | | | |
|---|---|---|---|
| रागेण<br>दम्भेन<br>अशास्त्रविहितं<br>शरीरस्थं<br>कामेन | तपः तप्यन्तः<br>भूतग्रामं कर्शयन्तः<br>संयुक्ताः<br>अन्विताः | आसुरनिश्चयाः | सन्ति |

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

--------------------------------------------------------------------

www.thearyasamaj.org


श्लोकः

**आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रियः ।**
**यज्ञस्तपस्तथा दानं तेषां भेदमिमं शृणु ॥64॥** (भ.गी. 17.7)

पदच्छेदः

आहारः तु अपि सर्वस्य त्रि-विधः भवति प्रियः।
यज्ञः तपः तथा दानम् तेषाम् भेदम् इमम् शृणु॥

पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| आहारः | अ. पुं. प्र. एक. | तपः | तपस्–स. नपुं. प्र. एक. |
| तु | अव्ययम् | तथा | तद्धितान्तम् अव्ययम् |
| अपि | अव्ययम् | दानम् | अ. नपुं. प्र. एक. |
| सर्वस्य | अ.(सर्व.)पुं. षष्ठी. एक. | तेषाम् | तद्–द.(सर्व.)पुं. षष्ठी. बहु. |
| त्रिविधः | अ. पुं. प्र. एक. | भेदम् | अ. पुं. द्विती. एक. |
| प्रियः | अ. पुं. प्र. एक. | इमम् | इदम्–म.(सर्व.) द्विती. एक. |
| यज्ञः | अ. पुं. प्र. एक. | शृणु | श्रु–कर्तरि लोट् मपु. एक. |

आकाङ्क्षा

**भवति।**

| | |
|---|---|
| कतिविधः भवति? | त्रिविधः भवति। |
| कः त्रिविधः भवति? | आहारः त्रिविधः भवति। |
| कस्य आहारः त्रिविधः भवति? | सर्वस्य आहारः त्रिविधः भवति। |
| सर्वस्य कीदृशः आहारः त्रिविधः भवति? | सर्वस्य प्रियः आहारः त्रिविधः भवति। |
| अपि च कः (त्रिविधः भवति)? | यज्ञः त्रिविधः भवति। |
| पुनश्च किं (त्रिविधं भवति)? | तपः (त्रिविधं भवति)। |
| पुनश्च किं (त्रिविधं भवति)? | दानं त्रिविधं भवति। |

**शृणु।**

| | |
|---|---|
| कं शृणु? | इमं भेदं शृणु। |
| केषाम् इमं भेदं शृणु? | तेषाम् इमं भेदं शृणु। |
| (ते के) तानि कानि येषां भेदं शृणु? | आहारः, यज्ञः, तपः तथा दानम्। |

अन्वयः–

सर्वस्य त्रिविधः आहारः तु अपि प्रियः भवति, यज्ञः, तपः तथा दानं (च त्रिविधम्), तेषाम् इमं भेदं शृणु।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| सर्वस्य | प्रत्येकजनस्य | प्रत्येक व्यक्ति को | of all |
| त्रिविधः | त्रिप्रकारकः | तीन प्रकार का | three fold |
| आहारः तु अपि | भोजनादिकमपि | भोजन | the food |
| प्रियः | अभीष्टः | प्रिय (रुचिकर) | dear |
| भवति | जायते | होता है | is |
| यज्ञः | यागः | यज्ञ | sacrifice |
| तपः | तपस्या | तपस्या | austerity |
| तथा दानम् | अर्पणं च | और दान | and charity |
| तेषाम् | यज्ञ-तपो-दानानाम् | उन यज्ञ, तप और दान के | their |
| इमं भेदं | एनं रहस्यम् | इस भेद को | distinction |
| शृणु | आकर्णय | सुनो | hear |

**भावार्थः**

**संस्कृतम्** – भोजनम् अपि प्रत्येकजनस्य त्रिप्रकारकं रुचिकरं भवति। तथैव यज्ञः, तपस्या, दानं चापि त्रिप्रकारकम्, तेषां इमं रहस्यं सम्प्रति त्वं आकर्णय।

**हिन्दी** – भोजन भी प्रत्येक व्यक्ति को तीन प्रकार का रुचिकर होने से प्रिय होता है। इसी प्रकार यज्ञ, तप और दान भी तीन प्रकार का ही रुचिकर होता है, उनका यह भेद अब तुम सुनो।

**आंग्लम्** – The food also that is dear to all is of three kinds. So are the *Yajñas,* austerities and gifts. Hear now of the distinction of these.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

आहारस्त्वपि – आहारः + तु + अपि
(विसर्गसन्धिः) (यणसन्धिः)

त्रिविधो भवति – त्रिविधः + भवति (विसर्गसन्धिः)

यज्ञस्तपस्तथा – यज्ञः + तपः + तथा
(विसर्गसन्धिः)

www.thearyasamaj.org


(ख) कृदन्तः

| | | |
|---|---|---|
| आहारः | – | आ + हृ + घञ् |
| दानम् | – | दा + ल्युट् |
| भेदम् | – | भिद् + घञ् |

**अवधेयम्**

**विसर्गसन्धिविषये**

## अभ्यासः – 54
## श्लोकः – 64

1. **श्लोकम् आधृत्य उत्तरं लिखत–**

[श्लोक के आधार पर उत्तर दें। Write the answer on the basis of the verse.]

(क) श्लोकानुसारं कः प्रियः भवति? ------------------------------

(ख) कतिविधः आहारः प्रियः? ------------------------------

(ग) त्रिविधः आहारः कस्य प्रियः? ------------------------------

2. **उचितं योजयत–**

[सही जोड़ें। Match the appropriate one.]

| | |
|---|---|
| (क) द. (सर्व.) पुं. द्विती. एक. | (i) त्रिविधः |
| (ख) अ. नपुं. प्र. एक. | (ii) तपः |
| (ग) स. नपुं. प्र. एक. | (iii) शृणु |
| (घ) अ. पुं. प्र. एक. समस्तम् | (iv) दानम् |
| (ङ) कर्तरि लोट् मपु. एक. | (v) इमम् |

3. **सन्धिविच्छेदं कुरुत–**

[सन्धि-विच्छेद करें Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** (क) त्वपि | = | **तु** | + | **अपि** |
| (ख) गुर्वादेशः | = | ---------- | + | ---------- |
| (ग) मन्वन्तरम् | = | ---------- | + | ---------- |
| (घ) शृणोत्वधुना | = | ---------- | + | ---------- |

www.thearyasamaj.org


(ङ) मध्वरि = ---------- + -----------

(च) तन्वङ्गी = ---------- + -----------

4. **विशेषणं विशेष्यं वा श्लोकानुसारं लिखत–**

[श्लोक के अनुसार विशेषण या विशेष्य लिखें। Write qualifier or qualified on the basis of the verse.]

| विशेषणम् | विशेष्यम् |
|---|---|
| (क) त्रिविधः | ----------- |
| (ख) प्रियः | ---------- |
| (ग) ----------- | भेदम् |

5. **उचितं मेलनं कुरुत–**

[सही मेल करें। Match appropriately.]

| | |
|---|---|
| (क) अपि | (i) तिङन्तम् |
| (ख) दानम् | (ii) सर्वनाम |
| (ग) शृणु | (iii) अव्ययम् |
| (घ) तेषाम् | (iv) कृदन्तः |

6. **सन्धिं कृत्वा सन्धेर्नाम लिखत–**

[सन्धि करके सन्धि का नाम लिखें। Join euphonically and write the name of *Sandhi*.]

| | | | |
|---|---|---|---|
| यथा– | (क) **त्रिविधः + भवति =** | **त्रिविधो भवति** | **विसर्गसन्धिः** |
| | (ख) प्रियः + भवति = | --------------- | --------------- |
| | (ग) आहारः + तु = | --------------- | --------------- |
| | (घ) यज्ञः + तपः = | --------------- | --------------- |
| | (ङ) तपः + तथा = | --------------- | --------------- |

7. **अधः प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि पृथक् पत्रे लिखत–**

[दिये गये शब्दों के प्रयोग से कुछ वाक्य लिखें। Write some sentences using the following words.]

(क) भू (कर्तरि लट्) (ख) तु (ग) तपस् (घ) तद् (पुं.) (ङ) श्रु (कर्तरि लोट्) (च) इदम् (पुं.)

www.thearyasamaj.org


**श्लोकः**

**आयुस्सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः।**
**रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः॥65॥** (भ.गी. 17.8)

**पदच्छेदः**

आयुः-सत्त्व-बल-आरोग्य-सुख-प्रीति-विवर्धनाः।
रस्याः स्निग्धाः स्थिराः हृद्याः आहाराः सात्त्विक-प्रियाः॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| आयुस्सत्त्व-बलारोग्यसुख-प्रीतिविवर्धनाः | अ. पुं. प्र. बहु. समस्तम् विशेषणम् | स्थिराः | अ. पुं. प्र. बहु. विशेषणम् |
| | | हृद्याः | अ. पुं. प्र. बहु. विशेषणम् |
| | | आहाराः | अ. पुं. प्र. बहु. |
| रस्याः | अ. पुं. प्र. बहु. विशेषणम् | सात्त्विकप्रियाः | अ. पुं. प्र. बहु. समस्तम् |
| स्निग्धाः | अ. पुं. प्र. बहु. विशेषणम् | | |

**आकाङ्क्षा**

**सात्त्विकप्रियाः (भवन्ति)।**

| | |
|---|---|
| के सात्त्विकप्रियाः भवन्ति? | आहाराः सात्त्विकप्रियाः भवन्ति। |
| कीदृशाः आहाराः सात्त्विकप्रियाः? | आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः आहाराः सात्त्विकप्रियाः। |
| पुनश्च कीदृशाः आहाराः सात्त्विकप्रियाः? | रस्याः आहाराः सात्त्विकप्रियाः। |
| पुनश्च कीदृशाः आहाराः सात्त्विकप्रियाः? | स्निग्धाः आहाराः सात्त्विकप्रियाः। |
| पुनश्च कीदृशाः आहाराः सात्त्विकप्रियाः? | स्थिराः आहाराः सात्त्विकप्रियाः। |
| पुनश्च कीदृशाः आहाराः सात्त्विकप्रियाः? | हृद्याः आहाराः सात्त्विकप्रियाः। |

**अन्वयः**

आयुःसत्त्वबलारोग्यसुखप्रीतिविवर्धनाः, स्थिराः, हृद्याः, रस्याः, स्निग्धाः आहाराः सात्त्विकप्रियाः (भवन्ति)।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| आयुः | जीवितकालः | आयु | Life |
| सत्त्व- | सत्त्वगुणः | सत्त्वगुण | purity |
| बल- | सामर्थ्यम् | बल | strength |
| आरोग्य- | स्वास्थ्यम् | स्वास्थ्य | health |
| सुखप्रीति- विवर्धनाः | आनुकूलस्य प्रेम्णः च वर्धकाः | सुख और प्रेम को बढ़ाने वाले | joy, cheerfulness and good appetite |
| स्थिराः | अन्तर्दृढाः | स्थिर रहने वाले | substantial |
| हृद्याः | रुचिकराः | रुचिकर | agreeable |
| रस्याः | रसमयाः | रसयुक्त | things are savoury |
| स्निग्धाः | स्नेहवन्तः | चिकने | oleaginous |
| आहाराः | भोज्यपदार्थाः | भोज्य पदार्थ | the foods |
| सात्त्विकप्रियाः | सात्त्विकमनुष्यस्य प्रीतिकराः | सात्त्विक मनुष्य को प्रिय होते हैं | are dear to the *Sattvika* |

**भावार्थः**

**संस्कृतम्** – ये भोज्यपदार्थाः जीवितकालं, सत्त्वगुणं, शक्तिं, स्वास्थ्यं, सुखं, प्रेम च वर्धयन्ति ये च अन्तर्दृढाः, रुचिकराः, रसयुक्ताः, चिक्कणाश्च भवन्ति, ते भोज्यपदार्थाः सात्त्विकजनस्य प्रीतिकराः भवन्ति।

**हिन्दी** – जो भोज्य पदार्थ आयु, सत्त्वगुण, शक्ति, स्वास्थ्य, सुख और प्रेम को बढ़ाते हैं तथा जो स्थिर रहने वाले, रुचिकर, रसयुक्त और चिकने होते हैं। वे भोज्य पदार्थ सात्त्विक व्यक्ति को प्रिय होते हैं।

**आंग्लम्** – The foods that augment vitality energy, vigour, health, joy and cheerfulness which are savoury and oleaginous substantial and agreeable are liked by the *sāttvika*.

## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

बलारोग्य – बल + आरोग्य (दीर्घसन्धिः)

स्थिरा हृद्या आहाराः – स्थिराः + हृद्याः + आहाराः (विसर्गसन्धिः)

www.thearyasamaj.org


(ख) **समासः**

| | | |
|---|---|---|
| आयुःसत्त्वबलारोग्य-सुखप्रीतिविवर्धनाः | – | आयुश्च सत्त्वं च बलं च आरोग्यं च सुखं च प्रीतिश्च आयुस्सत्त्वबलारोग्यसुखप्रीतयः (द्वन्द्वः) आयुस्सत्त्वबलारोग्यसुखप्रीतीनां विवर्धनः (षष्ठीतत्पुरुषः) ते |
| सात्त्विकप्रियाः | – | सात्त्विकस्य प्रियः (षष्ठीतत्पुरुषः) ते |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| प्रीति | – | प्री + क्तिन् |
| विवर्धनाः | – | वि + वृध् + णिच् + ल्युट्-विवर्धन |
| स्निग्धाः | – | स्निह् + क्त-स्निग्ध |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| आरोग्य | – | अरोग + ष्यञ् |
| रस्याः | – | रस + यत्-रस्य |
| हृद्याः | – | हृदय (हृद्) + यत्-हृद्य |

(ङ) **व्युत्पत्तिः**

| | | |
|---|---|---|
| हृद्याः | – | हृदि स्पृश्यते मनोज्ञत्वात् |

**(ii) पर्यायः**

| | | |
|---|---|---|
| आयुः | – | जीवितकालः, वयः |
| मोदः | – | आमोदः, सम्मदः, प्रमदः, आनन्दः, सुखम्, शातम् |

**(iii) कोशः**

| | | |
|---|---|---|
| चिक्कणं | – | चिक्कणं मसृणं स्निग्धम् (अमरकोशः) |

## अभ्यासः - 55
## श्लोकः - 65

1. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks of the basis of the verse.]

**यथा–** (क) **आयुषः** विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

(ख) ----------- विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

www.thearyasamaj.org


(ग) ----------- विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

(घ) ----------- विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

(ङ) ----------- विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

(च) ----------- विवर्धनाः आहाराः सात्त्विकप्रियाः भवन्ति।

2. **उचितेन अर्थेन योजयत–**

[सही अर्थ से जोड़ें। Match with the approriate meaning.]

| | |
|---|---|
| (क) हृद्याः | (i) अन्तर्दृढाः |
| (ख) रस्याः | (ii) वर्धकाः |
| (ग) स्थिराः | (iii) चिक्कणाः |
| (घ) स्निग्धाः | (iv) रसमयाः |
| (ङ) विवर्धनाः | (v) रुचिकराः |

3. **अधोलिखित-शब्दानां समानार्थकं शब्दत्रयं लिखत–**

[अधोलिखित शब्दों के समानार्थक तीन शब्द लिखें। Write three synonyms of the following words.]

(क) बलम् = --------- --------- ---------

(ख) प्रीतिः = --------- --------- ---------

(ग) प्रियः = --------- --------- ---------

(घ) हृद्यः = --------- --------- ---------

(ङ) आरोग्यम् = --------- --------- ---------

4. **प्रकृति-प्रत्ययविभागं कुरुत–**

[प्रकृति-प्रत्यय विभाग करें। Separate the base and the suffix.]

**यथा–** (क) रस्याः = **रस्** + **यत्**

(ख) स्निग्धाः = ----------- + ----------

(ग) आरोग्यम् = ----------- + ----------

(घ) प्रीतिः = ----------- + ----------

(ङ) हृद्याः = ----------- + ----------

(च) विवर्धनाः = ----------- + ----------

www.thearyasamaj.org



5. **उत्तरं लिखत—**

[उत्तर लिखें। Answer the questions.]

**यथा—** (क) श्लोके कति कृदन्तशब्दाः सन्ति? --------------------------------

(ख) श्लोके कति समस्तपदानि सन्ति? --------------------------------

(ग) श्लोके कति तद्धितान्तशब्दाः सन्ति? --------------------------------

(घ) श्लोके कति विशेषणपदानि सन्ति? --------------------------------

6. **शब्दरूपं पूरयत—**

[शब्दरूप पूरा करें। Complete the declension.]

| | एक. | द्वि. | बहु. | प्रातिपदिकम् |
|---|---|---|---|---|
| **यथा—** (क) | **आयुः** | **आयुषी** | **आयूंषि** | **(आयुस्)** |
| (ख) | -------- | वपुषी | -------- | (--------) |
| (ग) | -------- | -------- | -------- | (धनुस्) |
| (घ) | यजुः | -------- | -------- | (--------) |
| (ङ) | छन्दः | छन्दसी | छन्दांसि | (छन्दस्) |
| (च) | -------- | -------- | -------- | (तपस्) |
| (छ) | नभः | -------- | -------- | (--------) |
| (ज) | -------- | -------- | मनांसि | (--------) |
| (झ) | -------- | -------- | -------- | (पयस्) |
| (ञ) | उरः | -------- | -------- | (--------) |
| (ट) | -------- | यशसी | -------- | (--------) |
| (ड) | -------- | -------- | -------- | (सरस्) |

www.thearyasamaj.org



## श्लोकः

**कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः ।**
**आहारा राजसस्येष्टा दुःखशोकामयप्रदाः ॥66॥** (भ.गी. 17.9)

## पदच्छेदः

कटु-अम्ल–लवण-अत्युष्ण–तीक्ष्ण-रूक्ष-विदाहिनः।
आहाराः राजसस्य इष्टाः दुःख-शोक-आमय–प्रदाः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| कट्वम्ललवणा- | न. पुं. प्र. बहु. | राजसस्य | अ. पुं. षष्ठी एक. |
| त्युष्णतीक्ष्णरूक्ष- | समस्तम् विशेषणम् | इष्टाः | अ. पुं. प्र. बहु. |
| विदाहिनः | | दुःखशोका- | अ. पुं. प्र. बहु. |
| आहाराः | अ. पुं. प्र. बहु. विशेष्यम् | मयप्रदाः | समस्तम् |

## आकाङ्क्षा

**इष्टाः।**

| | |
|---|---|
| के इष्टाः? | आहाराः इष्टाः। |
| कीदृशाः आहाराः इष्टाः? | कट्वम्ललवणात्युष्णतीक्ष्णरूक्षविदाहिनः आहाराः इष्टाः। |
| एतादृशाः आहाराः कस्य इष्टाः? | एतादृशाः आहाराः राजसस्य इष्टाः। |
| एतादृशाः आहाराः किम्प्रदाः? | एतादृशाः आहाराः दुःखशोकामयप्रदाः। |

## अन्वयः

कट्वम्ललवणात्युष्ण-तीक्ष्ण-रूक्षविदाहिनः आहाराः राजसस्य इष्टाः, (ते) दुःखशोकामयप्रदाः (भवन्ति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| कटु | कटुरसयुक्तः | कड़वे | bitter |
| अम्ल | अम्लरसयुक्तः | खट्टी | sour |
| लवण | लवणरसयुक्तः | नमकीन | saline |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| अत्युष्ण | सद्यनिर्मितः | बहुत गर्म | excessively |
| तीक्ष्ण | तीक्ष्णः | रूखा | pungent hot |
| रूक्ष | शुष्कः | सुखा | dry |
| विदाहिनः | दाहकाः | दाहकारक | burning |
| आहाराः | भोज्यपदार्थाः | भोज्य पदार्थ | foods |
| राजसस्य | राजसपुरुषस्य | राजस मनुष्य को | of the *Rājasa* |
| इष्टाः | प्रियाः | प्रिय हैं | are favourable |
| दुःख-शोक-आमयप्रदाः | पीडा-शोक-रोगदायकाः | दुःख, शोक व रोग को देने वाले | are productive of pain, grief and disease |

**भावार्थः**

**संस्कृतम्** – तिक्ताः, अम्लाः, लवणाः, अत्युष्णाः, रूक्षाः, दाहकारकाश्च भोज्यपदार्थाः राजसमनुष्यस्य अतीव प्रियाः भवन्ति। एतादृशाः आहाराः दुःखं, शोकं रोगं च प्रददति।

**हिन्दी** – कड़वे, खट्टे, अधिक नमकीन, अति गरम, तिक्त, रूखे तथा अत्यन्त दाहकारक भोज्य पदार्थ राजस व्यक्ति को अति प्रिय हैं, ऐसे आहार दुःख, शोक व रोग को जन्म देते हैं।

**आंग्लम्** – The foods that are bitter, sour, saline over hot, pungent, dry and burning are liked by *Rājasa* and are productive of pain, grief and disease.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

कट्वम्ल – कटु + अम्ल (यण्सन्धिः)

लवणात्युष्ण – लवण + अति + उष्ण

(दीर्घसन्धिः) (यण्सन्धिः)

आहारा राजसस्येष्टा

दुःखशोकामयप्रदाः – आहाराः + राजसस्य + इष्टाः + दुःखशोक + आमयप्रदाः

(विसर्गसन्धिः) (गुणसन्धिः) (विसर्गसन्धिः) (दीर्घसन्धिः)

www.thearyasamaj.org



**( ख ) समासः**

| | | |
|---|---|---|
| कट्वम्ललवणात्युष्ण-तीक्ष्णरूक्षविदाहिनः | - | कटुश्च अम्लश्च लवणश्च अत्युष्णश्च तीक्ष्णश्च रूक्षश्च विदाही च, कट्वम्ललवणात्युष्णतीक्ष्णविदाही (कर्मधारयः) ते |
| दुःखशोकामयप्रदाः | - | दुःखं च शोकश्च आमयश्च दुःखशोकामयाः (द्वन्द्वः) दुःखशो-कामयान् प्रददाति इति दुःखशोकामयप्रदः (उपपदतत्पुरुषः) ते |

**( ग ) कृदन्तः**

| | | |
|---|---|---|
| कटु | - | कट् + उ |
| अम्ल | - | अम् + क्ल् + अच् |
| लवण | - | लू + ल्युट् |
| उष्ण | - | उष् + नक् |
| तीक्ष्ण | - | तिज् + क्स्न् |
| रूक्ष | - | रूक्ष् + अच् |
| इष्टाः | - | इष् + क्त |
| शोक | - | शुच् + घञ् |
| आमय | - | आ + मी + करणे अच् |
| विदाहिनः | - | वि + दह् + णिनि |

**( घ ) तद्धितान्तः**

| | | |
|---|---|---|
| राजसस्य | - | रजस् + अण्-राजस |

---

## अभ्यासः - 56
## श्लोकः - 66

1. **यथान्वयं रिक्तं स्थानं पूरयत–**

[अन्वय की दृष्टि से रिक्त स्थान भरें। Fill in the blanks according to the construction of the verse.]

कटु-------- --------- ------------- ------- विदाहिनः, ------------

राजसस्य---------, ते------------------------।

www.thearyasamaj.org


2. **यथोचितं योजयत–**

[यथोचित जोड़ें। Join appropriately.]

| | |
|---|---|
| (क) राजसस्य | (i) क्त |
| (ख) आहाराः | (ii) ल्युट् |
| (ग) इष्टाः | (iii) घञ् |
| (घ) विदाहिनः | (iv) अण् |
| (ङ) लवण | (v) णिनि |

3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

(क) कट्वम्लः = ----------- + -----------

(ख) अत्युष्णः = ----------- + -----------

(ग) प्रत्येकः = ----------- + -----------

(घ) इत्येव = ----------- + -----------

(ङ) स्वागतम् = ----------- + -----------

4. **वाक्यानि रचयत–**

[वाक्य बनाएँ। Make the sentences.]

| | | | | |
|---|---|---|---|---|
| कटुः<br>अम्लः<br>अत्युष्णः<br>तीक्ष्णः<br>विदाही | आहारः | राजसस्य<br>प्राणिनाम् | दुःखप्रदः<br>शोकप्रदः<br>आमयप्रदः<br>इष्टः | -------------------------<br>-------------------------<br>-------------------------<br>-------------------------<br>------------------------- |

5. **उपपदतत्पुरुषस्य पञ्च-उदाहरणानि स्वयं लिखत–**

[उपपदतत्पुरुष के पाँच उदाहरण स्वयं लिखें। Write five examples of *Upapada tatpurusha* compound by yourself.]

**यथा–** (क) **दुःखं प्रददाति इति दुःखप्रदः।**

(ख) ---------------------------------------------।

(ग) ---------------------------------------------।

(घ) ---------------------------------------------।

(ङ) ---------------------------------------------।

(च) ---------------------------------------------।

www.thearyasamaj.org


**श्लोकः**

**यातयामं गतरसं पूति पर्युषितं च यत् ।**
**उच्छिष्टमपि चामेध्यं भोजनं तामसप्रियम् ॥67॥** (भ.गी. 17.10)

**पदच्छेदः**

यात-यामम् गत-रसम् पूति पर्युषितम् च यत्।
उच्छिष्टम् अपि च अमेध्यम् भोजनम् तामस-प्रियम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यातयामम् | अ. नपुं. प्र. एक. समस्तम् विशेषणम् | उच्छिष्टम् | अ. नपुं. प्र. एक. विशेषणम् |
| | | अपि | अव्ययम् |
| गतरसम् | अ. नपुं. प्र. एक. समस्तम् विशेषणम् | च | अव्ययम् |
| | | अमेध्यम् | अ. नपुं. प्र. एक. समस्तम् विशेषणम् |
| पूति | इ. नपुं. प्र. एक. विशेषणम् | | |
| पर्युषितम् | अ. नपुं. प्र. एक. विशेषणम् | भोजनम् | अ. नपुं. प्र. एक. विशेष्यम् |
| च | अव्ययम् | तामसप्रियम् | अ. नपुं. प्र. एक. समस्तम् |
| यत् | यद्-द. (सर्व.) नपुं. प्र. एक. | | |

**आकाङ्क्षा**

**(अस्ति)।**

| | |
|---|---|
| किम् अस्ति? | तामसप्रियम् अस्ति। |
| किं तामसप्रियम् अस्ति? | भोजनं तामसप्रियम् अस्ति। |
| कीदृशं भोजनं तामसप्रियम्? | यत् भोजनं यातयामं, तत् तामसप्रियम्। |
| पुनश्च कीदृशं भोजनं तामसप्रियम्? | गतरसं भोजनं तामसप्रियम्। |
| पुनश्च कीदृशं भोजनं तामसप्रियम्? | पूति भोजनं तामसप्रियम्। |
| पुनश्च कीदृशं भोजनं तामसप्रियम्? | पर्युषितं च भोजनं तामसप्रियम्। |
| पुनश्च कीदृशम्? | उच्छिष्टम् अपि भोजनं तामसप्रियम्। |
| पुनश्च कीदृशम्? | अमेध्यं च भोजनम् तामसप्रियम्। |

www.thearyasamaj.org



## अन्वयः

यत् यातयामं, गतरसं, पूति, पर्युषितं च, उच्छिष्टम् अपि, अमेध्यं च, तत् भोजनम् तामसप्रियम् (भवति)।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत् भोजनम् | यः आहारः | जो भोजन | The food |
| यातयामम् | अर्धपक्वम् | आधा पका हुआ | half boiled |
| गतरसम् | रसहीनम् | रसविहीन | tasteless |
| पूति | दुर्गन्धयुक्तम् | दुर्गन्धयुक्त | putrid |
| पर्युषितम् | भोजनात् त्रिहोराभ्यः अपि प्राक् निर्मितम् | बासी | rotten |
| उच्छिष्टम् | भुक्तशेषम् | आधा खाया हुआ खाना | refuse |
| अमेध्यम् | अपवित्रं (अयज्ञार्हम्) | अपवित्र | impure |
| तत् भोजनम् | तादृशं भोजनम् | वह भोजन | the food |
| तामसप्रियम् | तामसमनुष्यस्य अभीष्टम् | तामस व्यक्ति को प्रिय है | liked by the *Tāmasika* |

## भावार्थः

**संस्कृतम्** – यः आहारः पूर्णतया पक्वः न, रसविहीनः, दुर्गन्धयुक्तः, भोजनात् बहुपूर्वं पक्वः, भुक्तशिष्टः अपवित्रश्च वर्तते, सः आहारः तामसमनुष्यस्य प्रियो भवति।

**हिन्दी** – जो भोजन पूर्ण रूप से पका न हो, रसविहीन हो, दुर्गन्ध वाला हो, भोजन करने से बहुत पहले पका हुआ बासी हो, झूठा व अपवित्र हो वह भोजन तामस व्यक्ति को प्रिय होता है।

**आंग्लम्** – That which is stale, tasteless, stinking, cooked overnight, refuse and impure is the food liked by the *Tāmasika*.

## निदर्शनम्

(i) **व्याकरणम्**

**(क) सन्धिः**

चामेध्यम् – च + अमेध्यम् (दीर्घसन्धिः)

पर्युषितम् – परि + उषितम् (यण्सन्धिः)

उच्छिष्टम् – उत् + शिष्टम् (श्चुत्वसन्धिः)

www.thearyasamaj.org



(ख) **समासः**

| | | |
|---|---|---|
| यातयामम् | – | यातः यामः यस्य तत् यातयामम् (बहुव्रीहिः) |
| गतरसम् | – | गतः रसः यस्य तत् गतरसम् (बहुव्रीहिः) |
| अमेध्यम् | – | न मेध्यम् (नञ्तत्पुरुषः) |
| तामसप्रियम् | – | तामसस्य प्रियम् (षष्ठीतत्पुरुषः) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| यात | – | या + क्त |
| यामम् | – | यम् + घञ् – यामः |
| गत | – | गम् + क्त |
| रसम् | – | रस् + अच् – रसः |
| पूति | – | पूञ् + क्तिच् |
| पर्युषितम् | – | परि + वस् + क्त |
| उच्छिष्टम् | – | उत् + शिष् + क्त |
| मेध्यम् | – | मेध् + ण्यत् |
| भोजनम् | – | भुज् + ल्युट् |
| प्रियः | – | प्री + क |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| तामस | – | तमस् + अण् |

(ii) **कोशः**

| | | |
|---|---|---|
| मेध्यम् | – | पूतं पवित्रं मेध्यञ्च |

---

## अभ्यासः – 57

### श्लोकः – 67

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोक के अनुसार उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words on the basis of the verse.]

यातयामं ---------- ------- --------------------च --------।
--------------------चामेध्यं ---------- ------------------॥

www.thearyasamaj.org


2. **समानार्थकं शब्दं लिखत–**

[समानार्थक शब्द लिखें। Write the synonyms.]

(क) आहार: = -------------

(ख) अर्धपक्वम् = -------------

(ग) अवशिष्टम् = -------------

(घ) तमोगुणी = -------------

(ङ) अपवित्रम् = -------------

3. **सन्धिं कुरुत–**

[सन्धि करें। Join euphonically.]

(i) च + अमेध्यम् = -------------

(ii) च + अस्ति = -------------

(iii) च + अपि = -------------

(iv) अद्य + अपि = -------------

(v) मम + अनुज: = -------------

(vi) च + अर्जुन = -------------

4. **प्रकृति-प्रत्यय-विभागं कुरुत–**

[प्रकृति-प्रत्यय विभाग करें। Separate the base and the suffix.]

**यथा–** (i) पर्युषितम् = **परि + वस् + क्त**

(ii) उच्छिष्टम् = ---------------------

(iii) क्षुब्ध: = ---------------------

(iv) निन्दित: = ---------------------

(v) ध्यात: = ---------------------

(vi) संश्लिष्ट: = ---------------------

(vii) इष्ट: = ---------------------

(viii) पक्वम् = ---------------------

www.thearyasamaj.org


5. **मञ्जूषायां प्रदत्तान् शब्दान् उचिताहारस्य अग्रे लिखत–**

[मञ्जूषा में दिये शब्दों को उचित आहार के आगे लिखें। Write the words given in the box aganist their appripriate food.]

| | | | | | |
|---|---|---|---|---|---|
| रूक्षः | रस्यः | पूतिः | स्थिरः | हृद्यः | गतरसः |
| यातयामः | अत्युष्णः | सत्त्वविवर्धनः | कटुः | आमयप्रदः | पर्युषितः |
| स्निग्धः | अमेध्यः | आयुर्वर्धकः | उच्छिष्टः | | |

(क) सात्त्विकप्रियः आहारः = ------------------------------------

(ख) राजसप्रियः आहारः = ------------------------------------

(ग) तामसप्रियः आहारः = ------------------------------------

6. **विग्रहवाक्यं लिखत–**

[विग्रहवाक्य लिखें। Write the analytical sentence.]

यथा– (क) तामसप्रियम् = **तामसस्य प्रियं**

(ख) सात्त्विकप्रियम् = ------------------------

(ग) राजसप्रियम् = ------------------------

(घ) सज्जनप्रियम् = ------------------------

(ङ) भगवत्प्रियः = ------------------------

7. **यथोचितं रिक्तस्थानं पूरयत–**

[यथोचित रिक्त स्थान की पूर्ति करें। Fill in the blanks appropriately.]

| | | | | | |
|---|---|---|---|---|---|
| यथा– (क) यातयामम् | = | **यातः** | **यामः** | **यस्य** | **तत्** |
| (ख) गतरसम् | = | ---------- | ---------- | ---------- | ---------- |
| (ग) बहुकमलम् | = | ---------- | ---------- | ---------- | ---------- |
| (घ) उन्नतवृक्षम् | = | ---------- | ---------- | ---------- | ---------- |
| (ङ) बह्वक्षरम् | = | ---------- | ---------- | ---------- | ---------- |

www.thearyasamaj.org


## श्लोकः

**देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।**
**ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ॥68॥** (भ.गी. 17.14)

## पदच्छेदः

देव-द्विज-गुरु-प्राज्ञ-पूजनम् शौचम् आर्जवम्।
ब्रह्म-चर्यम् अ-हिंसा च शारीरम् तपः उच्यते।।

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| देवद्विजगुरुप्राज्ञ- | अ. नपुं. प्र. एक. | च | अव्ययम् |
| पूजनम् | समस्तम् | शारीरम् | अ. नपुं. प्र. एक. विशेषणम् |
| शौचम् | अ. नपुं. प्र. प्रक. | तपः | तपस्-स. नपुं. प्र. |
| आर्जवम् | अ. नपुं. प्र. एक. | | एक. विशेष्यम् |
| ब्रह्मचर्यम् | अ. नपुं. प्र. एक. | उच्यते | वच्-कर्मणि आत्मनेपदे |
| अहिंसा | आ. स्त्री. प्र. एक. समस्तम् | | लट् प्रपु. एक. |

## आकाङ्क्षा

**उच्यते।**

| | |
|---|---|
| किम् उच्यते? | तपः उच्यते। |
| कीदृशं तपः उच्यते? | शारीरं तपः उच्यते। |
| किं शारीरं तपः उच्यते? | देवद्विजगुरुप्राज्ञपूजनं शारीरं तपः उच्यते। |
| पुनश्च किं शारीरं तपः? | शौचं शारीरं तपः। |
| पुनश्च किं शारीरं तपः? | आर्जवं शारीरं तपः। |
| पुनश्च किं शारीरं तपः उच्यते? | अहिंसा च शारीरं तपः उच्यते। |

## अन्वयः

देव-द्विज-गुरु-प्राज्ञपूजनं, शौचम्, आर्जवम्, ब्रह्मचर्यम्, अहिंसा च शारीरं तपः उच्यते।

www.thearyasamaj.org



पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| देवद्विजगुरुप्राज्ञ-पूजनम् | ईश्वरस्य, विप्रस्य, गुरोः मनीषिणः च अर्चनम् | ईश्वर, ब्राह्मण, गुरु व मनीषियों का पूजन | Worship of the Gods, *Brahmins*, teachers and wise |
| शौचम् | मृज्जलाभ्यां शरीरशोधनम् | शुद्धि रखना | purity |
| आर्जवम् | सारल्यम् | सरलता | straight for wardness |
| ब्रह्मचर्यम् | स्त्रीसमागमराहित्यम् | ब्रह्मचारी के व्रत में स्थिति | celibacy |
| अहिंसा | हिंसायाः त्यागः | हिंसा न करना | non-violence |
| शारीरं तपः | शरीरसम्बन्धिनी तपस्या | शरीर सम्बन्धी तप | austerity of body |
| उच्यते | कथ्यते | कहा जाता है | is called |

भावार्थः

**संस्कृतम्** – ईश्वरस्य, ब्राह्मणस्य, गुरोः मनीषिणः च समर्चनम्, शुद्धेः पालनम्, सरलता, ब्रह्मचर्यपालनम्, हिंसायाः त्यागः – एतत् सर्वं शरीरसम्बन्धिनी तपस्या कथ्यते।

**हिन्दी** – ईश्वर, ब्राह्मण, गुरु व मनीषी का अर्चन करना, शुद्धता का पालन, सरलता, ब्रह्मचारी के व्रत में स्थिति, हिंसा का त्याग करना ये सब शरीर सम्बन्धी तप कहे जाते हैं।

**आंग्लम्** – Worship of the Gods, *Brahmins*, teachers and wise, purity, uprightness, continence and non injury these are said to be the austerity of the body.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

तप उच्यते – तपः + उच्यते (विसर्गसन्धिः)

(ख) **समासः**

देवद्विजगुरुप्राज्ञ-पूजनम् – देवाश्च द्विजाश्च गुरवश्च प्राज्ञाश्च देवद्विजगुरुप्राज्ञाः (द्वन्द्वः) देवद्विजगुरुप्राज्ञानां पूजनम् (षष्ठीतत्पुरुषः)

अहिंसा – न हिंसा (नञ्तत्पुरुषः)

द्विजः – द्वाभ्यां जायते इति द्विजः (उपपदतत्पुरुषः)

www.thearyasamaj.org


(ग) **कृदन्तः**

| | | |
|---|---|---|
| देव | – | दिव् + अच् |
| गुरु | – | गॄ + कु |
| पूजनम् | – | पूज् + ल्युट् |
| चर्यम् | – | चर् + यत् |
| द्विजः | – | द्वि + जन् + ड |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| शौचम् | – | शुचेः भावः, शुचि + अण् |
| आर्जवम् | – | ऋजोः भावः, ऋजु + अण् |
| शारीरम् | – | शरीरस्य इदम्, शरीर + अण् |
| प्राज्ञ | – | प्रज्ञ एव, प्रज्ञ + अण् (स्वार्थे) |

(ङ) **व्युत्पत्तिः**

| | | |
|---|---|---|
| द्विजः | – | जन्मतः, उपनयनतश्च वारद्वयं जन्म लभते। |
| प्राज्ञः | – | प्रकर्षेण जानाति इति प्रज्ञः, प्रज्ञ एव प्राज्ञः। |

(ii) **पर्यायः**

| | | |
|---|---|---|
| द्विजः | = | विप्रः, ब्राह्मणः, द्विजातिः, द्विजन्मा, अग्रजन्मा |
| ब्रह्मचर्यम् | = | ब्रह्मचर्यं च योषित्सु भोग्यताबुद्धिवर्जनम् |

**अवधेयम्**

**द्वन्द्वसमासविषये**

www.thearyasamaj.org


## अभ्यासः - 58
## श्लोकः - 68

1. **अधोलिखित-शब्दानां समानार्थकं शब्दत्रयं लिखत–**

[अधोलिखित शब्दों के समानार्थक तीन शब्द लिखें। Write three synonyms of the following words.]

(क) द्विजः = ---------- ---------- ----------

(ख) प्राज्ञः = ---------- ---------- ----------

(ग) शौचम् = ---------- ---------- ----------

(घ) आर्जवम् = ---------- ---------- ----------

(ङ) उच्यते = ---------- ---------- ----------

2. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिये गये पदों के प्रातिपदिक लिखें। Write nominal stem of the given words.]

(क) शौचम् = -------------

(ख) आर्जवम् = -------------

(ग) तपः = -------------

(घ) शारीरम् = -------------

(ङ) अहिंसा = -------------

3. **कर्मणि लट् लकारे प्रथमपुरुष-रूपाणि लिखत–**

[कर्मवाच्य लट् लकार में प्रथम पुरुष के रूप लिखें। Write the forms in the third person of *Lat Lakāra*.]

| | | | | |
|---|---|---|---|---|
| यथा– (क) | **उच्यते** | **उच्येते** | **उच्यन्ते** | (ब्रू/वच्) |
| (ख) | --------- | --------- | --------- | (कृ) |
| (ग) | --------- | --------- | --------- | (गम्) |
| (घ) | --------- | --------- | कथ्यन्ते | (कथ्) |
| (ङ) | --------- | विद्येते | --------- | (विद्) |
| (च) | स्मर्यते | --------- | --------- | (स्मृ) |

4. **श्लोकस्य भावार्थं पूरयत–**

[श्लोक का भावार्थ पूरा करें। Complete the meaning of the verse.]

ईश्वरस्य ---------- ----------- मनीषिणः च ---------- ---------- ----------
------------ ब्रह्मचर्यपालनम् हिंसायाः --------- एतत् सर्वं --------------
------------ कथ्यते।

www.thearyasamaj.org


5. **यथोचितं योजयत–**

[यथोचित जोड़े। Match with the appropriate one.]

| | |
|---|---|
| (i) शुचेः भावः | (क) पूजनम् |
| (ii) ऋजोः भावः | (ख) अहिंसा |
| (iii) शरीरेण सम्बद्धम् | (ग) शौचम् |
| (iv) अर्चनम् | (घ) शारीरम् |
| (v) न हिंसा | (ङ) आर्जवम् |

6. **श्लोकानुसारं रिक्तस्थानं पूरयत–**

[श्लोक के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks on the basis of the verse.]

यथा– (क) **देवस्य** पूजनं शारीरं तपः उच्यते।

(ख) ---------------------- पूजनं शारीरं तपः उच्यते।

(ग) ---------------------- पूजनं शारीरं तपः उच्यते।

(घ) ---------------------- पूजनं शारीरं तपः उच्यते।

7. **सन्धि-विच्छेदं कुरुत–**

[सन्धि-विच्छेद करें। Disjoin the *Sandhi*.]

(क) तप उच्यते = --------- + ----------

(ख) मन उच्यते = --------- + ----------

(ग) राम एव = --------- + ----------

(घ) तत आगतः = --------- + ----------

(ङ) भवत आदेशः = --------- + ----------

8. **प्रकृति-प्रत्यय-विभागं कुरुत–**

[प्रकृति-प्रत्यय विभाग करें। Seperate the base and the suffix.]

यथा– (क) शारीरम् = **शरीर** + **अण्**

(ख) शौचम् = --------- + ----------

(ग) आर्जवम् = --------- + ----------

(घ) प्राज्ञः = --------- + ----------

(ङ) चर्यम् = --------- + ----------

www.thearyasamaj.org


## श्लोकः

**अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।**
**स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥69॥** (भ.गी. 17.15)

## पदच्छेदः

अनुद्वेग-करम् वाक्यम् सत्यम् प्रिय-हितम् च यत्।
स्व-अध्याय-अभ्यसनम् च एव वाङ्मयम् तपः उच्यते॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| अनुद्वेगकरम् | अ. नपुं. प्र. एक. समस्तम् विशेषणम् | स्वाध्यायाभ्यसनम् | अ. नपुं. प्र. एक. समस्तम् |
| वाक्यम् | अ. नपुं. प्र. एक. विशेष्यम् | च | अव्ययम् |
| सत्यं | अ. नपुं. प्र. एक. विशेषणम् | एव | अव्ययम् |
| प्रियहितं | अ. नपुं. प्र. एक. समस्तम् विशेषणम् | वाङ्मयम् | अ. नपुं. प्र. एक. विशेषणम् |
| च | अव्ययम् | तपः | तपस्–स. नपुं. प्र. एक. विशेष्यम् |
| यत् | यद्–द. (सर्व.) नपुं. प्र. एक. | उच्यते | वच्–कर्मणि आत्मनेपदे लट् प्रपु. एक. |

## आकाङ्क्षा

**तपः उच्यते।**

| | |
|---|---|
| कीदृशं तपः उच्यते? | वाङ्मयं तपः उच्यते। |
| किं वाङ्मयं तपः उच्यते? | वाक्यं वाङ्मयं तपः उच्यते। |
| कीदृशं वाक्यं वाङ्मयं तपः? | अनुद्वेगकरं वाक्यं वाङ्मयं तपः। |
| पुनश्च कीदृशं वाक्यम्? | सत्यं वाक्यम्। |
| पुनश्च कीदृशं वाक्यम्? | प्रियहितं वाक्यम्। |
| पुनश्च किं वाङ्मयं तपः उच्यते? | स्वाध्यायाभ्यसनं चैव वाङ्मयं तपः उच्यते। |

## अन्वयः

अनुद्वेगकरं, सत्यं, प्रियहितं च यत् वाक्यं, स्वाध्यायाभ्यसनं चैव (तत्) वाङ्मयं तपः उच्यते।

www.thearyasamaj.org



## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अनुद्वेगकरम् | प्राणिनामदुःखकरम् | उद्वेग न करने वाला | Causing no excitement |
| सत्यम् | यथार्थम् | सत्य | truthful |
| प्रियहितं च | प्रीतिकरं हितकरं च | प्रियकर तथा हितकर | Pleasant and beneficial |
| यत् वाक्यम् | यद् भाषणम् | जो वाणी है | which sentence |
| स्वाध्यायाभ्यसनं | स्वाध्यायः अभ्यासः च | स्वाध्याय और अभ्यास | the practice of the study of the *Vedas* |
| चैव | चापि | भी | and also |
| वाङ्मयं तपः | वाचा सम्बन्धिनी तपस्या | वाणी से सम्बन्धित तप | austerity of speech |
| उच्यते | कथ्यते | कहा जाता है | is called |

## भावार्थः

**संस्कृतम्** – यत् अनुद्वेगकरम् (भाषणं उद्वेगं न जनयेत्), सत्यं, प्रियकरं हितकरं च भाषणं स्यात्, तत् वाङ्मयं तपः इति कथ्यते तथा स्वाध्यायः, अभ्यासश्चापि–यथाविधि वाङ्मयं तप इति उच्यते।

**हिन्दी** – जो भाषण उद्वेग उत्पन्न न करे, जो सत्य, प्रिय व हितकर हो तथा स्वाध्याय और अभ्यास भी–यह सब वाणी से सम्बन्धित तप कहा जाता है।

**आंग्लम्** – The speech which causes no excitement which is truthful, pleasant and beneficial and also the practice of sacred recitation these are said to form the austerity of speech.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

स्वाध्यायाभ्यसनम् – स्व + अध्याय + अभ्यसनम् (दीर्घसन्धिः)

चैव – च + एव (वृद्धिसन्धिः)

वाङ्मयम् – वाक् + मयम् (अनुनासिकसन्धिः)

तप उच्यते – तपः + उच्यते (विसर्गसन्धिः)

www.thearyasamaj.org


**( ख ) समासः**

| | | |
|---|---|---|
| अनुद्वेगकरम् | – | न उद्वेगः अनुद्वेगः (नञ्तत्पुरुषः) अनुद्वेगं करोति इति अनुद्वेगकरम् (उपपदतत्पुरुषः) |
| प्रियहितम् | – | प्रियं च तत् हितं च प्रियहितम् (कर्मधारयः) |
| स्वाध्यायाभ्यसनम् | – | स्ववेदाध्ययनम् स्वाध्यायः, स्वाध्यायः च अभ्यसनं च अनयोः समाहारः स्वाध्यायाभ्यसनम् (समाहारद्वन्द्वः) |

**( ग ) कृदन्तः**

| | | |
|---|---|---|
| अनुद्वेग | – | अन्–उत् + विज् + घञ् |
| करम् | – | कृ + ट |
| वाक्यम् | – | वच् + ण्यत् |
| हितम् | – | धा + क्त |
| अध्याय | – | अधि + इ + घञ् |
| अभ्यसनम् | – | अभि + अस् + ल्युट् |

**( घ ) तद्धितान्तः**

| | | |
|---|---|---|
| सत्यम् | – | सत् + यत् |
| वाङ्मयम् | – | वाच् + मयट् |

---

## अभ्यासः - 59

## श्लोकः - 69

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोकानुसार उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words on the basis of the verse.]

अनुद्वेगकरं ------------ ------------ ----------------च यत्।
------------------- चैव ------------- ------- ----------॥

2. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पदों को चुनकर लिखें। Write the words from the verse.]

(क) प्रथमान्तं समस्तम् - (i) ----------- (ii) ----------- (iii) ----------
(ख) प्रथमान्तम् - (i) ----------- (ii) ----------- (iii) ----------
असमस्तम् - (iv) ---------- (v) -----------

www.thearyasamaj.org


(ग) अव्ययम् - (i) ---------- (ii) ----------

(घ) क्रियापदम् - (i) ----------

3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

**यथा–** (i) चैव = **च** + **एव**

(ii) चैतत् = ---------- + ----------

(iii) चैवैनम् = ---------- + ---------- + ----------

(iv) तेनैव = ---------- + ----------

(v) सैव = ---------- + ----------

(vi) सैषा = ---------- + ----------

(vii) अत्रैव = ---------- + ----------

(viii) देवैश्वर्यम् = ---------- + ----------

4. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

---------------- सत्यं ---------- ----- ---------- स्वाध्यायाभ्यसनं --------,
--------------- ---------------- तपः ---------------।

5. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक को पढ़कर उत्तर लिखें। Answer on the basis of the verse.]

(क) 'अनुद्वेगकरम्' इति कस्य विशेषणपदम्? ------------------------------

(ख) कस्य अभ्यसनं वाङ्मयं तपः उच्यते? ------------------------------

(ग) 'प्रियहितम्' इत्यत्र कः समासः? ------------------------------

(घ) सत्यं भाषणं कीदृशं तपः उच्यते? ------------------------------

6. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | | | |
|---|---|---|---|
| (i) | हितम् | (क) | विक्षेपहीनता |
| (ii) | स्वाध्यायस्य | (ख) | यथार्थम् |
| (iii) | वाङ्मयं | (ग) | वाक्यम् |
| (iv) | अनुद्वेगः | (घ) | अभ्यसनम् |
| (v) | सत्यम् | (ङ) | तपः |

www.thearyasamaj.org


7. **सन्धिं कृत्वा सन्धेर्नाम लिखत–**

[सन्धि करके नाम लिखें। Join the *Sandhi* and write the name.]

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| **यथा–** | (क) वाक् | + | मयम् | = | **वाङ्मयम्** | **अनुनासिकसन्धिः** |
| | (ख) दिक् | + | नागः | = | -------------- | -------------- |
| | (ग) वाक् | + | मनः | = | -------------- | -------------- |
| | (घ) जगत् | + | नाथः | = | -------------- | -------------- |
| | (ङ) चित् | + | मयम् | = | -------------- | -------------- |

8. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिये गये शब्दों का प्रयोग कर कुछ वाक्य लिखें। Write some sentences using the words given below.]

(क) तपस्   (ख) यत् (नपुं.)   (ग) अनुद्वेग   (घ) ब्रू (कर्मणि लट्)

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

--------------------------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।**
**भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ॥70॥** (भ.गी. 17.16)

**पदच्छेदः**

मनः प्रसादः सौम्यत्वम् मौनम् आत्म–विनिग्रहः।
भाव–संशुद्धिः इति एतत् तपः मानसम् उच्यते।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| मनःप्रसादः | अ. पुं. प्र. एक. समस्तम् | एतत् | एतद्–द. (सर्व.) |
| सौम्यत्वम् | अ. नपुं. प्र. एक. | | नपुं. प्र. एक. |
| मौनम् | अ. नपुं. प्र. एक. | तपः | तपस्–स. नपुं. प्र. एक. |
| आत्मविनिग्रहः | अ. पुं. प्र. एक. समस्तम् | मानसम् | अ. नपुं. प्र. एक. |
| भावसंशुद्धिः | इ. स्त्री. प्र. एक. समस्तम् | उच्यते | वच्–कर्मणि आत्मनेपदे |
| इति | अव्ययम् | | लट् प्रपु. एक. |

**आकाङ्क्षा**

**तपः उच्यते।**

| | |
|---|---|
| कीदृशं तपः उच्यते? | मानसं तपः उच्यते। |
| किं मानसं तपः? | मनःप्रसादः मानसं तपः। |
| पुनश्च किं मानसं तपः? | सौम्यत्वं मानसं तपः। |
| पुनश्च किं मानसं तपः? | मौनं मानसं तपः। |
| पुनश्च किं मानसं तपः? | आत्मविनिग्रहः मानसं तपः। |
| पुनश्च किं मानसं तपः? | भावसंशुद्धिः इति एतत् मानसं तपः। |

**अन्वयः**

मनःप्रसादः, सौम्यत्वं, मौनम्, आत्मविनिग्रहः, भावसंशुद्धिः इति–एतत् मानसम् तपः उच्यते।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| मनःप्रसादः | चेतसः शान्तिः | मन की प्रसन्नता | Serenity of mind |
| सौम्यत्वम् | सौम्यभावः | सौम्य भाव | good heartedness |
| मौनम् | मनस्संयमः | मनन करने की प्रवृत्ति | silence |
| आत्मविनिग्रहः | मनसः नियन्त्रणम् | मन को नियन्त्रित करना | self control |
| भावसंशुद्धिः | भावानां पवित्रता (अमायावित्वम्) | भावों की निर्मलता | purity of nature |
| इति | एवम् | इस प्रकार का | thus |
| एतत् | इदम् | यह | this |
| मानसं | मनसः सम्बन्धिनी | मन से संबंधित | of mind |
| तपः | तपस्या | तपस्या | austerity |
| उच्यते | कथ्यते | कही जाती है | is called |

**भावार्थः**

**संस्कृतम्** – मनसः प्रसन्नता, सौम्यभावः, मननशीलता, मनसः सम्यक् नियन्त्रणम्, भावानां महती पवित्रता, एवं यस्मिन् तपसि मनसः प्रधानता भवति तत् तपः मानसं कथ्यते।

**हिन्दी** – मन की प्रसन्नता, सौम्य भाव, मनन करने की प्रवृत्ति, मन का सम्यक् नियन्त्रण, भावों की महान् पवित्रता, इस प्रकार जिस तप में मन की प्रधानता हो, वह मानस तप कहलाता है।

**आंग्लम्** – Serenity of mind gentleness, silence, self control and purity of disposition this is called the mental austerity.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

भावसंशुद्धिरित्येतत् – भावसंशुद्धिः + इति + एतत्

(विसर्गसन्धिः) (यण्सन्धिः)

तपो मानसम् – तपः + मानसम् (विसर्गसन्धिः)

www.thearyasamaj.org


**(ख) समासः**

| | | |
|---|---|---|
| मनःप्रसादः | – | मनसः प्रसादः (षष्ठीतत्पुरुषः) |
| आत्मविनिग्रहः | – | आत्मनः विनिग्रहः (षष्ठीतत्पुरुषः) |
| भावसंशुद्धिः | – | भावस्य संशुद्धिः (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| प्रसादः | – | प्र + सद् + घञ् |
| विनिग्रहः | – | वि + नि + ग्रह् + अप् |
| भाव | – | भू + घञ् |
| संशुद्धिः | – | सम् + शुध् + क्तिन् |
| इति | – | इ + क्तिन् – इति (अव्ययम्) |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| सौम्यत्वम् | – | सौम्यस्य भावः, सौम्य + त्व |
| मौनम् | – | मुनेः भावः, मुनि + अण् |
| मानसम् | – | मनः एव, मनसः इदम् वा, मनस् + अण् |

**अवधेयम्**

(i) **षष्ठीतत्पुरुषविषये**

(ii) **भावप्रत्ययविषये**

---

## अभ्यासः – 60
## श्लोकः – 70

1. **यथान्वयं रिक्तस्थानं पूरयत–**

[अन्वय के अनुसार रिक्त स्थान भरें। Fill in the blanks as per coustruction of the verse.]

मनःप्रसादः ---------- ---------- ------------ भावसंशुद्धिः ------------ ---------- ------------- मानसम्------------------।

www.thearyasamaj.org


2. **प्रकृति-प्रत्ययविभागं कुरुत–**

[प्रकृति-प्रत्यय का विभाग करें। Seperate the basis and the suffix.]

**यथा–** (क) भक्तिः = **भज् + क्तिन्**

(ख) संशुद्धिः = ------------------------

(ग) शक्तिः = ------------------------

(घ) उपलब्धिः = ------------------------

(ङ) संसिद्धिः = ------------------------

(च) सौम्यत्वम् = ------------------------

(छ) रमणीयत्वम् = ------------------------

(ज) पोषणत्वम् = ------------------------

(झ) सुन्दरत्वम् = ------------------------

(ञ) मौनम् = ------------------------

(ट) मानसम् = ------------------------

(ठ) तापसम् = ------------------------

3. **समानार्थक-शब्दान् लिखत–**

[समानार्थक शब्द लिखें। Write the synonyms.]

(क) मनः = --------------------------------------

(ख) प्रसादः = --------------------------------------

(ग) संशुद्धिः = --------------------------------------

(घ) विनिग्रहः = --------------------------------------

(ङ) तपः = --------------------------------------

4. **कर्मणि क्रियापदं कर्तरि परिवर्तयत–**

[कर्मवाच्य के क्रियापद को कर्तृवाच्य में बदलें। Change the verbal form from passive voice to active voice.]

**कर्मवाच्यम्** **कर्तृवाच्यम्**

**यथा–** (क) **उच्यते** = **ब्रवीति**

(ख) कथ्यते = ------------------

(ग) गम्यते = ------------------

(घ) दृश्यते = ------------------

www.thearyasamaj.org


(ङ) स्थीयते = ------------------

(च) पठ्यते = ------------------

5. **श्लोकम् आश्रित्य उत्तरं लिखत–**

[श्लोक के आधार पर उत्तर लिखें। Answer on the basis of the verse.]

(क) कस्य प्रसादः मानसं तपः? ----------------------------------------

(ख) कस्य विनिग्रहः मानसं तपः? ----------------------------------------

(ग) कस्य संशुद्धिः मानसं तपः? ----------------------------------------

(घ) मौनं कीदृशं तपः? ----------------------------------------

(च) सौम्यत्वं कीदृशं तपः? ----------------------------------------

6. **समाधानं प्रदत्त–**

[समाधान दें। Answer the questions.]

(क) मानसतपः किं न? ---------------------

(मनःप्रसादः/मौनम्/प्रियवाक्यम्/सौम्यत्वम्/भावसंशुद्धिः)

(ख) शारीरतपः किं न? ---------------------

(ब्राह्मणपूजनम्/शुचिता/अहिंसा/सरलता/आत्मविनिग्रहः)

(ग) वाङ्मयतपः किं न? ---------------------

(स्वाध्यायः/हितवचनम्/अभ्यासः/ब्रह्मचर्यम्/सत्यभाषणम्)

www.thearyasamaj.org


**श्लोकः**

**दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।**
**देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ॥71॥** (भ.गी. 17.20)

**पदच्छेदः**

दातव्यम् इति यत् दानम् दीयते अनुपकारिणे।
देशे काले च पात्रे च तत् दानम् सात्त्विकम् स्मृतम्।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| दातव्यम् | अ. नपुं. प्र. एक. | काले | अ. पुं. सप्त. एक. |
| इति | अव्ययम् | च | अव्ययम् |
| यत् | यद्–द.(सर्व.) नपुं. प्र. एक. | पात्रे | अ. नपुं. सप्त. एक. |
| दानम् | अ. नपुं. प्र. एक. | च | अव्ययम् |
| दीयते | दा–कर्मणि आत्मनेपदे लट् प्रपु. एक. | तत् | तद्–द.(सर्व.) नपुं. प्र. एक. |
| | | दानम् | अ. नपुं. प्र. एक. |
| अनुपकारिणे | न. पुं. चतु. एक. समस्तम् | सात्त्विकम् | अ. नपुं. प्र. एक. |
| देशे | अ. पुं. सप्त. एक. | स्मृतम् | अ. नपुं. प्र. एक. |

**आकाङ्क्षा**

**स्मृतम्।**

| | |
|---|---|
| किं स्मृतम्? | सात्त्विकं स्मृतम्। |
| सात्त्विकं किं स्मृतम्? | तद् दानं सात्त्विकं स्मृतम्। |
| किं तद् दानं सात्त्विकं स्मृतम्? | यद् दानं दीयते। |
| यद् दानं तत् किमिति दीयते? | दातव्यम् इति दीयते। |
| यद् दानं कस्मै दीयते? | अनुपकारिणे दीयते। |
| कुत्र दीयते? | देशे, काले च पात्रे च दीयते। |

**अन्वयः**

दातव्यम् इति (भावनया) यद्दानं देशे, काले च, पात्रे च अनुपकारिणे दीयते, तद्दानं सात्त्विकं स्मृतम्।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| दातव्यम् | दानं कर्तव्यम् एव | दान करना ही कर्तव्य है | ought to be given |
| इति | अनेन स्वभावेन | इस स्वभाव से | thus |
| (भावनया) | (मनसा) | (भावना से) | (with the feeling) |
| यद्दानम् | यः उत्सर्गः | जो दान | that gift |
| देशे | कुरुक्षेत्रादि पुण्यप्रदेशे | कुरुक्षेत्रादि पुण्य देश में | in a fit place |
| काले | शुभे समये (संक्रान्त्यादौ) | शुभ काल में | in time |
| पात्रे | उत्तमे पात्रे (विद्यातपोयुक्ताय) | उत्तम पात्र के प्राप्त होने पर | to a worthy person |
| अनुपकारिणे | स्वस्मै अनुपकारकाय | अपने अनुपकारी को | who does no service in return |
| दीयते | उत्सृज्यते | दिया जाता है | is given |
| तद्दानम् | सः उत्सर्गः | वह दान | that gift |
| सात्त्विकम् | सत्त्वगुणान्वितम् | सात्त्विक | *Sāttvika* |
| स्मृतम् | अभिमतम् | कहा जाता है | is held to be |

**भावार्थः**

**संस्कृतम्** – दानं मम कर्तव्यमिति स्वभावेन यः मनुष्यः कुरुक्षेत्रादिपुण्यदेशे, शुभे पुण्ये च काले, उत्तमे च पात्रे प्राप्ते सति प्रत्युपकारदृष्टिं त्यक्त्वा यदपि दानं करोति तत् दानं सात्त्विकं दानम् उच्यते।

**हिन्दी** – दान मेरा कर्तव्य है–इस स्वभाव से जो मनुष्य कुरुक्षेत्रादि पुण्य देश में, शुभ और पुण्य काल में, उत्तम पात्र के प्राप्त होने पर प्रत्युपकार की दृष्टि को छोड़कर जो भी दान करता है, वह दान सात्त्विक दान कहा जाता है।

**आंग्लम्** – That gift which is made to one who can make no return with the feeling that it is one's duty to give and which is given at the right place and time and to a worthy person, that gift is held *sāttvika*.

www.thearyasamaj.org


## निदर्शनम्

(i) व्याकरणम्

(क) **सन्धिः**

| | | |
|---|---|---|
| यद्दानम् | - | यत् + दानम् (जश्त्वसन्धिः) |
| दीयतेऽनुपकारिणे | - | दीयते + अनुपकारिणे (पूर्वरूपसन्धिः) |
| तद्दानम् | - | तत् + दानम् (जश्त्वसन्धिः) |

(ख) **समासः**

| | | |
|---|---|---|
| अनुपकारिणे | - | न उपकारी अनुपकारी (नञ्तत्पुरुषः) तस्मै |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| दातव्यम् | - | दा + तव्यत् |
| देशे | - | दिश् + अच्-देश |
| काले | - | कल् + घञ् |
| पात्रे | - | पा + ष्ट्रन् |
| स्मृतम् | - | स्मृ + क्त |

(घ) **तद्धितान्तः**

| | | |
|---|---|---|
| अनुपकारिणे | - | न + उपकारिणे<br>उपकारः अस्ति अस्य इति उपकारी<br>उपकार + इनि-उपकारिन्<br>चतुर्थीविभक्तौ उपकारिणे |
| सात्त्विकम् | - | सत्त्व + ठञ् |

---

## अभ्यासः - 61
## श्लोकः - 71

1. **उत्तरं लिखत–**

[उत्तर लिखें। Answer the questions.]

(क) दीयते इति क्रियापदस्य कर्म किम्? ---------------------------------

(ख) दीयते इति क्रियापदे मूलधातुः कः? ---------------------------------

(ग) दानं कस्मै दीयते? ---------------------------------

(घ) अनुपकारिणे दत्तं दानं कीदृशं कथितम्? ---------------------------------

www.thearyasamaj.org


2. **कर्मणि/कर्तरि/भावे परिवर्तयत–**

[वाच्य परिवर्तन करें। Change the voice.]

**यथा–** (क) तेन दानं दीयते। **सः दानं ददाति।**

(ख) बालिकया पुस्तकं पठ्यते। ----------------------------------

(ग) मया हस्यते। ----------------------------------

(घ) तया स्थीयते। ----------------------------------

(ङ) हरिणा गृहं गम्यते। ----------------------------------

3. **शब्दरूपं पूरयत–**

[शब्दरूप पूरा करें। Complete the declension.]

| | | एक. | द्वि. | बहु. | प्रातिपदिकम् |
|---|---|---|---|---|---|
| **यथा–** | (क) | **अनुपकारिणे** | **अनुपकारिभ्याम्** | **अनुपकारिभ्यः** | (अनुपकारिन्) |
| | (ख) | ---------- | ---------- | ---------- | (करिन्) |
| | (ग) | स्वामिने | ---------- | ---------- | (स्वामिन्) |
| | (घ) | ---------- | ---------- | ---------- | (धनिन्) |
| | (ङ) | ---------- | ---------- | ---------- | (शशिन्) |
| | (च) | ---------- | ---------- | ---------- | (मानिन्) |

4. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | | | |
|---|---|---|---|
| (i) | दातव्यम् | (क) | ल्युट् |
| (ii) | दानम् | (ख) | ष्ट्रन् |
| (iii) | सात्त्विकम् | (ग) | घञ् |
| (iv) | स्मृतम् | (घ) | तव्यत् |
| (v) | अनुपकारिणे | (ङ) | अच् |
| (vi) | देशे | (च) | क्त |
| (vii) | काले | (छ) | इनि |
| (viii) | पात्रे | (ज) | ठञ् |

www.thearyasamaj.org


5. **प्रकृति-प्रत्ययविभागं कुरुत–**

[प्रकृति-प्रत्यय का विभाग करें। Separate the basis and the suffix.]

**यथा–** (क) दातव्यम् – **दा + तव्यत्**

(ख) पठितव्यम् – ----------------

(ग) गन्तव्यम् – ----------------

(घ) कर्तव्यम् – ----------------

(ङ) ज्ञातव्यम् – ----------------

(च) क्षन्तव्यम् – ----------------

(छ) स्थातव्यम् – ----------------

6. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi.*]

**यथा–** (क) यद्दानम् = **यत् + दानम्**

(ख) दिग्गजः = ------------- + -------------

(ग) दिगम्बरः = ------------- + -------------

(घ) वागीशः = ------------- + -------------

(ङ) चिदानन्दः = ------------- + -------------

(च) जगदीशः = ------------- + -------------

(ठ) षडाननः = ------------- + -------------

(ज) अजन्तः = ------------- + -------------

(झ) सुबन्तः = ------------- + -------------

(ञ) कृदन्तः = ------------- + -------------

www.thearyasamaj.org

# अष्टादशोऽध्यायः

## श्लोकः

**सुखं त्विदानीं त्रिविधं शृणु मे भरतर्षभ ।**
**अभ्यासाद्रमते यत्र दुःखान्तं च निगच्छति ॥72॥** (भ.गी. 18.36)

## पदच्छेदः

सुखम् तु इदानीम् त्रिविधम् शृणु मे भरतर्षभ।
अभ्यासात् रमते यत्र दुःखान्तम् च नि-गच्छति॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सुखम् | अ. नपुं. द्विती. एक. | अभ्यासात् | अ. पुं. पं. एक. |
| तु | अव्ययम् | रमते | रम्-कर्तरि आत्मनेपदे |
| इदानीम् | तद्धितान्तम् अव्ययम् | | लट् प्रपु. एक. |
| त्रिविधम् | अ. नपुं. द्विती. एक. | यत्र | तद्धितान्तम् अव्ययम् |
| | विशेषणम् समस्तम् | दुःखान्तम् | अ. नपुं. द्विती. एक. समस्तम् |
| शृणु | श्रु-कर्तरि लोट् मपु. एक. | च | अव्ययम् |
| मे | अस्मद्-द. (सर्व.) | निगच्छति | नि + गम्-कर्तरि |
| | त्रि. द्विती. एक. | | लट् प्रपु. एक. |
| भरतर्षभ | अ. पुं. सम्बो. एक. समस्तम् | | |

## आकाङ्क्षा

**भरतर्षभ! शृणु।**

| | |
|---|---|
| किं शृणु? | सुखं शृणु। |
| कतिविधं सुखं शृणु? | त्रिविधं सुखं शृणु। |
| कस्मात् त्रिविधं सुखं शृणु? | त्रिविधं सुखं मे (वचनात्) शृणु। |
| कदा शृणु? | इदानीं शृणु। |

**रमते।**

| | |
|---|---|
| कुत्र रमते? | यत्र (त्रिविधे सुखे) रमते। |
| कस्मात् रमते? | अभ्यासात् रमते। |

www.thearyasamaj.org


निगच्छति।

कुत्र च निगच्छति? दुःखान्तं च निगच्छति।

## अन्वयः

यत्र अभ्यासात् रमते दुःखान्तम् च निगच्छति इदानीम् त्रिविधम् सुखम् तु भरतवर्षभ मे (वचनात्) शृणु।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत्र | यस्मिन् | जिसमें | In which |
| अभ्यासात् | परिचयात् | अभ्यास से | from practices |
| रमते | रतिं प्रतिपद्यते | रमण करता हैं | rejoices |
| दुःखान्तम् च | दुःखावसानम् च | दुःख का अन्त | the end of pain |
| निगच्छति | निश्चयेन प्राप्नोति | प्राप्त करता है | attains to |
| इदानीम् | अधुना | अब | now |
| त्रिविधम् | त्रिप्रकारकम् | तीन प्रकार का | threefold |
| सुखम् तु | आनन्दमपि | सुख भी | pleasure indeed |
| भरतर्षभ | भरतश्रेष्ठ अर्जुन! | भरतश्रेष्ठ अर्जुन! | O best of the *Bharatas* |
| मे | मम | मुझसे | me |
| वचनात् | वाक्यात् | वाक्य से | to speech |
| शृणु | आकर्णय | सुनो | hear |

## भावार्थः

**संस्कृतम्** – यस्य सुखस्य आवृत्त्या रतिम्, दुःखोपशमनञ्च प्राप्नोति, तादृश-सत्त्व-रज-स्तमोगुणात्मकं सुखं हे भरतश्रेष्ठ! इदानीं मद्वचनात् शृणु।

**हिन्दी** – हे भरतश्रेष्ठ अर्जुन! तुम अब तीन प्रकार के सुखों को मुझसे सुनो। इन सुखों में प्राणी भक्ति, ध्यान, सेवादि अभ्यास के कारण रमण करता है तथा सभी दुःखों के अन्त को प्राप्त होता है।

**आंग्लम्** – Now hear from me O chief of the *Bharatas* the three kinds of happiness. That in which a man comes to rejoice by long practice and in which he reaches the end of his sorrow.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

**( क ) सन्धिः**

| | | |
|---|---|---|
| त्विदानीम् | = | तु + इदानीम् (यण्सन्धिः) |
| भरतर्षभ | = | भरत + ऋषभ (गुणसन्धिः) |
| अभ्यासाद्रमते | = | अभ्यासात् + रमते (जश्त्वसन्धिः) |
| दुःखान्तम् | = | दुःख + अन्तम् (दीर्घसन्धिः) |

**( ख ) समासः**

| | | |
|---|---|---|
| भरतर्षभ | = | भरतेषु ऋषभ (सप्तमीतत्पुरुषः) |
| दुःखान्तम् | = | दुःखस्य अन्तम् (षष्ठीतत्पुरुषः) तत् |

**( ग ) तद्धितान्तः**

| | | |
|---|---|---|
| इदानीम् | = | इदम् + दानीम् (कालार्थे) |
| यत्र | = | यद् + त्रल् (स्थानार्थे) |

---

## अभ्यासः - 62
### श्लोकः - 72

1. **यथानिर्दिष्टं श्लोकात् पदानि चित्वा लिखत–**

[निर्देशानुसार श्लोक से पद चुनकर लिखें। Write the words from the verse as directed.]

(क) द्वितीयान्तं पदम् - (i) -------- (ii) -------- (iii) --------

(ख) सम्बोधनपदम् - (i) --------

(ग) अव्ययम् - (i) -------- (ii) -------- (iii) -------- (iv) -------

(घ) क्रियापदम् - (i) -------- (ii) -------- (iii) --------

2. **रिक्तस्थानं पूरयत–**

[रिक्त स्थान की पूर्ति करें। Fill in the blanks.]

**यथा–** (क) यत्र = **यद् + त्रल्**

(ख) तत्र = ----------------------

(ग) अत्र = ----------------------

(घ) कत्र = ----------------------

www.thearyasamaj.org


(ङ) सर्वत्र = ----------------------

(च) अन्यत्र = ----------------------

(छ) अपरत्र = ----------------------

3. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

**यथा–** (क) त्विदानीम् = **तु + इदानीम्**

(ख) पठत्वेकः = --------------------

(ग) अन्वयः = --------------------

(घ) मध्वरिः = --------------------

(ङ) भरतर्षभ = **भरत + ऋषभ**

(च) राजर्षिः = --------------------

(ज) ग्रीष्मर्तुः = --------------------

4. **श्लोकं पठित्वा उत्तरं प्रदत्त–**

[श्लोक को पढ़कर उत्तर दें। Answer on the basis of the verse.]

(क) श्लोके सम्बोधनपदम् किम्? ------------------------------

(ख) सुखं कतिविधम् उक्तम्? ------------------------------

(ग) जीवः सुखे कस्मात् रमते? ------------------------------

(छ) श्लोकानुसारं जीवः कं निगच्छति? ------------------------------

(ङ) 'शृणु' इति क्रियापदं कस्मिन् लकारे अस्ति? ------------------------------

5. **श्लोकस्य क्रियापदानां रूपाणि पूरयत–**

[श्लोक में आए क्रियापदों के रूपों को पूरा करें। Fill in the blanks with the verbal forms of the verse.]

| | | | | |
|---|---|---|---|---|
| (क) | प्रपु. | --------- | --------- | --------- |
| | मपु. | **शृणु** | **शृणुतम्** | **शृणुत** |
| | उपु. | --------- | --------- | --------- |
| (ख) | प्रपु. | **रमते** | **रमेते** | **रमन्ते** |
| | मपु. | --------- | --------- | --------- |
| | उपु. | --------- | --------- | --------- |

www.thearyasamaj.org


| | | | | |
|---|---|---|---|---|
| (ग) | प्रपु. | **निगच्छति** | **निगच्छतः** | **निगच्छन्ति** |
| | मपु. | --------- | --------- | --------- |
| | उपु. | --------- | --------- | --------- |

6. **'शृणु' इति कस्मिन् लकारे प्रयुक्तः अस्ति। तस्य लकारस्य श्लोकातिरिक्तानि पञ्च– उदाहरणानि लिखत–**

['शृणु' यह प्रयोग किस लकार में है। उसी लकारे में श्लोकातिरिक्त पाँच उदाहरण लिखे। Which *Lakāra* is used in 'śṛṇu'. Give five more examples of that *lakāra,* different to ones used in the verse.]

---------- ---------- --------- ------------ ---------

7. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिचन वाक्यानि लिखत–**

[दिए गए शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) इदानीम् (ख) श्रु (लटि, लृटि च) (ग) रम् (आत्मनेपदे लटि) (घ) यत्र

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।**
**तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजम् ॥73॥** (भ.गी. 18.37)

**पदच्छेदः**

यत् तत् अग्रे विषम् इव परिणामे अमृत-उपमम्।
तत् सुखम् सात्त्विकम् प्रोक्तम् आत्म-बुद्धि-प्रसादजम्।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यत् | यद्-द. (सर्व.) नपुं. प्र. एक. | अमृतोपमम् | अ. नपुं. प्र. एक. समस्तम् |
| तत् | तद्-द. (सर्व.) नपुं. प्र. एक. | तत् | तद्-द. (सर्व.) नपुं. प्र. एक. |
| अग्रे | अ. पुं. सप्त. एक. क्रिया-विशेषणम् | सुखम् | अ. नपुं. प्र. एक. |
| | | सात्त्विकम् | अ. नपुं. प्र. एक. विशेषणम् |
| विषम् | अ. नपुं. प्र. एक. | प्रोक्तम् | अ. नपुं. प्र. एक. |
| इव | अव्ययम् | आत्मबुद्धि-प्रसादजम् | अ. नपुं. प्र. एक. समस्तम् |
| परिणामे | अ. पुं. सप्त. एक. | | |

**आकाङ्क्षा**

**प्रोक्तम्।**

| | |
|---|---|
| किं प्रोक्तम्? | सात्त्विकं प्रोक्तम्। |
| किं सात्त्विकं प्रोक्तम्? | सुखं सात्त्विकं प्रोक्तम्। |
| कीदृशं सुखं सात्त्विकं प्रोक्तम्? | आत्मबुद्धिप्रसादजं सुखं सात्त्विकं प्रोक्तम्। |
| किम् (इव) आत्मबुद्धिप्रसादजं सुखम् (भवति)? | यत् तद् अग्रे विषमिव (भवति)। |
| यत्तदग्रे विषमिव तद् आत्मबुद्धिप्रसादजं सात्त्विकं सुखं पुनः कीदृशं (भवति)? | यत्तदग्रे विषमिव तद् आत्मबुद्धिप्रसादजं सात्त्विकं परिणामे अमृतोपमम् (भवति)। |

**अन्वयः**

यत् तत् सुखम् अग्रे विषम् इव, परिणामे अमृतोपमम्, आत्मबुद्धिप्रसादजं तत् (सुखं) सात्त्विकं प्रोक्तम्।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत् तत् सुखम् | यत् सुखम् | जो वह सुख | Which that pleasure |
| अग्रे | प्रारम्भे | प्रारम्भ में | at first |
| विषम् इव | हलाहलः इव | विष की तरह | like poison |
| परिणामे | फले | फल में | as a result |
| अमृतोपमम् | पीयूषसदृशम् | अमृत के तुल्य है | like nectar |
| आत्मबुद्धि-प्रसादजम् | भगवद्विषयकबुद्धेः प्रसादात् उत्पन्नम् | भगवान् विषयक बुद्धि के प्रसाद से उत्पन्न | Purity of one & own mind due to self realization |
| तत् | स आनन्दः | वह सुख | That pleasure |
| सात्त्विकम् | सत्त्वगुणयुक्तम् | सात्त्विक | *Sāttvika* |
| प्रोक्तम् | कथितम् | कहा गया है | is declared |

**भावार्थः**

**संस्कृतम्** – यत् सुखं प्रारम्भे विषसदृशं अस्ति; परन्तु तस्य फलं पीयूषतुल्यं वर्तते। भगवद्विषयकबुद्धेः प्रसादात् उत्पन्नं तत् सुखं सत्त्वगुणयुक्तं कथितम् अस्ति।

**हिन्दी** – जो सुख प्रारम्भ में विष के समान है; परन्तु उसका फल अमृत के समान है। भगवान् विषयक बुद्धि के प्रसाद से उत्पन्न वह सुख सात्त्विक कहा गया है।

**आंग्लम्** – That which is like poison at first but like nectar at the end that happiness is said to be *sāttvika* born of the translucence of intellect due to self-realization.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

तदग्रे – तत् + अग्रे (जश्त्वसन्धिः)

परिणामेऽमृतोपमम् – परिणामे + अमृत + उपमम्

(पूर्वरूपसन्धिः) (गुणसन्धिः)

www.thearyasamaj.org



**(ख) समासः**

| | | |
|---|---|---|
| अमृतोपमम् | - | अमृतेन उपमम् (तृतीयातत्पुरुषः) |
| आत्मबुद्धिप्रसादजम् | - | प्रसादात् जायते इति प्रसादजम् (उपपदतत्पुरुषः)<br>आत्मनः बुद्धिः - आत्मबुद्धिः (षष्ठीतत्पुरुषः)<br>आत्मबुद्धेः प्रसादजम् (षष्ठीतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| विषम् | - | विष् + क |
| परिणामे | - | परि + नम् + घञ् |
| प्रोक्तम् | - | प्र + ब्रू + क्त |
| बुद्धि | - | बुध् + क्तिन् |
| प्रसाद | - | प्र + सद् + घञ् |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| सात्त्विकम् | - | सत्त्व + ठञ् |
| अग्रे | - | अङ्ग + रन् - अग्र |

**(ङ) कारकम्**

| | | |
|---|---|---|
| अमृतेन उपमम् | - | तुल्ययोगे तृतीया |

---

## अभ्यासः - 63

### श्लोकः - 73

1. **समानार्थकं शब्दं लिखत–**

[समानार्थक शब्द लिखें। Write the synonyms.]

(क) अग्रे = --------------

(ख) विषम् = --------------

(ग) परिणामे = --------------

(घ) प्रोक्तम् = --------------

(ङ) अमृतोपमम् = --------------

2. **प्रदत्तानां पदानां प्रातिपदिकं लिखत–**

[दिए गए पदों के प्रातिपदिक लिखें। Write the nominal stem of given words.]

(क) यत् = **यद्**

(ख) तत् = --------------

www.thearyasamaj.org



(ग) सुखम् = --------------

(घ) परिणामे = --------------

(ङ) अमृतोपमम् = --------------

3. **समाधत्त–**

[समाधान दें। Answer the questions.]

(क) किं सुखं सात्त्विकं प्रोक्तम्? --------------------------------

(ख) सात्त्विकं सुखं अग्रे कीदृशं भवति? --------------------------------

(ग) सात्त्विकं सुखं परिणामे कीदृशं भवति? --------------------------------

(घ) 'अमृतोपमम्' इत्यत्र कः समासः? --------------------------------

4. **प्रकृति-प्रत्ययं लिखत–**

[प्रकृति-प्रत्यय लिखें। Write the basis and the suffix.]

**यथा–** (क) प्रोक्तम् = **प्र + ब्रू + क्त**

(ख) उक्तम् = -------------------------

(ग) सुस्नातम् = -------------------------

(घ) संस्तुतम् = -------------------------

(ङ) भणितम् = -------------------------

(च) ज्ञातम् = -------------------------

5. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match appropriately.]

| | |
|---|---|
| (क) यद् | (i) अ. नपुं. प्र. एक. |
| (ख) अग्रे | (ii) द. नपुं. प्र. एक. |
| (ग) इव | (iii) अ. नपुं. प्र. एक. क्तान्तम् |
| (घ) प्रोक्तम् | (iv) अ. पुं. सप्त. एक. |
| (ङ) सुखम् | (v) अव्ययम् |

www.thearyasamaj.org



6. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरणानुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

**यथा–** (क) आत्मप्रसादः = **आत्मनः प्रसादः**

(ख) आत्मविश्वासः = --------------------

(ग) आत्मसाक्षात्कारः = --------------------

(घ) आत्मसंयमः = --------------------

(ङ) आत्मबोधः = --------------------

(च) आत्मचिन्तनम् = --------------------

(छ) आत्मदर्शनम् = --------------------

7. **श्लोकानुसारम् अन्वयं पूरयत–**

[श्लोक के अनुसार अन्वय की पूर्ति करें। Complete the construction on the basis of the verse.]

यत् ------- ------- -------- विषम् ------, ------------- अमृतोपमम्,
------------------------ ------ -------- सात्त्विकं --------------।

www.thearyasamaj.org


**श्लोकः**

**विषयेन्द्रियसंयोगाद्यत् तदग्रेऽमृतोपमम् ।**
**परिणामे विषमिव तत् सुखं राजसं स्मृतम् ॥74॥** (भ.गी. 18.38)

**पदच्छेदः**

विषय-इन्द्रिय-संयोगात् यत् तत् अग्रे अमृत-उपमम्।
परिणामे विषम् इव तत् सुखम् राजसम् स्मृतम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| विषयेन्द्रियसंयोगात् | अ. पुं. पं. एक. समस्तम् | विषम् | अ. नपुं. प्र. एक. |
| यत् | यद्–द.(सर्व.) नपुं. प्र. एक. | इव | अव्ययम् |
| तत् | तद्–द.(सर्व.) नपुं. प्र. एक. | तत् | तद्–द.(सर्व.) नपुं. प्र. एक. |
| अग्रे | अ. पुं. सप्त. एक. | सुखम् | अ. नपुं. प्र. एक. |
| अमृतोपमम् | अ. नपुं. प्र. एक. समस्तम् | राजसम् | अ. नपुं. प्र. एक. |
| परिणामे | अ. पुं. सप्त. एक. | स्मृतम् | अ. नपुं. प्र. एक. |

**आकाङ्क्षा**

**स्मृतम्।**

| | |
|---|---|
| कीदृशं स्मृतम्? | राजसं स्मृतम्। |
| किं राजसं स्मृतम्? | तत् सुखं राजसं स्मृतम्। |
| कीदृशं तत् सुखं राजसं स्मृतम्? | यत् तद् अमृतोपमं सुखं राजसं स्मृतम्। |
| यत् कदा अमृतोपमम्? | यत् अग्रे अमृतोपमम्। |
| पुनश्च किम् इव तत् सुखम्? | विषम् इव तत् सुखम्। |
| कदा विषमिव? | परिणामे विषमिव। |
| यत् अग्रे अमृतोपमम्, परिणामे विषम् इव, तत् कस्मात्? | विषयेन्द्रियसंयोगात् तत् अग्रे अमृतोपमम्, परिणामे विषम् इव। |

www.thearyasamaj.org


**अन्वयः**

यत् तत् (सुखं) विषयेन्द्रियसंयोगात् अग्रे अमृतोपमम्, परिणामे विषम् इव, तत् सुखं राजसं स्मृतम्।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत् तत् | यत् सुखम् | जो वह सुख | That Pleasure |
| विषयेन्द्रिय-संयोगात् | विषयाणाम् इन्द्रियाणां च संयोगात् | विषयों और इन्द्रियों के संयोग से | from the contact of the sense organ with the object |
| अग्रे | प्रारम्भे (भोगकाले) | प्रारम्भ में (भोग काल में) | at first |
| अमृतोपमम् | पीयूषसमम् | पीयूष के समान | like nectar |
| परिणामे | फले | परिणाम में | in the end |
| विषमिव | गरलम् इव | जहर की तरह | like poison |
| तत् सुखम् | तादृशं सौख्यम् | वह सुख | that pleasure |
| राजसम् | रजोगुणयुक्तं | राजस | *Rājasa* |
| स्मृतम् | प्रोक्तम् | कहा गया है | is said |

**भावार्थः**

**संस्कृतम्** – यत् सुखम् इन्द्रियाणां तेषां विषयाणां च सन्निकर्षात् भोगकाले अमृतेन समम्, परं फलकाले च गरलम् इव भवति, तादृशं सुखं रजोगुणयुक्तत्वात् राजसम् उच्यते।

**हिन्दी** – जो सुख इन्द्रियों और उनके विषयों के संयोग से भोग काल में तो अमृत के समान परन्तु फल काल में विष के समान होता है, वह सुख रजोगुण से युक्त होने के कारण राजस कहा जाता है।

**आंग्लम्** – The happiness which arises from the contact of the senses and their objects and which like nectar at first but like poison at the end it is held to be *Rājasika*.

www.thearyasamaj.org


## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

विषयेन्द्रियसंयोगाद्यत् – विषय + इन्द्रियसंयोगात् + यत्

(गुणसन्धिः) (जश्त्वसन्धिः)

तदग्रेऽमृतोपमम् – तत् + अग्रे + अमृत + उपमम्

(जश्त्वसन्धिः) (पूर्वरूपसन्धिः) (गुणसन्धिः)

(ख) **समासः**

विषयेन्द्रियसंयोगात् – विषयाश्च इन्द्रियाणि च विषयेन्द्रियाणि (द्वन्द्वः)
विषयेन्द्रियाणां संयोगः विषयेन्द्रियसंयोगः
(षष्ठीतत्पुरुषः) तस्मात्

अमृतोपमम् – अमृतेन उपमम् (तृतीयातत्पुरुषः)

(ग) **कृदन्तः**

विषय – वि + सि + अच्

संयोगात् – सं + युज् + घञ् – संयोग

स्मृतम् – स्मृ + क्त

(घ) **तद्धितान्तः**

राजसम् – रजस् + अण् [रजसा निर्मितम्]

(ङ) **व्युत्पत्तिः**

विषयः – "विषिण्वन्ति स्वात्मकतया विषयिणं सम्बध्नन्ति।"

---

**अभ्यासः – 64**

**श्लोकः – 74**

1. **असमानं शब्दं पृथक् कुरुत–**

[असमान शब्द को अलग करें। Separate the odd word.]

(क) अमृतम्, सुधा, अजरः, पीयूषः ------------------------

www.thearyasamaj.org


(ख) परिणामः, फलम्, परिपाकः, परिमाणम् ------------------------

(ग) सुखम्, वेदनम्, आनन्दः, प्रसादः ------------------------

(घ) स्मृतम्, उक्तम्, भणितम्, दृष्टम् ------------------------

2. **विसन्धिं कुरुत–**

[विसन्धि करें। Disjoin the *Sandhi*.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** (क) | अमृतोपमम् | = | **अमृत** | + | **उपमम्** |
| (ख) | गुणोदयः | = | ---------- | + | ---------- |
| (ग) | तेनोक्तम् | = | ---------- | + | ---------- |
| (घ) | नरोत्तमः | = | ---------- | + | ---------- |
| (ङ) | विषयेन्द्रियम् | = | **विषय** | + | **इन्द्रियम्** |
| (च) | कर्मेन्द्रियम् | = | ---------- | + | ---------- |
| (छ) | ज्ञानेन्द्रियम् | = | ---------- | + | ---------- |
| (ज) | गणेशः | = | ---------- | + | ---------- |
| (झ) | रमेशः | = | ---------- | + | ---------- |

3. **श्लोकं पठित्वा उत्तरं प्रदत्त–**

[श्लोक पढ़कर उत्तर दें। Answer on the basis of the verse.]

(क) श्लोके कीदृशः संयोगः प्रोक्तः? ----------------------------------

(ख) राजसं सुखं किम् अस्ति? ----------------------------------

(ग) राजस-सुखस्य परिणामः कः? ----------------------------------

(घ) 'राजसम्' इत्यत्र कः प्रत्ययः? ----------------------------------

4. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक के अन्वय को पूरा करें। Complete the construction of the verse.]

यत् -------- (सुखं)------------------ अग्रे ---------------------, परिणामे ---------- ------तत् ------ --------- स्मृतम्।

www.thearyasamaj.org


5. **यथोचितं योजयत–**

| | | | |
|---|---|---|---|
| (क) | परिणामे | (i) | घ |
| (ख) | इन्द्रियम् | (ii) | अच् |
| (ग) | राजसम् | (iii) | क्त |
| (घ) | स्मृतम् | (iv) | घञ् |
| (ङ) | विषयः | (v) | अण् |

6. **राजसं सुखं सात्त्विक-सुखात् कथं भिन्नम्? पञ्चषु वाक्येषु लिखत–**

[राजस-सुख व सात्त्विक-सुख में क्या भेद है? पाँच वाक्यों में लिखें। Write five sentences about the difference between *Rājasa Sukha* and *Sāttvika Sukha*.]

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

---------------------------------------------------------------

www.thearyasamaj.org


## श्लोकः

**यदग्रे चानुबन्धे च सुखं मोहनमात्मनः ।**
**निद्रालस्य प्रमादोत्थं तत्तामससमुदाहृतम् ॥75॥** (भ.गी. 18.39)

## पदच्छेदः

यत् अग्रे च अनुबन्धे च सुखम् मोहनम् आत्मनः।
निद्रा-आलस्य-प्रमादोत्थम् तत् तामसम् उदाहृतम्॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यत् | यद्–द.(सर्व.) नपुं. प्र. एक. | आत्मनः | न. पुं. षष्ठी. एक. |
| अग्रे | अ. पुं. स. एक. | निद्रालस्य-प्रमादोत्थम् | अ. नपुं. प्र. एक. समस्तम् |
| च | अव्ययम् | | |
| अनुबन्धे | अ. पुं. सप्त. एक. | तत् | तद्–द. (सर्व.) नपुं. प्र. एक. |
| च | अव्ययम् | तामसम् | अ. नपुं. प्र. एक. |
| सुखम् | अ. नपुं. प्र. एक. | उदाहृतम् | अ. नपुं. प्र. एक. |
| मोहनम् | अ. नपुं. प्र. एक. | | |

## आकाङ्क्षा

**तत् उदाहृतम्।**

| | |
|---|---|
| तत् कीदृशम् उदाहृतम्? | तत् तामसम् उदाहृतम्। |
| किं तत् तामसम् उदाहृतम्? | तत् सुखं तामसम् उदाहृतम्। |
| कीदृशं तत् सुखं तामसम् उदाहृतम्? | यत् निद्रालस्यप्रमादोत्थं सुखं तत् तामसम् उदाहृतम्। |
| निद्रालस्यप्रमादोत्थं सुखम् किं कारकम्? | निद्रालस्यप्रमादोत्थं सुखं मोहनम्। |
| कस्य मोहनम्? | आत्मनः मोहनम्। |
| कदा आत्मनः मोहनम्? | अग्रे आत्मनः मोहनम्। |
| पुनश्च कदा आत्मनः मोहनम्? | अनुबन्धे च आत्मनः मोहनम्। |

## अन्वयः

यत् सुखं निद्रालस्यप्रमादोत्थम् अग्रे अनुबन्धे च आत्मनः मोहनम्, तत् तामसम् उदाहृतम्।

www.thearyasamaj.org


**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत् सुखम् | यः प्रहर्षः | जो सुख | The pleasure |
| निद्रालस्य-प्रमादोत्थम् | सुप्ति-अलसशीलता-अनवधानतादिभिः जातं | निद्रा-आलस्य-अनवधानता आदि से उत्पन्न | arising from sleep indolence and head lessness |
| अग्रे च | प्रारम्भे | प्रारम्भ में | in the first |
| अनुबन्धे च | परिणामे च | फल काल में | in the sequel |
| आत्मनः | जीवस्य | जीवात्मा का | the self |
| मोहनम् | मोहकरः | मोहित करने वाला है | delusive |
| तत् | तादृशं सुखम् | वह सुख | that pleasure |
| तामसम् | तमोगुणयुक्तम् | तमोगुण से युक्त तामस | *Tāmasa* |
| उदाहृतम् | कथितम् | कहा गया है | is declared |

**भावार्थः**

**संस्कृतम्** – यत् सुखं स्वापस्य, जडतायाः अनवधानतायाः च कारणात् उत्पन्नं, तत् भोगकाले फलकाले चापि जीवात्मानं मोहयति। तादृशं सुखं तमोगुणयुक्तं तामसम् इति कथ्यते।

**हिन्दी** – जो सुख निन्द, जडता और अनवधानता के कारण उत्पन्न होकर न केवल भोग काल में अपितु फल के समय जीवात्मा को मोहित करता है, वैसा सुख तमोगुणयुक्त होने के कारण तामस कहा जाता है।

**आंग्लम्** – That happiness which deludes the self both at the beginning and at the end which arises from sleep, sloth and misco mpre hension that is declared to be *Tāmasika*.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

यदग्रे – यत् + अग्रे (जश्त्वसन्धिः)

चानुबन्धे – च + अनुबन्धे (दीर्घसन्धिः)

निद्रालस्यप्रमादोत्थम् – निद्रा + आलस्यप्रमादोत्थम् (दीर्घसन्धिः)

www.thearyasamaj.org


**(ख) समासः**

| | | |
|---|---|---|
| निद्रालस्यप्रमादोत्थम् | - | निद्रा च आलस्यं च प्रमादः च निद्रालस्यप्रमादाः (द्वन्द्वः)<br>निद्रालस्यप्रमादेभ्यः उत्तिष्ठति इति निद्रालस्यप्रमादोत्थम् (उपपदतत्पुरुषः) |

**(ग) कृदन्तः**

| | | |
|---|---|---|
| अनुबन्धे | = | अनु + बन्ध् + घञ् - अनुबन्ध |
| मोहनम् | = | मुह् + णिच् + ल्युट् |
| निद्रा | = | निन्द् + रक् + टाप् |
| प्रमाद | = | प्र + मद् + घञ् |
| उदाहृतम् | = | उत् + आ + हृ + क्त |

**(घ) तद्धितान्तः**

| | | |
|---|---|---|
| आलस्य | = | अलसस्य भावः, अलस + ष्यञ् |
| तामसम् | = | तमसा निर्मितम्, तमस् + अण् |

---

## अभ्यासः - 65
## श्लोकः - 75

1. **श्लोकानुसारम् उचितेन पदेन रिक्तं स्थानं पूरयत–**

[श्लोकानुसार उचित पद से रिक्त स्थान की पूर्ति करें। Fill in the blanks with appropriate words from the verse.]

यदग्रे ------------------ ----- सुखं ----------------।

--------------- प्रमादोत्थं --------------------------॥

2. **यथानिर्देशं श्लोकात् पदानि चित्वा लिखत–**

[यथानिर्देश श्लोक से पद चुनकर लिखें। Write the words from the verse as directed.]

(क) प्रथमान्तपदम् - (i) ---------- (ii) ---------- (iii) ----------
(iv) --------- (v) ---------- (vi) ----------

(ख) सप्तम्यन्तपदम् - (i) ---------- (ii) -----------

(ग) षष्ठ्यन्तपदम् - (i) ----------

www.thearyasamaj.org


3. **श्लोकस्य भावार्थं पूरयत–**

[श्लोक का भावार्थ पूरा करें। Complete the meaning of the verse.]

यत् सुखं --------- ----------- अनवधानतायाः च --------- ------, तत् ------------ ----------- चापि ------------ ----------। तादृशं सुखं ------------------- --------- इति ------------।

4. **यथोचितं योजयत–**

[यथोचित जोड़ें। Match with the appropriate one.]

| | |
|---|---|
| (क) अनुबन्धः | (i) अनवधानता |
| (ख) मोहनम् | (ii) जीवस्य |
| (ग) प्रमादः | (iii) परिणामः |
| (घ) तामसम् | (iv) कथितम् |
| (ङ) उदाहृतम् | (v) मोहकर्ता |
| (च) आत्मनः | (v) तमोगुणयुक्तम् |

5. **श्लोकानुसारं सत्यम् ☑ असत्यम् ☒ वा सूचयत–**

[श्लोकानुसार सत्य ☑ या असत्य ☒ सूचित करें। Mention right ☑ or wrong ☒ as per verse.]

(क) तामसं सुखं प्रारम्भे आत्मनः मोहनम् अस्ति। ( )

(ख) तामसं सुखं प्रमादोत्थं कथ्यते। ( )

(ग) निद्रया उद्भूतं सुखं तामसं न भवति। ( )

(घ) तामसं सुखं परिणामकाले आत्मानं न मोहयति। ( )

(ङ) आलस्येन जनितं सुखं तामसम् उदाहृतम्। ( )

6. **शब्दरूपं पूरयत–**

[शब्द रूप पूरा करें। Complete the declensions.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** | (क) | **यत्** | **ये** | **यानि** | (यद्) |
| | (ख) | -------- | -------- | -------- | (तद्) |
| | (ग) | -------- | -------- | -------- | (किम्) |
| | (घ) | -------- | -------- | -------- | (सर्व) |

www.thearyasamaj.org



7. **रिक्तस्थानं पूरयत–**

[रिक्त स्थान की पूर्ति करें। Fill in the blanks.]

| विभक्तिः | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्र. | आत्मा | ---------- | ---------- |
| द्विती. | ---------- | ---------- | आत्मनः |
| तृ. | आत्मना | ---------- | ---------- |
| च. | ---------- | ---------- | आत्मभ्यः |
| पं. | आत्मनः | ---------- | ---------- |
| षष्ठी. | ---------- | आत्मनोः | ---------- |
| सप्त. | आत्मनि | ---------- | ---------- |
| सम्बो.एक | ---------- | हे आत्मनौ! | ---------- |

8. **श्लोकस्य भावार्थं स्ववाक्यैः लिखत–**

[श्लोक का भावार्थ अपने वाक्यों में लिखें। Write the meaning of the verse in your own sentences.]

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।**
**भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया ॥76॥** (भ.गी. 18.61)

**पदच्छेदः**

ईश्वरः सर्व–भूतानाम् हृद्–देशे अर्जुन तिष्ठति।
भ्रामयन् सर्व-भूतानि यन्त्र-आरूढानि मायया।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| ईश्वरः | अ. पुं. प्र. एक. | भ्रामयन् | भ्रामयत्–त. पुं. प्र. एक. |
| सर्वभूतानाम् | अ. नपुं. षष्ठी बहु. समस्तम् | सर्वभूतानि | अ. नपुं. द्विती. बहु. समस्तम् |
| हृद्देशे | अ. पुं. सप्त. एक. समस्तम् | यन्त्रारूढानि | अ. नपुं. द्विती. बहु. समस्तम् |
| अर्जुन | अ. पुं. सम्बो. एक. | मायया | आ. स्त्री. तृ. एक. |
| तिष्ठति | स्था–कर्तरि लट्. प्रपु. एक. | | |

**आकाङ्क्षा**

| | |
|---|---|
| पद्ये कः सम्बोधितः? | पद्ये अर्जुनः सम्बोधितः। |
| **तिष्ठति।** | |
| अर्जुन! कः तिष्ठति? | अर्जुन! ईश्वरः तिष्ठति। |
| कुत्र तिष्ठति? | हृद्देशे तिष्ठति। |
| केषां हृद्देशे तिष्ठति? | सर्वभूतानां हृद्देशे तिष्ठति। |
| ईश्वरः किं कुर्वन् सर्वभूतानां हृद्देशे तिष्ठति? | भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति। |
| कया भ्रामयन्? | मायया भ्रामयन्। |
| मायया कानि भ्रामयन् तिष्ठति? | मायया सर्वभूतानि भ्रामयन् तिष्ठति। |
| कीदृशानि सर्वभूतानि भ्रामयन्? | यन्त्रारूढानि सर्वभूतानि भ्रामयन्। |

**अन्वयः**

अर्जुन! ईश्वरः यन्त्रारूढानि सर्वभूतानि मायया भ्रामयन् सर्वभूतानां हृद्देशे तिष्ठति।

www.thearyasamaj.org


## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| अर्जुन! | कुन्तीपुत्र! | हे अर्जुन! | *Arjuna!* |
| ईश्वरः | परमात्मा | परमात्मा | the Lord |
| यन्त्रारूढानि (इव) | यन्त्राणि अधिष्ठितानीव | शरीररूपी यन्त्र पर सवार | mounted on a machine |
| सर्वभूतानि | सर्वे प्राणिनः | सभी प्राणियों को | of all beings |
| मायया | माया द्वारा | माया से | by illusion |
| भ्रामयन् | भ्रमणं कारयन् | भ्रमण कराते हुए | causing to revolve |
| सर्वभूतानां | सर्वेषां प्राणिनां | सभी प्राणियों के | of all the beings |
| हृद्देशे | हृदये | हृदय में | in the heart |
| तिष्ठति | वसति | रहता है | dwells |

## भावार्थः

**संस्कृतम्** – हे अर्जुन! परमात्मा सर्वेषाम् अपि प्राणिनां हृदये वसति तथा स्वमायया शरीरमयं यन्त्रम् आरूढान् सर्वान् अपि प्राणिनः भ्रामयति।

**हिन्दी** – हे अर्जुन! परमात्मा सभी प्राणियों के हृदय में रहता है तथा अपनी माया से शरीररूपी यन्त्र पर सवार हो सभी प्राणियों को घुमाता रहता है।

**आंग्लम्** – The Lord dwells in the hearts of all beings O *Arjuna!* and by his *Māyā* causes all beings to resolve as though mounted on a machine.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

हृद्देशेऽर्जुन – हृद्देशे + अर्जुन (पूर्वरूपसन्धिः)

यन्त्रारूढानि – यन्त्र + आरूढानि (दीर्घसन्धिः)

(ख) **समासः**

सर्वभूतानाम् – सर्वाणि च तानि भूतानि (कर्मधारयः) तेषाम्

हृद्देशे – हृदः देशः हृद्देशः (षष्ठीतत्पुरुषः) तस्मिन्

www.thearyasamaj.org


| | | |
|---|---|---|
| सर्वभूतानि | - | सर्वाणि च तानि भूतानि (कर्मधारयः) |
| यन्त्रारूढानि | - | यन्त्रम् आरूढानि (द्वितीयातत्पुरुषः)<br>(यन्त्रे इव आरूढानि) |

(ग) **कृदन्तः**

| | | |
|---|---|---|
| भूतानि | - | भू + क्त - भूत |
| भ्रामयन् | - | भ्रम् + णिच् + शतृ - भ्रामयत् |
| आरूढानि | - | आ + रुह् + क्त - आरूढ |

---

## अभ्यासः - 66
## श्लोकः - 76

1. **अधोलिखितपदानां प्रातिपदिकं, लिङ्गं, विभक्तिं वचनं च लिखत–**

[अधोलिखित पदों के प्रातिपदिक, लिङ्ग, विभक्ति एवं वचन का निर्देश करें। Point out the nominal base, gender, Case endings and number of the following words.]

| | | | प्रातिपदिकम् | लिङ्गम् | विभक्तिः | वचनम् |
|---|---|---|---|---|---|---|
| **यथा–** (क) ईश्वरः | = | | **ईश्वर** | **पुं.** | **प्र.** | **एक.** |
| (ख) सर्वभूतानाम् | = | | -------- | ---- | ---- | ---- |
| (ग) हृद्देशे | = | | -------- | ---- | ---- | ---- |
| (घ) अर्जुन | = | | -------- | ---- | ---- | ---- |
| (ङ) मायया | = | | -------- | ---- | ---- | ---- |
| (च) यन्त्रारूढानि | = | | -------- | ---- | ---- | ---- |
| (छ) भ्रामयन् | = | | -------- | ---- | ---- | ---- |

2. **क्रियारूपं पूरयत–**

[क्रियारूप पूरा करें। Complete the verbal forms.]

| | | | | | | |
|---|---|---|---|---|---|---|
| **यथा–** | **तिष्ठति** | -------- | **तिष्ठन्ति** | **स्थास्यति** | -------- | ------- |
| | **तिष्ठसि** | -------- | ------ | ------ | **स्थास्यथः** | ------- |
| | ------ | -------- | **तिष्ठामः** | ------ | -------- | ------- |

www.thearyasamaj.org


3. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write the analytical sentence.]

(क) सर्वभूतानि = ------------------------------

(ख) यन्त्रारूढाणि = ------------------------------

(ग) हृद्देशे = ------------------------------

(घ) नाभिदेशे = ------------------------------

(ङ) कण्ठदेशे = ------------------------------

4. **यथानिर्देशं शब्दरूपं लिखत–**

[यथा निर्देश शब्दरूप लिखें। Write the declension as directed.]

| | | | | | **णिचि** | | | |
|---|---|---|---|---|---|---|---|---|
| **यथा–** (i) | (भ्रम्) | भ्रमन् | → | **भ्रामयन्** | **भ्रामयन्तौ** | **भ्रामयन्तः** | (प्रथमा) |
| (ii) | (पठ्) | पठन् | → | ------- | -------- | -------- | (द्वितीया) |
| (iii) | (क्रीड्) | क्रीडन् | → | ------- | -------- | -------- | (तृतीया) |
| (iv) | (हस्) | हसन् | → | ------- | -------- | -------- | (चतुर्थी) |
| (v) | (दृश्) | पश्यन् | → | दर्शयतः | -------- | -------- | (पञ्चमी) |
| (vi) | (पा) | पिबत् | → | ------- | -------- | पाययताम् | (षष्ठी) |
| (vii) | (स्था) | तिष्ठन् | → | स्थापयति | -------- | -------- | (सप्तमी) |

5. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान भरें। Fill in the blanks as shown in the example.]

**यथा–** (क) आरूढम् = **आ + रुह् + क्त**

(ख) सोढम् = सह् + -------

(ग) ऊढम् = वह् + -------

(घ) लीढम् = ---- + -------

6. **प्रश्नानाम् उत्तरं प्रदत्त–**

[प्रश्नों के उत्तर दें। Answer the questions.]

(क) हृद्देशे कः तिष्ठति? ------------------------------------

(ख) 'हृद्देशे' इत्यत्र कः समासः? ------------------------------------

(ग) 'यन्त्रारूढानि' कस्य विशेषणम्? ------------------------------------

(घ) भूतानां भ्रामकतयां का कारणभूता? ------------------------------------

www.thearyasamaj.org



**श्लोकः**

**तमेव शरणं गच्छ सर्वभावेन भारत ।**
**तत्प्रसादात्परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम् ॥77॥** (भ.गी. 18.62)

**पदच्छेदः**

तम् एव शरणम् गच्छ सर्व–भावेन भारत।
तत्–प्रसादात् पराम् शान्तिम् स्थानम् प्र–आप्स्यसि शाश्वतम्॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| तम् | तद्–द. सर्व. पुं. द्विती. एक. | तत्प्रसादात् | अ. पुं. पं. एक समस्तम् |
| एव | अव्ययम् | पराम् | आ.स्त्री.द्विती. एक. विशेषणम् |
| शरणम् | अ. नपुं. द्विती. एक. | शान्तिम् | इ. स्त्री. द्विती. एक. |
| गच्छ | गम्–कर्तरि लोट् मपु. एक. | स्थानम् | अ. नपुं. द्विती. एक. |
| सर्वभावेन | अ. पुं. तृ. एक. समस्तम् | प्राप्स्यसि | प्र+आप्–कर्तरि लृट् मपु. एक. |
| भारत | अ. पुं. सम्बो. एक. | शाश्वतम् | अ. नपुं. द्विती. एक. विशेषणम् |

**आकाङ्क्षा**

**गच्छ।**

| | |
|---|---|
| हे भारत! (त्वं) कुत्र गच्छ? | हे भारत! (त्वं) शरणं गच्छ। |
| कं शरणं गच्छ? | तमेव (ईश्वरं) शरणं गच्छ। |
| केन प्रकारेण शरणं गच्छ? | सर्वभावेन शरणं गच्छ। |

**प्राप्स्यसि।**

| | |
|---|---|
| किं प्राप्स्यसि? | शान्तिं प्राप्स्यसि। |
| कीदृशीं शान्तिम्? | परां शान्तिम्। |
| अन्यत् किं प्राप्स्यसि? | स्थानं प्राप्स्यसि। |
| कीदृशं स्थानं प्राप्स्यसि? | शाश्वतं स्थानं प्राप्स्यसि। |
| कस्मात् शान्तिं स्थानं (च) प्राप्स्यसि? | तत्प्रसादात् शान्तिं स्थानं (च) प्राप्स्यसि। |

**अन्वयः**

हे भारत! सर्वभावेन तमेव शरणं गच्छ, तत्प्रसादात् परां शान्तिं, शाश्वतं स्थानं च प्राप्स्यसि।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हे भारत! | अर्जुन | हे अर्जुन | *Arjuna!* |
| तमेव | ईश्वरमेव | उस ईश्वर की ही | to him only |
| शरणं गच्छ | आश्रयं याहि | शरण में जाओ | take refuge |
| तत्प्रसादात् | तस्य अनुकम्पायाः | उसकी कृपा से | by his grace |
| परां | परमां | परम | supreme |
| शान्तिं | शान्तिम् | शान्ति को | peace |
| शाश्वतम् | नित्यम् | नित्य | eternal |
| स्थानं च | पदमपि | पद भी | adobe also |
| प्राप्स्यसि | लप्स्यसे | प्राप्त करोगे | shall obtain |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! त्वं सम्पूर्णभावनया तं परमप्रभुम् एव आश्रयं गच्छ। तस्य कृपावशात् त्वम् अवश्यमेव परमां प्रशान्तिं सनातनं पदं च लप्स्यसे।

**हिन्दी** – हे अर्जुन! तुम अपनी सम्पूर्ण भावना से उस ईश्वर की ही शरण में जाओ। उसकी कृपा से तुम अवश्य ही परम प्रशान्ति व अविनाशी पद को प्राप्त करोगे।

**आंग्लम्** – Seek refuge in him alone with all your heart. O *Bhārat*! By His grace you will gain supreme peace an the eternal abode.

**निदर्शनम्**

(i) **व्याकरणम्**

(क) **सन्धिः**

तत्प्रसादात् – तद् + प्रसादात् (चर्त्वसन्धिः)

(ख) **समासः**

सर्वभावेन – सर्वश्चासौ भावः सर्वभावः (कर्मधारयः) तेन

तत्प्रसादात् – तस्य प्रसादः तत्प्रसादः (षष्ठीतत्पुरुषः) तस्मात्

(ग) **कृदन्तः**

शरणम् – शृ + ल्युट्

शान्तिम् – शम् + क्तिन्

www.thearyasamaj.org


(घ) **तद्धितान्तः**

भारत - भरत + अण्

शाश्वतम् - शश्वत् + अण्

(ङ) **व्युत्पत्तिः**

भारत - भरतस्य अपत्यम्, भाः (ज्ञाने) रतः

(ii) **पर्यायः**

शाश्वतम् - नित्यम्, सनातनम्, चिरस्थायि, अविनाशि,

**अवधेयम्**

**कारकविषये**

---

## अभ्यासः - 67

### श्लोकः - 77

1. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर दें। Read the verse and answer the questions.]

(क) 'भारत' इति कस्य सम्बोधनम् अस्ति? ------------------------------

(ख) 'तत्प्रसादात्' इत्यत्र कस्य प्रसादः उक्तः? ------------------------------

(ग) शाश्वतम् इत्यस्य कः अर्थः अस्ति? ------------------------------

(घ) सर्वभावेन इत्यत्र कः समासः? ------------------------------

(ङ) गच्छ इत्यत्र कः लकारः? ------------------------------

2. **समानार्थकं शब्दं लिखत–**

[समानार्थक शब्द लिखें। Write the synonyms.]

(क) शरणम् = ------------------

(ख) प्रसादः = ------------------

(ग) शाश्वतम् = ------------------

(घ) पराम् = ------------------

www.thearyasamaj.org


3. **विपरीतार्थकं शब्दं लिखत–**

[विपरीतार्थक शब्द लिखें। Write the antonyms.]

**यथा–** (क) प्रसादः = **विषादः**

(ख) शान्तिः = ------------------

(ग) प्राप्स्यसि = ------------------

(घ) शाश्वतम् = ------------------

(ङ) शरणम् = ------------------

4. **रिक्तस्थानस्य पूर्तिं यथोदाहरणं कुरुत–**

[यथोदाहरण रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

**यथा–** (क) **तम्** शरणं गच्छ। (तद्)

(ख) ---------- शरणं गच्छ। (कृष्ण)

(ग) ---------- शरणं गच्छ। (राम)

(घ) ---------- शरणं गच्छ। (सरस्वती)

(ङ) ---------- शरणं गच्छ। (गुरु)

(च) ---------- शरणं गच्छ। (मातृ)

(छ) ---------- शरणं गच्छ। (प्रभु)

(ज) ---------- शरणं गच्छ। (भगवत्)

(झ) ---------- शरणं गच्छ। (युष्मद्)

(ञ) ---------- शरणं गच्छ। (भवत्)

(ट) ---------- शरणं गच्छ। (अस्मद्)

5. **सत्यम् ☑ असत्यम् ☒ वा लिखत–**

[सत्य ☑ या असत्य ☒ लिखें। Write true ☑ or false ☒.]

(क) 'तमेव शरणं गच्छ' इत्यत्र अर्जुनं शरणं गच्छ इत्यर्थः। [ ]

(ख) 'भारत' इति सम्बोधनपदम्। [ ]

(ग) तत्प्रसादात् इत्यत्र कर्मधारयसमासः। [ ]

(घ) प्राप्स्यसि लोटि क्रियापदम्। [ ]

(ङ) 'शान्तिम्' इत्यत्र क्तिन् प्रत्ययः वर्तते। [ ]

www.thearyasamaj.org


## श्लोकः

**मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।**
**मामेवैष्यसि सत्यं ते प्रतिजाने प्रियोऽसि मे ॥78॥** (भ.गी. 18.65)

## पदच्छेदः

मद्–मनाः भव मद्–भक्तः मद्–याजी माम् नमस्–कुरु।
माम् एव एष्यसि सत्यम् ते प्रति-जाने प्रियः असि मे॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| मन्मनाः | मन्मनस्–स. पुं. प्र. एक. समस्तम् | एष्यसि | इण्–कर्तरि लृट् मपु. एक. |
| भव | भू–कर्तरि लोट् मपु. एक. | ते | युष्मद्–द.(सर्व.)त्रि. षष्ठी एक. [वैकल्पिकरूपम्] |
| मद्भक्तः | अ. पुं. प्र. एक. समस्तम् | | |
| मद्याजी | मद्याजिन्–न. पुं. प्र. एक. समस्तम् | प्रतिजाने | प्रति + ज्ञा–कर्तरि आत्मनेपदे लट् उपु. एक. |
| माम् | अस्मद्–द. (सर्व.) त्रि. द्विती.एक. | | |
| नमस्कुरु | नमस् + कृ–कर्तरि लोट् मपु.एक. | प्रियः | अ. पुं. प्र. एक. |
| माम् | अस्मद्–द. (सर्व.) त्रि. द्विती.एक. | असि | अस्–कर्तरि लट् मपु. एक. |
| एव | अव्ययम् | मे | अस्मद्–द.(सर्व.)त्रि.षष्ठी एक. |

## आकाङ्क्षा

**(हे अर्जुन) भव।**

(त्वं) कीदृशः भव? (त्वं) मन्मनाः भव।
पुनश्च कीदृशः भव? मद्भक्तः भव।
पुनश्च कीदृशः भव? मद्याजी भव।

**कुरु**

(त्वं) किं कुरु? (त्वं) नमस्कुरु।
कं नमस्कुरु? मां नमस्कुरु।

**एष्यसि**

कम् एष्यसि? माम् एव एष्यसि।

www.thearyasamaj.org


**प्रतिजाने।**

किं प्रतिजाने? सत्यं प्रतिजाने।

कस्य सत्यं प्रतिजाने? ते सत्यं प्रतिजाने।

**(त्वम्) असि।**

(त्वम्) कीदृशः असि? त्वम् प्रियः असि।

(त्वम्) कस्य प्रियः? (त्वम्) मे प्रियः।

## अन्वयः

(हे अर्जुन! त्वम्) मन्मनाः, मद्भक्तः, मद्याजी (च) भव। मां नमस्कुरु। (इत्थं त्वम्) माम् एव एष्यसि, मे प्रियः असि (अतः) ते सत्यम् प्रतिजाने।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| मन्मनाः | मयि निविष्टमानसः | मन को मुझमें निवेश करने वाला | Mind fixed on me |
| मद्भक्तः | मम उपासकः | मेरा भक्त | devoted to me |
| मद्याजी | मम पूजकः | मेरा पूजक | sacrifice to me |
| भव | तिष्ठ | हो जाओ | become |
| माम् | कृष्णम् इति | मुझे (कृष्ण को) | to me (*Kṛṣṇa*) |
| नमस्कुरु | प्रणम | प्रणाम कर | bow down |
| एष्यसि | प्राप्स्यसि | पाओगे | shall achieve |
| मे प्रियः | मम | मेरे प्रिय | dear to me |
| असि | भवसि | हो | thouart |
| (अतः) ते (समक्षं) | तव (पुरतः) | तुम्हारे (सामने) | to thee |
| सत्यम् | वास्तविकं/निश्चतम् | सच्ची | truth |
| प्रतिजाने | प्रतिज्ञां करोमि | प्रतिज्ञा करता हूँ | promise |

## भावार्थः

**संस्कृतम्** – हे अर्जुन! त्वं स्वस्य मनसः अभिनिवेशं मयि कुरु। त्वं मम उपासकः पूजकश्च भव, सर्वदा ममाग्रे प्रणम। अनेन त्वं माम् एव प्राप्स्यसि – इति अहं सत्यप्रतिज्ञां करोमि; यतोहि त्वं मम प्रीतिभाक् असि।

www.thearyasamaj.org


**हिन्दी** – हे अर्जुन! तुम अपने मन को मुझमें निविष्ट कर दो। तुम मेरे उपासक व पूजक हो जाओ। सदा मेरे सामने नतमस्तक रहो। इस प्रकार तुम मुझे ही प्राप्त हो जाओगे। यह मैं तुम्हारे समक्ष सत्य प्रतिज्ञा करता हूँ क्योंकि तुम मेरे सबसे प्रिय हो।

**आंग्लम्** – Fix your mind on me, be devoted to me, sacrifice to me, prostrate before me, so shall you come to me this is my pledge to you for you are dear to me.

## निदर्शनम्

**(i) व्याकरणम्**

**(क) सन्धिः**

मन्मना भव – मद् + मनाः + भवः
(अनुनासिकसन्धिः) (विसर्गसन्धिः)

एवैष्यसि – एव + एष्यसि (वृद्धिसन्धिः)

प्रियोऽसि – प्रियः + असि (विसर्गसन्धिः)

**(ख) समासः**

मन्मनाः – मयि मनः यस्य सः मन्मनाः (बहुव्रीहिः)

मद्भक्तः – मम भक्तः / मदीयः भक्तः

मद्याजी – मम याजी / मदीयः याजी

**(ग) कृदन्तः**

भक्तः – भज् + क्त

प्रियः – प्री + क

याजी – यज् + णिनि–याजिन्

**अवधेयम्**

**'मे', 'ते'-प्रयोगाः**

www.thearyasamaj.org


## अभ्यासः - 68

### श्लोकः - 78

1. **यथोदाहरणं विग्रहवाक्यं लिखत–**

[उदाहरण के अनुसार विग्रह वाक्य लिखें। Write the analytical sentence as per example.]

**यथा–** (क) मद्भक्तः = **मम भक्तः**

(ख) मद्याजी = ------------------------

(ग) मत्प्रियः = ------------------------

(घ) मत्समीपे = ------------------------

(ङ) मद्गृहे = ------------------------

(च) मद्योगम् = ------------------------

(छ) मद्भावः = ------------------------

(ज) मद्ब्रह्म = ------------------------

(झ) मत्परः = ------------------------

(ञ) मत्प्रसादः = ------------------------

2. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks as per example.]

**यथा–** (क) इदं **मम** निश्चितं मतम्। → इदं **मे** निश्चितं मतम्।

(ख) त्वं **मम** प्रियः असि। → त्वं ------ प्रियः असि।

(ग) इदं धनं ----- भविष्यति। ← इदं धनं **मे** भविष्यति।

(घ) मद्भक्तः **मम** प्रियः अस्ति। → मद्भक्तः ------ प्रियः अस्ति।

(ङ) त्वं **मम** वचनं शृणु। → त्वं ------- वचनं शृणु।

(च) जीवः **मम** अंशः अस्ति। → जीवः ----- अंशः अस्ति।

3. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks according to the example.]

**यथा–** (क) मम पुत्रः = **मत्पुत्रः** = **मे पुत्रः**

(ख) मम गृहे = --------- = -----------

(ग) ------------- = --------- = मे प्रियः

www.thearyasamaj.org


| | | | | |
|---|---|---|---|---|
| (घ) ------------- | = | मत्परः | = | ----------- |
| (ङ) मम पराक्रमः | = | --------- | = | ----------- |
| (च) ------------- | = | मन्मतम् | = | ----------- |

4. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान की पूर्ति करें। Fill in the blanks according to the example.]

| | | | | | |
|---|---|---|---|---|---|
| **यथा–** | (क) **तव पुत्रः** | = | **त्वत्पुत्रः** | = | **ते पुत्रः** |
| | (ख) तव गृहे | = | ---------- | = | ----------- |
| | (ग) ----------- | = | त्वद्हितम् | = | ----------- |
| | (घ) तव देशः | = | ---------- | = | ----------- |
| | (ङ) ----------- | = | ---------- | = | ते मतिः |
| | (च) ----------- | = | त्वत्परः | = | ----------- |

**यथा–** (क) अयं **मम** पुत्रः अस्ति → अयं **मे** पुत्रः अस्ति।

(ख) इदं **तव** गृहम् अस्ति → इदं **ते** गृहम् अस्ति।

(ग) **मम** पुत्रः गृहं गच्छति → **मे** पुत्रः गृहं गच्छति।

(घ) **तव** विद्यालयः दूरे अस्ति → **ते** विद्यालयः दूरे अस्ति।

(ङ) रामः **मम** मित्रम् अस्ति → रामः **मे** मित्रम् अस्ति।

(च) **मम** भक्तः **मम** प्रियः अस्ति → **मे** भक्तः **मे** प्रियः अस्ति।

(छ) **ते** पिता अध्यापनं करोति → **तव** पिता अध्यापनं करोति।

(i) अध्यापकः मे पुस्तिकां पश्यति। ----------------------------

(ii) ते वचनम् असत्यम् अस्ति। ----------------------------

(iii) मे भ्राता दशमकक्षायां पठति। ----------------------------

(iv) ताजमहलं दृष्ट्वा मे विस्मयः अभवत्। ----------------------------

(v) राधा ते सहपाठिनी वर्तते। ----------------------------

(vi) जयपुरे मे पितृव्यः निवसति। ----------------------------

(vii) मे चित्तं ते वचनं श्रुत्वा प्रसीदति। ----------------------------

(viii) ते माता ओदनं पचति। ----------------------------

www.thearyasamaj.org


6. **श्लोकात् पदानि चित्वा लिखत–**

[श्लोक से पद चुनकर लिखें। Write the words from the verse.]

(क) प्रथमान्तपदम् - (i) ---------- (ii) ---------- (iii) ----------
(iv) ---------

(ख) क्रियापदम् - (i) ----------- (ii) ---------- (iii) ----------
(iv) ---------- (v) ----------

7. **उचितं योजयत–**

[उचित मेल करें। Match appropriately.]

| | |
|---|---|
| (क) मद्भक्तः | (i) नमस्कुरु |
| (ख) प्रियः | (ii) प्रतिजाने |
| (ग) माम् | (iii) भव |
| (घ) ते | (iv) असि |

8. **शब्दरूपं पूरयत–**

[शब्दरूप की पूर्ति करें। Complete the declension appropriately.]

| **विभक्तिः** | **एक.** | **द्वि.** | **बहु.** |
|---|---|---|---|
| प्रथमा | अहम् | ---------- | वयम् |
| द्वितीया | माम् | ---------- | ---------- |
| तृतीया | मया | आवाभ्याम् | ---------- |
| चतुर्थी | ---------- | ---------- | अस्मभ्यम् |
| पञ्चमी | ---------- | आवाभ्याम् | अस्मत् |
| षष्ठी | ---------- | ---------- | ---------- |
| सप्तमी | ---------- | आवयोः | ---------- |

9. **धातुरूपं पूरयत–**

[धातुरूप की पूर्ति करें। Complete the verbal forms.]

**(लट् लकारः)**

| | एक. | द्वि. | बहु. | एक. | द्वि. | बहु. |
|---|---|---|---|---|---|---|
| प्रपु. | प्रतिजानीते | --------- | ------- | गृह्णीते | गृह्णाते | गृह्णते |
| मपु. | ----- | प्रतिजानाथे | ------- | गृह्णी | गृह्णाथे | गृह्णध्वे |
| उपु. | प्रतिजाने | --------- | ------- | गृह्णे | गृह्णीवहे | गृह्णीमहे |

www.thearyasamaj.org



## श्लोकः

**सर्वधर्मान्परित्यज्य मामेकं शरणं व्रज ।**
**अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः ॥79॥** (भ.गी. 18.66)

## पदच्छेदः

सर्व-धर्मान् परित्यज्य माम् एकम् शरणम् व्रज।
अहम् त्वा सर्व-पापेभ्यः मोक्षयिष्यामि मा शुचः॥

## पदपरिचयः

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| सर्वधर्मान् | अ. पुं. द्विती. बहु. समस्तम् | त्वा | युष्मद्-द. (सर्व.) त्रि. द्विती. एक. (वैकल्पिकं रूपम्) |
| परित्यज्य | ल्यबन्तम् अव्ययम् | | |
| माम् | अस्मद्-द. (सर्व.) त्रि. द्विती. एक. | सर्वपापेभ्यः | अ. नपुं. पं. बहु. |
| | | मोक्षयिष्यामि | मुच्, सन् णिच् लृट्. उपु. एक. |
| एकम् | अ. पुं. द्विती. एक. | मा | अव्ययम् |
| व्रज | व्रज्-कर्तरि लोट् मपु. एक. | शुचः | अ. पुं. प्र. एक. |
| अहम् | अस्मद्-द.(सर्व.) त्रि. प्र. एक. | | |

## आकाङ्क्षा

**(अर्जुन!) व्रज।**

| | |
|---|---|
| कुत्र व्रज? | शरणं व्रज। |
| कं शरणं व्रज? | मां शरणं व्रज। |
| कीदृशं मां शरणं व्रज? | एकं मां शरणं व्रज। |
| किं कृत्वा शरणं व्रज? | परित्यज्य। |
| कान् परित्यज्य? | सर्वधर्मान् परित्यज्य। |

**अहं मोक्षयिष्यामि।**

| | |
|---|---|
| अहं कं मोक्षयिष्यामि? | अहं त्वा मोक्षयिष्यामि। |
| केभ्यः मोक्षयिष्यामि? | सर्वपापेभ्यः मोक्षयिष्यामि। |
| अतः किम्? | मा शुचः। |

## अन्वयः

सर्वधर्मान परित्यज्य एकं मां शरणं व्रज। अहं त्वा सर्वपापेभ्यः मोक्षयिष्यामि, मा शुचः।

www.thearyasamaj.org



**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| सर्वधर्मान् | समस्तकर्तव्याकर्तव्यादीन् | सभी कर्तव्य-अकर्तव्य आदि विचार को | All duties |
| परित्यज्य | विहाय | छोड़कर | having abondoned |
| एकं | केवलं | केवल | alone |
| मां | परमात्मानं | मेरी (परमात्मा की) | to me |
| शरणं | आश्रयं | आश्रय में | refuge |
| व्रज | गच्छ | जाओ | take |
| अहं | ईश्वरः | मैं (प्रभु) | I |
| त्वा | त्वाम् | तुम्हें | Thee |
| सर्वपापेभ्यः | समस्तपातकेभ्यः | सभी पापों से | from all sins |
| मोक्षयिष्यामि | मोचयिष्यामि/उद्धरिष्यामि | मुक्त कर दूँगा | will liberate |
| मा शुचः | चिन्तां मा कुरु | चिन्ता मत कर | grieve not |

**भावार्थः**

**संस्कृतम्** – हे अर्जुन! किं कर्तव्यं, किं च न कर्तव्यम् इति समस्तधर्मनिर्णयस्य विचारं त्यक्त्वा केवलं मदीयम् आश्रयं स्वीकुरु। तदानीम् अहं सकलेभ्यः पातकेभ्यः त्वाम् अवश्यमेव मोचयिष्यामि। अतः त्वं शोकं चिन्तां च मा कुरु।

**हिन्दी** – हे अर्जुन! क्या करना है और क्या नहीं करना है; इस प्रकार के सभी धर्मों के निर्णय सम्बन्धी विचार को छोड़कर केवल मेरी शरण मे आ जाओ। मैं तुम्हें सभी पापों से मुक्त कर दूँगा। अतः तुम किसी प्रकार की चिन्ता मत करो।

**आंग्लम्** – Renounce all *Dharmas* and take refuge in me alone. I shall liberate you from all sins grieve not.

## निदर्शनम्

(i) **व्याकरणम्**

(क) **सन्धिः**

सर्वपापेभ्यो मोक्षयिष्यामि – सर्वपापेभ्यः + मोक्षयिष्यामि (विसर्गसन्धिः)

www.thearyasamaj.org


**(ख) समासः**

सर्वधर्मान् - सर्वे च ते धर्माश्च = सर्वधर्माः (कर्मधारयः) तान्

सर्वपापेभ्यः - सर्वं च तत् पापम् सर्वपापम् (कर्मधारयः) तेभ्यः

**(ग) कृदन्तः**

परित्यज्य - परि + त्यज् + ल्यप्

धर्मः - धृ + मन्

**(घ) व्युत्पत्तिः**

पापम् - पाति रक्षति आत्मानम् अस्मात्

धर्मः - ध्रियते लोकोऽनेन, धरति लोकं वा

**अवधेयम्**

**'व्रज' धातोः लोट्रूपाणि**

| | | | |
|---|---|---|---|
| व्रजतु/व्रजतात् | व्रजताम् | व्रजन्तु | प्रपु. |
| व्रज/व्रजतात् | व्रजतम् | व्रजत | मपु. |
| व्रजानि | व्रजाव | व्रजाम | उपु. |

## अभ्यासः - 69

## श्लोकः - 79

1. **उचितं योजयत–**

[उचित मेल करें। Match the appropriate one.]

| | |
|---|---|
| (क) सर्वधर्मान् | (i) शुचः |
| (ख) एकं | (ii) व्रज |
| (ग) सर्वपापेभ्यः | (iii) परित्यज्य |
| (घ) मा | (iv) शरणम् |
| (ङ) मां | (v) मोक्षयिष्यामि |

2. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Answer on the basis of the verse.]

(क) शोकं कः करोति? ----------------------------------

(ख) पापस्य मोक्षकर्ता कः? ----------------------------------

(ग) 'परित्यज्य' इत्यत्र कः प्रत्ययः? ----------------------------------

www.thearyasamaj.org



(घ) 'त्वा' इत्यत्र का विभक्तिः? ------------------------------------

(ङ) 'व्रज' इत्यत्र कः लकारः? ------------------------------------

(च) श्लोके कति समस्तपदानि सन्ति? ------------------------------------

3. **श्लोकस्य भावार्थं पूरयत–**

[श्लोक के भावार्थ की पूर्ति करें। Complete the meaning of the verse.]

हे अर्जुन! --- ------------, किं --- --- --------- ------ ----------------- -------- विचारं ----- ------ -------- --------- स्वीकुरु। तदानीम् ------ ----------- त्वाम् -------- -------------, अतः ---- -------- -------- ----- मा ------।

4. **विश्लेषणानुसारं श्लोके प्रयुक्तं पदं लिखत–**

[विश्लेषण के अनुसार श्लोक में प्रयुक्त पद लिखें। Write the words available in the verse as directed.]

(क) अ. पुं. द्विती. बहु. – -----------------

(ख) अ. नपुं. पं. बहु. – -----------------

(ग) अ. नपुं. द्विती. एक. (विशेषणम्) – -----------------

(घ) अ. नपुं. द्विती. एक. (विशेष्यम्) – -----------------

(ङ) द. पुं. प्र. एक. – -----------------

5. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरण के अनुसार रिक्त स्थान भरें। Fill in the blanks as shown in the example.]

(क) परि + त्यज् + ल्यप् = **परित्यज्य**

(ख) परि + वृत् + ल्यप् = --------------------

(ग) परि + स्वज् + ल्यप् = --------------------

(घ) परि + भ्रम् + ल्यप् = --------------------

(ङ) परि + हस् + ल्यप् = --------------------

(च) परि + नम् + ल्यप् = --------------------

www.thearyasamaj.org


**श्लोकः**

**अर्जुन उवाच**

**नष्टो मोहः स्मृतिर्लब्धा त्वत्प्रसादान्मयाऽच्युत ।**
**स्थितोऽस्मि गतसन्देहः करिष्ये वचनं तव ॥80॥** (भ.गी. 18.73)

**पदच्छेदः**

अर्जुनः उवाच
नष्टः मोहः स्मृतिः लब्धा त्वत्-प्रसादात् मया अच्युत।
स्थितः अस्मि गत-सन्देहः करिष्ये वचनम् तव।।

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| नष्टः | अ. पुं. प्र. एक. | अस्मि | अस्-कर्तरि लट् उपु. एक. |
| मोहः | अ. पुं. प्र. एक. | गतसन्देहः | अ. पुं. प्र. एक. समस्तम् |
| स्मृतिः | इ. स्त्री. प्र. एक. | करिष्ये | कृ-कर्तरि आत्मनेपदे |
| लब्धा | आ. स्त्री. प्र. एक. | | लृट् उपु. एक. |
| त्वत्प्रसादात् | अ. पुं. पं. एक. समस्तम् | वचनम् | अ. नपुं. द्विती. एक. |
| मया | अस्मद्-द.(सर्व.) त्रि.तृ.एक. | तव | युष्मद्-द. (सर्व.) |
| अच्युत | अ. पुं. सम्बो. एक. | | त्रि. षष्ठी एक. |
| स्थितः | अ. पुं. प्र. एक. | | |

**आकाङ्क्षा**

**हे अच्युत! नष्टः।**

| | |
|---|---|
| कः नष्टः? | मोहः नष्टः। |

**लब्धा।**

| | |
|---|---|
| का लब्धा? | स्मृतिः लब्धा। |
| केन लब्धा? | मया (अर्जुनेन) लब्धा। |
| कस्मात् लब्धा? | त्वत्प्रसादात् लब्धा। |

**अस्मि**

| | |
|---|---|
| किं भूतः अस्मि? | स्थितः अस्मि। |

www.thearyasamaj.org


| | |
|---|---|
| केन प्रकारेण स्थितः अस्मि? | गतसन्देहः स्थितः अस्मि। |

**करिष्ये।**

| | |
|---|---|
| किं करिष्ये? | वचनं करिष्ये। |
| कस्य वचनं करिष्ये? | तव वचनं करिष्ये। |

## अन्वयः

हे अच्युत! त्वत्प्रसादात् मोहः नष्टः, मया स्मृतिः लब्धा। (अहं) गतसन्देहः (त्वच्छासने) स्थितः अस्मि, तव वचनं करिष्ये।

## पदार्थः

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| हे अच्युत! | हे कृष्ण! | हे कृष्ण! | Lord *krishna*! |
| त्वत्प्रसादात् | तव कृपया | तुम्हारी कृपा से | through thy grace |
| मोहः | आसक्तः | मोह | delusion |
| नष्टः | समाप्तः | समाप्त हो गया | is destroyed |
| मया | अर्जुनेन | मैंने (अर्जुन ने) | by me |
| स्मृतिः | प्रत्ययः | स्मरण शक्ति | memory |
| लब्धा | प्राप्ता | पा ली है | has been gained |
| गतसन्देहः | संशयरहितः | संशयविहीन | free from doubt |
| (त्वच्छासने) | त्वदाज्ञायाम् | आपकी आज्ञा से | to your word |
| स्थितः अस्मि | जातः अस्मि | हो गया हूँ | I am firm |
| तव | त्वदीयं | तुम्हारे | Thy |
| वचनं | आज्ञां | आज्ञा को | word |
| करिष्ये | अनुपालयिष्यामि | पालन करूँगा | will do |

## भावार्थः

**संस्कृतम्** – अर्जुनः अवदत् – हे कृष्ण! तव कृपया मम मोहः अपगतः, मया प्रत्याहवानं पुनः प्राप्तम्। सर्वे संशयाः अपगताः सन्ति। अधुना अहं त्वदीयवचनस्य पालनम् अवश्यं करिष्यामि।

**हिन्दी** – अर्जुन बोले – हे कृष्ण! तुम्हारी कृपा से मेरा मोह नष्ट हो गया है, मैंने अपनी स्मरण-शक्ति को पुनः प्राप्त कर लिया है। मैं इस समय प्रत्येक सन्देह से मुक्त होकर स्थित हूँ। अब मैं आपके वचन का पूर्णतया पालन करूँगा।

www.thearyasamaj.org



**आंग्लम्** – My delusion is destroyed. I have regained my memory through your grace, O *Achyuta*. I am firm, I am free from doubt. I shall act according to your word.

## निदर्शनम्

### (i) व्याकरणम्

**(क) सन्धिः**

नष्टो मोहः – नष्टः + मोहः (विसर्गसन्धिः)

स्मृतिर्लब्धा – स्मृतिः + लब्धा (विसर्गसन्धिः)

त्वत्प्रसादान्मयाऽच्युत – त्वत्प्रसादात् + मया + अच्युत

(त्वत्प्रसादात् + मया: अनुनासिकसन्धिः) (मया + अच्युत: दीर्घसन्धिः)

स्थितोऽस्मि – स्थितः + अस्मि (विसर्गसन्धिः)

**(ख) समासः**

त्वत्प्रसादात् – तव प्रसादः त्वत्प्रसादः (षष्ठीतत्पुरुषः) तस्मात्

गतसन्देहः – गतः सन्देहः यस्य सः गतसन्देहः (बहुव्रीहिः)

अच्युतः – न च्युतः अच्युतः (नञ् तत्पुरुषः) हे अच्युत

**(ग) कृदन्तः**

नष्टः – नश् + क्त

मोहः – मुह् + घञ्

स्मृतिः – स्मृ + क्तिन्

लब्धा – लभ् + क्त + टाप्

च्युतः – च्युत् + क

स्थितः – स्था + क्त

गतः – गम् + क्त

सन्देहः – सम् + दिह् + घञ्

वचनम् – वच् + ल्युट्

www.thearyasamaj.org



## अभ्यासः – 70

### श्लोकः - 80

1. **विवरणानुसारं श्लोकात् पदानि चित्वा लिखत–**

[विवरण के अनुसार श्लोक से पद चुनकर रिक्त स्थानों में लिखें। Fill in the blanks with the words from the verse as per the analysis.]

**यथा–** (क) इ. स्त्री. प्र. एक. – ----------------------

(ख) अ. नपुं. द्विती. एक. – ----------------------

(ग) द. पुं. तृ. एक. – ----------------------

(घ) अस् कर्तरि लट्. उपु. एक. – ----------------------

(ङ) स्था–क्त प्रत्ययः – ----------------------

(च) अ. पुं. पं. एक. – ----------------------

(छ) अ. पुं. प्र. एक. (समस्तम्) – ----------------------

2. **श्लोकस्य पदच्छेदं पूरयत–**

[श्लोक का पदच्छेद पूरा करें। Complete the splitting word of the verse.]

नष्टः ------- -------- लब्धा ---- --------- ----- अच्युत।

स्थितः ---- ------ -------- करिष्ये -------- ----------॥

3. **विसन्धिं कुरुत–**

[सन्धि-विच्छेद करें। Disjoin the *Sandhi*.]

(क) नष्टो मोहः = ---------- + ----------

(ख) स्मृतिर्लब्धा = ---------- + ----------

(ग) मयाऽच्युत = ---------- + ----------

(घ) तथाऽपि = ---------- + ----------

(ङ) त्वत्प्रसादान्मया = ---------- + ----------

(च) तस्मान्मन्दिरात् = ---------- + ----------

(छ) स्थितोऽस्मि = ---------- + ----------

(ज) ऋषयोऽगच्छन् = ---------- + ----------

(झ) वचोऽब्रवीत् = ---------- + ----------

(भ) धर्मज्ञो भारतः = ---------- + ----------

www.thearyasamaj.org


4. **यथोदाहरणं रिक्तस्थानं पूरयत–**

[उदाहरणानुसार रिक्त स्थानों की पूर्ति करें। Fill in the blanks as shown in the example.]

| | | | |
|---|---|---|---|
| यथा– | (क) नष्टः | = | **नश् + क्त** |
| | (ख) मोहः | = | ------------ |
| | (ग) स्मृतिः | = | ------------ |
| | (घ) लब्धा | = | ------------ |
| | (ङ) प्रसादः | = | -------- + घञ् |
| | (च) स्थितः | = | -------- + क्त |
| | (छ) सन्देहः | = | सम् + -------- |

5. **श्लोकं पठित्वा उत्तरं प्रदत्त–**

[श्लोक पढ़कर उत्तर लिखें। Answer on the basis of the verse.]

(क) अर्जुनः कस्य नाशं वदति? -----------------------------------

(ख) अच्युतः कः अस्ति? -----------------------------------

(ग) अर्जुनः कां लब्धवान्? -----------------------------------

(घ) 'गतसन्देहः' कस्य विशेषणम्? -----------------------------------

(ङ) 'तव वचनम्' इत्यत्र कस्य वचनम्? -----------------------------------

6. **विग्रहवाक्यं लिखत–**

[विग्रह-वाक्य लिखें। Write the analytical sentence.]

| | | | | | | |
|---|---|---|---|---|---|---|
| यथा– | (क) गतसन्देहः | = | **गतः** | **सन्देहः** | **यस्य** | **सः** |
| | (ख) गतशोकः | = | ----- | ------ | ------ | ------ |
| | (ग) नष्टमोहः | = | ----- | ------ | ------ | ------ |
| | (घ) लब्धस्मृतिः | = | **लब्धा** | **स्मृतिः** | **येन** | **सः** |
| | (ङ) लब्धप्रसादः | = | ----- | ------ | ------ | ------ |
| | (च) जितक्रोधः | = | ----- | ------ | ------ | ------ |
| | (छ) जितेन्द्रियः | = | ----- | ------ | ------ | ------ |

www.thearyasamaj.org


7. **धातुरूपाणि दृष्ट्वा रिक्तस्थानानि पूरयत–**

[धातुरूपों को देखकर रिक्त स्थानों की पूर्ति करें। Fill in the blanks on the basis of verbal forms.]

**'कृ'-धातोः आत्मनेपदे लृट्रूपाणि**

| पुरुषः | एक. | द्वि. | बहु. |
|---|---|---|---|
| प्रपु. | करिष्यते | करिष्येते | करिष्यन्ते |
| मपु. | करिष्यसे | करिष्येथे | करिष्यध्वे |
| उपु. | करिष्ये | करिष्यावहे | करिष्यामहे |

**यथा–** (क) अर्जुनः तव वचनं **करिष्यते।**

(ख) अहं तव वचनं ----------------------------------------

(ग) अर्जुनभीमौ तव वचनं ----------------------------------------

(घ) युवाम् मम वचनं ----------------------------------------

(ङ) वयम् तव वचनं ----------------------------------------

(च) त्वम् मम वचनं ----------------------------------------

(छ) यूयम् कृष्णस्य वचनं ----------------------------------------

(ज) अर्जुनभीमयुधिष्ठिराः तव वचनं ----------------------------------------

(झ) आवां तव वचनं ----------------------------------------

8. **अर्जुनस्य मोहस्य कारणानि सरल-संस्कृत-भाषया दशवाक्येषु लिखत–**

[अर्जुन के मोह के कारणों को सरल–संस्कृत-भाषा में दस वाक्यों में लिखें। Write the causes of *Arjuna's Moha* in ten sentences of simple *Sanskrit*.]

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

------------------------------------------------------------

www.thearyasamaj.org


**श्लोकः**

**सञ्जय उवाच–**

**यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।**
**तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥81॥** (भ.गी. 18.78)

**पदच्छेदः**

सञ्जय उवाच–

यत्र योग-ईश्वरः कृष्णः यत्र पार्थः धनुर्धरः।
तत्र श्रीः विजयः भूतिः ध्रुवा नीतिः मतिः मम॥

**पदपरिचयः**

| पदम् | विश्लेषणम् | पदम् | विश्लेषणम् |
|---|---|---|---|
| यत्र | अव्ययम् | विजयः | अ. पुं. प्र. एक. |
| योगेश्वरः | अ. पुं. प्र. एक. समस्तम् | भूतिः | इ. स्त्री. प्र. एक. |
| कृष्णः | अ. पुं. प्र. एक. | ध्रुवा | आ. स्त्री. प्र. एक. विशेषणम् |
| पार्थः | अ. पुं. प्र. एक. | नीतिः | इ. स्त्री. प्र एक. |
| धनुर्धरः | अ. पुं. प्र. एक. समस्तम् | मतिः | इ. स्त्री. प्र. एक. |
| तत्र | अव्ययम् | मम | अस्मद्–द. (सर्व.) |
| श्रीः | ई. स्त्री. प्र. एक. | | त्रि. षष्ठी. एक. |

**आकाङ्क्षा**

**यत्र (अस्ति)।**

| | |
|---|---|
| यत्र कः अस्ति? | यत्र कृष्णः अस्ति। |
| कीदृशः कृष्णः? | योगेश्वरः कृष्णः। |
| पुनश्च कः अस्ति? | पार्थः अस्ति। |
| कीदृशः पार्थः? | धनुर्धरः पार्थः। |

**तत्र (अस्ति)।**

| | |
|---|---|
| तत्र का अस्ति? | तत्र श्रीः अस्ति। |
| पुनश्च कः अस्ति? | विजयः अस्ति। |
| पुनश्च का अस्ति? | भूतिः अस्ति। |

www.thearyasamaj.org


| | |
|---|---|
| पुनश्च का अस्ति? | नीतिः अस्ति। |
| कीदृशी नीतिः अस्ति? | ध्रुवा नीतिः अस्ति। |

**(इत्थम् अस्ति।)**

| | |
|---|---|
| (इत्थम्) का अस्ति? | (इत्थं) मतिः अस्ति। |
| कस्य मतिः अस्ति? | मम (सञ्जयस्य) मतिः अस्ति। |

**अन्वयः**

यत्र योगेश्वरः कृष्णः (वर्तते) यत्र धनुर्धरः पार्थः (अस्ति), तत्र विजयः, श्रीः, भूतिः, ध्रुवा नीतिः (तिष्ठन्ति) (इति) मम मतिः।

**पदार्थः**

| पदम् | संस्कृतम् | हिन्दी | आंग्लम् |
|---|---|---|---|
| यत्र | यस्मिन् स्थाने | जहाँ | where ever |
| योगेश्वरः | योगिराजः | योगिराज | The Lord of *yoga* |
| कृष्णः (वर्तते) | नन्दनन्दनः वर्तते | श्रीकृष्ण रहते हैं | *kṛṣṇa* dwells |
| यत्र धनुर्धरः | यत्र गाण्डीवधारी | गाण्डीव धनुष को धारण करने वाला | the archer |
| पार्थः | अर्जुनः | अर्जुन | *Arjuna* |
| (अस्ति) | भवति | है | dwells |
| तत्र | तस्मिन् स्थाने | वहाँ | there |
| विजयश्रीः | जयश्रीः | विजय | victory |
| भूतिः | ऐश्वर्यम् | वैभव | happiness |
| ध्रुवा | स्थिरा | अचल | firm |
| नीतिः | न्यायः | नीति | policy |
| (तिष्ठन्ति) | भवन्ति | होते हैं | are |
| इति मम | एवं मदीया (सञ्जयस्य) | मेरी (संजय की) | my (of *Sañjaya*) |
| मतिः | अभिमतम् | मान्यता है | conviction |

**भावार्थः**

**संस्कृतम्** – सञ्जयः धृतराष्ट्रं वदति-हे राजन्! यत्र परमयोगी भगवान् कृष्णः अस्ति, यत्र गाण्डीवधारी अर्जुनः च अस्ति, तत्र सम्पदा, विजयः, ऐश्वर्यम्, अचला नीतिः च भवन्ति इति मम अभिमतम्।

www.thearyasamaj.org


**हिन्दी** – संजय धृतराष्ट्र से कहते हैं-हे राजन्! जहाँ परमयोगी भगवान् कृष्ण हैं और जहाँ गाण्डीव धनुषधारी अर्जुन हैं, वहाँ लक्ष्मी, विजय, ऐश्वर्य तथा स्थिर नीति होती ही हैं – ऐसा मेरा मानना है।

**आंग्लम्** – Where ever is *kṛsṇa* the Lord of *yoga* where ever is *partha* the wielder of the bow, there are prosperity, victory, expanstion and sound policy, such is my conviction.

## निदर्शनम्

### (i) व्याकरणम्

**( क ) सन्धिः**

कृष्णो यत्र – कृष्णः + यत्र (विसर्गसन्धिः)

पार्थो धनुर्धरः – पार्थः + धनुः + धरः (विसर्गसन्धिः)

श्रीर्विजयो भूतिर्ध्रुवा – श्रीः + विजयः + भूतिः + ध्रुवा (विसर्गसन्धिः)

नीतिर्मतिर्मम – नीतिः + मतिः + मम (विसर्गसन्धिः)

**( ख ) समासः**

योगेश्वरः – योगानाम् ईश्वरः (षष्ठीतत्पुरुषः)

धनुर्धरः – धनुः धरति इति (उपपदतत्पुरुषः)

**( ग ) कृदन्तः**

धरः – धृ + अच्

श्रीः – श्रि + क्विप्

विजयः – वि + जि + अच्

भूतिः – भू + क्तिन्

नीतिः – नी + क्तिन्

मतिः – मन् + क्तिन्

www.thearyasamaj.org


(घ) **तद्धितान्तः**

पार्थ = पृथायाः अपत्यम्, पृथा + अण्

## अभ्यासः – 71
### श्लोकः - 81

1. **श्लोकं पठित्वा उत्तरं लिखत–**

[श्लोक पढ़कर उत्तर लिखें। Read the verse and answer the questions.]

(क) 'मम मतिः' इत्यत्र कस्य मतिः? ----------------------------------

(ख) 'धनुर्धरः' इत्यत्र कः समासः? ----------------------------------

(ग) योगेश्वरः कः अस्ति? ----------------------------------

(घ) विजयः कुत्र भवति? ----------------------------------

(ङ) श्लोके 'ध्रुवा' कस्य पदस्य विशेषणम्? ----------------------------------

2. **अस्मिन् श्लोके क्तिन् प्रत्ययस्य उदाहरणानि प्रदर्श्य श्लोकातिरिक्तानि पञ्च उदाहरणानि लिखत–**

[इस श्लोक में क्तिन् प्रत्यय के उदाहरण बताकर श्लोकातिरिक्त पाँच उदाहरण लिखें। Write the words having *Ktin* as suffix from the verse and give five more examples different to ones used in the verse.]

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

----------------------------------------------------------------------

3. **सन्धिविच्छेदं कुरुत–**

[सन्धि विच्छेद करें। Disjoin the *Sandhi*.]

(क) श्रीर्विजयः = ---------- + ----------

(ख) भूतिर्ध्रुवा = ---------- + ----------

(ग) नीतिर्मतिर्मम = ---------- + ---------- + ----------

(घ) कृष्णो यत्र = ---------- + ----------

(ङ) पार्थो धनुर्धरः = ---------- + ----------

(च) विजयो भूतिः = ---------- + ----------

www.thearyasamaj.org


4. **श्लोकस्य अन्वयं पूरयत–**

[श्लोक का अन्वय पूरा करें। Complete the construction of the verse.]

यत्र --------- ------ ------ ------- धनुर्धरः ----- ---- ----- -------
------- भूतिः ----- ------- ------- (इति) मम ---------।

5. **यथोदाहरणं 'यत्र – तत्र' इति प्रयोगेण पञ्च-वाक्यानि लिखत–**

[उदाहरण के अनुसार 'यत्र–तत्र' का प्रयोग कर पाँच वाक्य लिखें। Write five sentences using "*Yatra-Tatra*" according to the example.]

**यथा–** (क) **यत्र** कृष्णः अस्ति **तत्र** श्रीः अस्ति।

(ख) **यत्र** पार्थः अस्ति **तत्र** विजयः अस्ति।

(ग) ----------------------------------------------

(घ) ----------------------------------------------

(ङ) ----------------------------------------------

(च) ----------------------------------------------

(छ) ----------------------------------------------

6. **अत्र प्रदत्तान् शब्दान् प्रयुज्य कतिपयानि वाक्यानि लिखत–**

[दिये गये शब्दों का प्रयोग करते हुए कुछ वाक्य बनाएँ। Construct some sentences using the words given below.]

(क) श्रीः (ख) भूतिः (ग) यत्र (घ) ध्रुव (ङ) अस्मद्

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

----------------------------------------------------------

www.thearyasamaj.org


**7. अष्टादशे अध्याये भगवतः कृष्णस्य उद्बोधनं पठितश्लोकानुसारं सरलसंस्कृतभाषया लिखत–**

[अष्टादश अध्याय में भगवान् कृष्ण के उद्बोधन को पठित श्लोकों के अनुसार सरल संस्कृत भाषा में लिखें। Write the preaching of Lord *Kṛṣṇa* in Eighteenth chapter in simple Sanskrit according to the read verses.]

www.thearyasamaj.org

# परिशिष्टम्

## अकारादिक्रमेण श्लोकावलिः

| क्र.सं. | श्लोकः | श्लोकसंख्या | पृष्ठसंख्या |
|---|---|---|---|
| 1. | अथ चित्तं समाधातुं | 4 | 15-19 |
| 2. | अथैतदप्यशक्तोऽसि | 6 | 25-29 |
| 3. | अद्वेष्टा सर्वभूतानाम् | 8 | 36-43 |
| 4. | अधश्चोर्ध्वं प्रसृताः | 41 | 183-187 |
| 5. | अध्यात्मज्ञाननित्यत्वं | 20 | 79-87 |
| 6. | अनपेक्षः शुचिर्दक्षः | 11 | 49-53 |
| 7. | अनादित्वान्निर्गुणत्वात् | 25 | 107-111 |
| 8. | अनुद्वेगकरं वाक्यं | 69 | 312-316 |
| 9. | अभ्यासेऽप्यसमर्थोऽसि | 5 | 20-24 |
| 10. | अभयं सत्त्वसंशुद्धिः | 50 | 226-235 |
| 11. | अमानित्वमदम्भित्वम् | 16 | 71-78 |
| 12. | अशास्त्रविहितं घोरं | 62 | 282-288 |
| 13. | असक्तिरनभिष्वङ्गः | 18 | 79-87 |
| 14. | असौ मया हतश्शत्रुः | 57 | 256-260 |
| 15. | अहं वैश्वानरो भूत्वा | 46 | 206-210 |
| 16. | अहिंसा सत्यमक्रोधः | 51 | 226-235 |
| 17. | आढ्योऽभिजनवानस्मि | 58 | 261-266 |
| 18. | आयुस्सत्वबलारोग्य- | 65 | 293-297 |
| 19. | आशापाशशतैर्बध्दाः | 55 | 246-250 |
| 20. | आहारस्त्वपि सर्वस्य | 64 | 289-292 |
| 21. | इदमद्य मया लब्धम् | 56 | 251-255 |
| 22. | इन्द्रियार्थेषु वैराग्यम् | 17 | 71-78 |
| 23. | ईश्वरः सर्वभूतानां | 76 | 347-350 |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 24. | उत्तमः पुरुषस्त्वन्यः | 49 | 221-225 |
| 25. | उदासीनवदासीनो गुणैर्यो | 35 | 156-160 |
| 26. | ऊर्ध्वमूलमधःशाखम् | 40 | 178-182 |
| 27. | कट्वम्ललवणात्युष्ण– | 66 | 298-301 |
| 28. | कर्शयन्तः शरीरस्थं | 63 | 282-288 |
| 29. | क्षेत्रक्षेत्रज्ञयोरेवम् | 28 | 121-125 |
| 30. | ततः पदं तत्परिमार्गितव्यं | 43 | 188-196 |
| 31. | तत्र सत्त्वं निर्मलत्वात् | 30 | 132-136 |
| 32. | तमस्त्वज्ञानजं विद्धि | 32 | 142-146 |
| 33. | तमेव शरणं गच्छ | 77 | 351-354 |
| 34. | तस्माच्छास्त्रं प्रमाणं ते | 61 | 277-281 |
| 35. | त्रिविधं नरकस्येदं द्वारं | 59 | 267-271 |
| 36. | तुल्यनिन्दास्तुतिर्मौनी | 14 | 59-65 |
| 37. | तेजः क्षमा धृतिः शौचम् | 52 | 226-235 |
| 38. | तेषामहं समुद्धर्ता | 2 | 1-9 |
| 39. | द्वाविमौ पुरुषौ लोके | 48 | 216-220 |
| 40. | दम्भो दर्पोऽभिमानश्च | 53 | 236-240 |
| 41. | दातव्यमिति यद्दानं | 71 | 322-326 |
| 42. | देवद्विजगुरुप्राज्ञपूजनं | 68 | 307-311 |
| 43. | द्वौ भूतसर्गौ लोकेऽस्मिन् | 54 | 241-245 |
| 44. | न तद्भासयते सूर्यो | 45 | 202-205 |
| 45. | न रूपमस्येह तथोपलभ्यते | 42 | 188-196 |
| 46. | नष्टो मोहः स्मृतिर्लब्धा | 80 | 365-370 |
| 47. | निर्मानमोहा जितसङ्गदोषा | 44 | 197-201 |
| 48. | प्रकाशं च प्रवृत्तिं च | 34 | 152-155 |
| 49. | प्रकृत्यैव च कर्माणि | 23 | 98-102 |
| 50. | ब्रह्मणो हि प्रतिष्ठाहम् | 39 | 173-177 |
| 51. | मनःप्रसादः सौम्यत्वं | 70 | 317-321 |
| 52. | मन्मना भव मद्भक्तो | 78 | 355-360 |

www.thearyasamaj.org



| | | | |
|---|---|---|---|
| 53. | मय्येव मन आधत्स्व | 3 | 10-14 |
| 54. | मानापमानयोस्तुल्यः | 37 | 161-168 |
| 55. | मां च योऽव्यभिचारेण | 38 | 169-172 |
| 56. | मयि चानन्ययोगेन | 19 | 79-87 |
| 57. | यः शास्त्रविधिमुत्सृज्य | 60 | 272-276 |
| 58. | यत्तदग्रे विषमिव | 73 | 332-336 |
| 59. | यत्र योगेश्वरः कृष्णो | 81 | 371-376 |
| 60. | यथा प्रकाशयत्येकः | 27 | 117-120 |
| 61. | यथा सर्वगतं सौक्ष्म्याद् | 26 | 112-116 |
| 62. | यदग्रे चानुबन्धे च | 75 | 342-346 |
| 63. | यदा भूतपृथग्भावम् | 24 | 103-106 |
| 64. | यस्मान्नोद्विजते लोको | 10 | 44-48 |
| 65. | यातयामं गतरसं | 67 | 302-306 |
| 66. | ये तु धर्म्यामृतमिदं | 15 | 66-70 |
| 67. | ये तु सर्वाणि कर्माणि | 1 | 1-9 |
| 68. | यो न हृष्यति न द्वेष्टि | 12 | 54-58 |
| 69. | रजो रागात्मकं विद्धि | 31 | 137-141 |
| 70. | विषयेन्द्रियसंयोगाद्यत् | 74 | 337-341 |
| 71. | श्रेयो हि ज्ञानमभ्यासात् | 7 | 30-35 |
| 72. | सत्त्वं रजस्तम इति | 29 | 126-131 |
| 73. | सत्त्वं सुखे सञ्जयति | 33 | 147-151 |
| 74. | सन्तुष्टस्सततं योगी | 9 | 36-43 |
| 75. | समं पश्यन् हि सर्वत्र | 22 | 93-97 |
| 76. | समं सर्वेषु भूतेषु | 21 | 88-92 |
| 77. | समः शत्रौ च मित्रे च | 13 | 59-65 |
| 78. | समदुःखसुखः स्वस्थः | 36 | 161-168 |
| 79. | सर्वधर्मान्परित्यज्य | 79 | 361-364 |
| 80. | सर्वस्य चाहं हृदि | 47 | 211-215 |
| 81. | सुखं त्विदानीं त्रिविधं | 72 | 327-331 |

www.thearyasamaj.org

पञ्चमी दीक्षा
**व्युत्पादिनी**

चतुर्थी दीक्षा
**वाङ्मयावगाहनी**

तृतीया दीक्षा
**वाङ्मयावतरणी**

द्वितीया दीक्षा
**व्यवहारावगाहनी**

प्रथमा दीक्षा
**व्यवहारावतरणी**

**संस्कृतस्वाध्यायः**

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली